ગુજરાત રાજયના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# दर्शनम् २

## मध्यमा २

## ( ધોરણ 12 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्यम् : ₹ 18.00**

तमसो मा ज्योतिर्गमय
**गुजरात राज्य शाला पाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
श्री भा.वं.रामप्रियः

**लेखनम्**
श्री भगीरथः त्रिवेदी (कन्वीनर)
डॉ. नारायण पति
श्री बी. उमा महेश्वरी
डॉ. भरत शीलु

**समीक्षणम्**
प्रा. मयूरी भाटिया
डॉ. विष्णुप्रसादः रावलः
श्री चिन्तनः जोषी

**भाषाशुद्धिः**
श्री भगीरथः त्रिवेदी

**संयोजनम्**
डॉ. क्रिष्णा दवे
(विषय-संयोजकः अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामकः शैक्षणिक)

**मुद्रणासंयोजनम्**
श्री हरेश एस. लिम्बाचिया
(उपनियामकः उत्पादन)

## प्रास्ताविकम्

प्राच्यगुरूकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चातर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **दर्शनम् २, मध्यमा २ (धो२ण 12)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव॥

पी.भारती (IAS)
नियामकः — कार्यवाहक प्रमुखः
ता. 26-10-2020 — गान्धीनगरम्

प्रथमावृत्ति : 2020
**प्रकाशक :** गुजरात राज्य शाला पाठ्यपुस्तक मण्डल, ‘विद्यायन’, सेक्टर 10-ए, गान्धीनगरप्रतिनिध्येन पी.भारती, नियामकः
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठपनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसाय मानवतावादाय जिज्ञासायै भावनाबङ्गमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६ तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | न्यायदर्शनपरिचयः परमपरा च | 1 |
| २. | मङ्गलाचरणात् अभावनिरूपणं यावत् | 6 |
| ३. | पृथिवीनिरूपणात् वायुनिरूपणं यावत् | 14 |
| ४. | आकाशात् मनोनिरूपणं यावत् | 22 |
| ५. | रूपनिरूपणात् शब्दगुणनिरूपणं यावत् | 26 |
| ६. | बुद्धिनिरूपणात् कारणनिरूपणं यावत् | 32 |
| ७. | प्रत्यक्षप्रमाणनिरूपणम् | 36 |
| ८. | अनुमानप्रमाणे विपक्षलक्षणपर्यन्तम् | 40 |
| ९. | हेत्वाभासनिरूपणात् अनुमानप्रमाणान्तो भागः | 47 |
| १०. | उपमानं शब्दप्रमाणञ्च | 52 |
| ११. | संशयलक्षणादारभ्य कर्मनिरूपणान्तम् | 57 |
| १२. | सामान्यनिरूपणात् अवशिष्टो भागः | 62 |
| १३. | शाब्दबोधप्रक्रिया - १ | 68 |
| १४. | शाब्दबोधप्रक्रिया - २ | 74 |
| | परिशिष्टम् | 79 |

# १ न्यायदर्शनपरिचयः परम्परा च

**दर्शनशब्दार्थविचारः**

प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रक्षणे) ल्युट्-प्रत्यये कृते दर्शन-शब्दो निष्पद्यते ।

किं नाम दर्शनम् ? इति चेत् उच्चते दृश्यते ज्ञायते परमतत्त्वम् अनेन इति दर्शनम् । येन साधनेन इदं विश्वं, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च तद् दर्शनम् ।

जगति केचन जनाः **विज्ञानासक्ताः** । ते लौकिकप्रपञ्चे आनन्देन जीवितुमिच्छिन्ति । तत्रैव नूतनाविष्कारान् कुर्वन्तः जीवनं सफलं कर्तुं यतन्ते । विज्ञानमार्गतः भिन्नः दर्शनतत्त्वज्ञानमार्गः । अयं मार्गः साधकानां साधनभूमिः । सहस्राधिकवर्षेभ्योऽपि मार्गद्वयेऽपि भारतीयाः ऋषयः संशोधनं कृत्वा स्वाविष्कृतान् अंशान् श्रुतिस्मृत्यादिषु प्रकटतिवन्तः। तत्र हि दिव्यचक्षुषो महर्षयः स्वीयया तपः परिपूतया चिन्तनसरण्या निखिलपदार्थजातं करतलामलकवत् साक्षात्कृतवन्तः । ततश्च जगतः जटिलानपि संप्रश्नान् सरलयितुं, तथा च प्राणभृतां कल्याणाय दर्शनतत्त्वज्ञानमिदम् उपायनम् अन्वगृह्णन् ।

अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शन-शब्दान्तगतं भवति । किं ब्रह्म ? तस्य किं स्वरूपम्? क ईश्वरः ? के तस्य प्राप्तेरुपायाः ? अस्मिन् जगति किं शाश्वतं तत्त्वम् ? इयं सृष्टिः कुत आबभूव ? जीवात्मनः किं स्वरूपम् ? कः पुनर्जायते ? किं लिङ्गशरीरम् ? जीवस्य कुत उद्भूतिः ? किं तस्य लक्ष्यम् ? कथं मोक्षावाप्तिः ? आत्मा चेतनोऽचेतनो वा ? कः सृष्टेः कर्ता ? किं जीवनस्य कर्तव्यम् ? कश्च जीवनस्य साधिष्ठः पन्थाः ? इत्यादयोऽनुयोगा यत्र सुसूक्ष्मेण रूपेण विविच्यन्ते तद् दर्शनम् । दृश्यते निगूढतमं प्रपञ्चस्य रहस्यादिकं समाधानपूर्वकम् अनेन अर्थात् दर्शनशास्त्रेण इति दर्शनम्। सूक्ष्मेक्षिकया तत्त्वार्थदर्शनमेव दर्शनम् इत्यवगन्तव्यम् ।

**प्राचीनन्यापरम्परा**

**'निःश्रेयसाधिगतिरत्र तु षोडशानां,**
**ज्ञानात् प्रमाणमिह वेत्ति चतुष्टयं यः ।**
**ईशो जगत् सृजति यस्य मते स्वतन्त्रो,**
**न्यायप्रवर्तकमहामुनये नमोऽस्मै ॥'**

अस्य न्यायदर्शनस्य न्यायशास्त्रस्य वा जन्मदातृत्वेन श्रीमहर्षिः गौतम एव अस्ति आदिप्रवर्तकः । अतः महर्षिगौतमस्य न्यायसूत्रात् एव न्यायदर्शनस्य प्राचीनपरमपरा आरभ्यते ।

एतेषां न्यायदर्शनम् - न्यायशास्त्रम्, आन्वीक्षिकी, हेतुशास्त्रम्, हेतुविद्या, तर्कशास्त्रम्, तर्कविद्या, वादविद्या, प्रमाणशास्त्रम्, वाकोवाक्यम्, तर्कमीमांसा आदि भिन्नं भिन्नं नामानि प्राचीन न्यायपरम्परानुसारं सन्ति । न्यायदर्शनस्य परम्पराद्वयमस्ति । यथा प्राचीनन्यायपरम्परा तथा नव्यन्यायपरम्परा इति । तत्र नव्यन्यायपरम्परा प्रमाणप्रधान एवं च प्राचीन न्यायपरम्परा प्रमेयप्रधानस्ति प्रसिद्धम् । महर्षिगौतमाचार्यत् आरभ्य गङ्गेषोपाध्यायपूर्वकालपर्यन्तं प्रमेयप्रधानं प्राचीनन्यापरमपरा रूपेण ज्ञायते । प्राचीनन्यायपरम्परायाः भाषा सरला एवं पदार्थविवेचनं स्थूलं भवति ।

दर्शनेऽस्मिन् पदार्थानां तत्त्वज्ञानेन निःश्रेयस-सिद्धिः भवतीति अभ्युपगम्यते । तत्रापि षोडशपदार्थानां प्रमेयत्वमभ्युपगम्यते। तेषां षोडशानां नामानि यथा-प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् यथार्थज्ञानात् वा निःश्रेयसाधिगमः इति एतेषां राद्धान्तः ।

नीयते, प्राप्यतेऽयनं-मोक्षो, येनासौ न्यायः । अथवा नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः । अस्य न्यायदर्शनस्य आदिप्रवर्तकः न्यायसूत्रकारः महर्षिः गौतमः इति प्रसिद्धः । सूत्रात्मकेऽस्मिन् न्यायदर्शने पञ्च अध्यायाः सन्ति । प्रत्येकस्मिन् अध्याये आह्निकद्वमिति कृत्वा आहत्य दश आह्निकाः सन्ति । तत्र चतुरशीति (८४) प्रकरणानि सन्ति। अष्टाविंशत्यधिकपञ्चशतं (५२८) सूत्राणि सन्ति । इदमेव न्यायदर्शनम् आन्वीक्षिकीविद्याशब्देनापि प्रोच्यते । न्यायस्तु प्राग्दर्शितव्युत्पत्तिदिशा बन्धननिवृत्तिरूपः सिद्धयति । एवं स्थिते न्यायदर्शनविषये इदं प्राचीनाचार्यपरम्परा कथनमपि साधु सङ्गच्छते ।

**नव्यन्यायपरम्परा**

गङ्गेशोपाध्यायः तत्त्वचिन्तामणिग्रन्थस्य कर्ता, 'तत्त्वचिन्तामणिः' द्वादशशताब्द्याः नव्यन्यायपरम्परायाः प्रथमो प्रमुखः ग्रन्थः, तथा च नव्यन्यायस्य कृते विप्रसाहित्यप्रदानेन आधारशीलेव चकास्ति । महर्षिगौतमेन विरचितस्य प्रमाणप्रमेयेत्यादिषोडश-पदार्थप्रतिपादकस्य पञ्चाध्यायस्वरूपस्यास्य न्यायदर्शनस्य प्रमाणस्वरूपं केवलमेकमेवांशमादाय श्रीगङ्गेशोपाध्यायः चिन्तामणिग्रन्थ महानिबन्धभूतं विरचितवान् । स च चिन्तामणिग्रन्थः चतुर्षु भागेषु चास्ति विभाजनतां गतः । अत्र गङ्गेशोपाध्यायः न्यायसूत्रकारैः प्रदर्शितं प्रमाणचतुष्टयमवलमव्य एकैकस्य कृतेऽपि एकैकः खण्डः विभाज्य विस्तारः कृतः । प्रत्यक्षखण्डः, अनुमानखण्डः, उपमानखण्डः, शब्दखण्डश्चेति । तत्र प्रत्यक्षौ द्वादश, अनुमाने सप्तदश, उपमाने च एकः शब्दे परं षोडश इत्यं ४६ वादविषयाः सुनिरूपिताः । ईदृशानां विषयाणां निरूपणेन ग्रन्थोऽयं लोकप्रियः समभूत् । तत एव सर्वत्र ग्रन्थस्यास्य अध्ययनाध्यापनादिकं समारब्धम् । एतस्य नव्यन्यापरम्परायाः प्रौढग्रन्थस्य कारणेनैव गङ्गेशोपाध्यायात् पूर्वविरचितानां बहूनां प्राचीनन्यायपरम्परायाः प्राचीनन्यायग्रन्थानाम् अध्ययनमेव प्रतिहतमभवत् ।

**गङ्गेशोपाध्यायस्य देशनिर्णयः**

गङ्गेशोपाध्यायः इति प्रसिद्धः अयं मैथिलब्राह्मणः आसीत् । अद्यतनबिहारप्रान्ते दरभङ्गानगरस्य कमलानदीतीरस्थे करीवोता नामक ग्रामे जनिमघात् । अन्ये केचन मिथिलानतर्गतं छादनग्रामम् अस्य जन्मस्थानत्वेन कीर्तयन्ति । यतो हि दरभङ्गानगरे प्रायः २५० वर्षं यावत् अस्य तत्त्वचिन्तामणिग्रन्थरत्नस्य एकाध्ययनकेन्द्रमासीत् । पुनश्च गङ्गेशोपाध्यायः खलु चास्ति मिथिलाप्रान्तान्तर्वति-'मधुवनी' जिला निकटवर्ति 'मङ्गरोनी', ग्रामनिवासी आसीत् । अस्य 'मङ्गरोनी' ग्रामस्य प्राचीनं नाम 'मङ्गलवनी' आसीत् ।

**गङ्गेशोपाध्यायस्य कालनिर्णयः**

गङ्गेशोपाध्यायस्य कालनिर्णयविषये प्रो. कीथ, प्रो. सतीशचन्द्र विद्याभूषण, एच.पी. शास्त्री, दिनेशचन्द्र भट्टाचार्यः, रामानुजताताचार्यः एवमन्ये च अनेके विद्वांसः विस्तृतां चर्चाम् अकुर्वन् । तत्र क्रीस्तीय द्वादशशताब्दीमेव अस्य गङ्गेशोपाध्यायस्य कालत्वेन अद्यापि अनकेषु ग्रन्थेषु एष एव समयः उल्लिखितः दृश्यते । परन्तु प्रो. दिनेशचन्द्रभट्टाचार्यादयः बहुविधं प्रमाणादिप्रदानपुरस्सरं क्रीस्तीय १३५० इति निर्दिश्य एतत् पूर्वापरयोः काले एव इति निश्चयं कुर्वन्ति । अनेन च चतुर्दशशततमशताब्दीरिति निश्चेतुं शक्यते ।

अत्रेदं ग्राह्यं यत् गङ्गेशोपाध्यायात् पूर्वं मणिकण–हरिनाथादयः क्रिस्तीये १३२५ समये आसन् । अनेन तत्त्वचिन्तामणिकारस्य कालः तदानन्तरीक एव भवेदिति ज्ञायते । ग्रन्थकारस्यास्य सर्वप्रथमनिर्देशं मैथिलविद्वान् वेङ्कटेश्वरोपाध्यायः क्रिस्तीय १३७५ समये करोति । अत्र गङ्गेशोपाध्यायस्य स्वविरचिततत्त्वचिन्तामणिग्रन्थेन जन्मतिथिः, जन्मकालः वा द्वादशशताब्द्याः अन्तिमो भागात्मकः कालः निश्चियते ।

**श्रीवर्धमानोपाध्यायः**

श्रीवर्धमानोपाध्यायः गङ्गेशोपाध्यायस्य पुत्रोस्तथा शिष्यः आसीत् । तद्यथा श्रीवर्धमानोपाध्यायः स्वग्रन्थस्य न्यायनिबन्धप्रकाशस्यान्ते–

'न्यायाम्भोजपतङ्गाय मीमांसापारदर्शिने ।

गङ्गेश्वराय गुरवे पित्रेऽथ भवते नमः ॥'

एतेन सुस्पष्टमिदं विज्ञायते यद् श्रीवर्धमानोपाध्यायस्य निमित्तकारणीभूतो जन्मदाता श्रीगङ्गेशोपाध्याय एवासीत् । पुनश्च जन्मदातात्वेन पितासीत्, विद्यादातातेन गुरुरपि चेति विज्ञेयम् । तत्र नव्यन्यायपरम्परानुसारेण अस्य वर्धमानापाध्यायस्य जन्मकालः १३ शताब्दी प्रमाणत्वेन सुनिश्चिता वर्तते इत्यत्र नास्ति कोऽपि विचिकित्सावसरः । श्रीवर्धमानोपाध्यायविनिर्मिताः सन्तीमे ग्रन्थाः यथा–

(१) न्यायनिबन्धप्रकाशः

(२) न्यायपरिशिष्टप्रकाशः ।

(३) अन्वीक्षानय/तत्वबोधः

**श्रीवासुदेवसार्वभौमः**

श्रीवासुदेवसार्वभौमः खलु विलक्षणः नैयायिकः आसीत् । बङ्गालदेशनिवासी अस्य जन्मकालः षोडशशताब्दीति ज्ञायते । अस्य श्रीसार्वभौमस्य नव्यन्यायपरम्परायां नैयायिकत्वविषये चास्ति श्रीरघुनाथशिरोमणिरेव प्रमाणम् । अस्य श्रीसार्वभौमस्य श्रीरघुनाथमणिः प्रधानभूतः शिष्यः आसीत् इति ज्ञायते । तत्त्वचिन्तामणिव्याख्या श्रीवासुदेवसार्वभौमस्य नवद्वीपस्य सर्वश्रेष्ठः षुः प्रथमो ग्रन्थः आसीत् । ग्रन्थेऽस्मिन् श्रीसार्वभौमस्य स्वीयं स्वतन्त्रं मतं प्रायोऽधिकांशतः उपलभ्यते। इत्थञ्चास्य श्रीवासुदेवसार्वभौमस्य पाण्डित्यं वैदुष्यं वा लोकोत्तरत्वेन वैलक्षण्यमादधान आसीत् इत्यत्र नास्ति लेशतोऽपि सन्देहस्यावसरः । अस्य श्रीवासुदेवसार्वभौमस्य रघुनाथशिरोमणिवत् अनेके शिष्याः समभूवन् ।

**श्रीरघुनाथशिरोमणिः**

तार्किकशिरोमणिः, श्रीरघुनाथः नव्यन्यायपरम्परायां महतिं प्रसिद्धिं लभते।

नव्यन्यायस्य मूलभूत ग्रन्थस्य 'तत्त्वचिन्तामणेः' दीधिति' नाम्नी टीका दृश्यते। इम्मेव टीकामाश्रित्य गादाधरी, जागदीशी निर्मिता अभूत् ।

**तर्कसंग्रहदीपिकापरिचयः**

अथेदं प्रस्तूयते दीपिकाख्यटीकाग्रन्थस्य व्याख्याग्रन्थस्य च संवलितस्य 'तर्कसंग्रह' इति सुविदितनामधेयस्य न्यायवैशेषिकदर्शनयोः प्रवेशाय प्राथमिकस्य प्रकरणग्रन्थस्य श्रीमदन्नमभट्टेन न्यायविद्यारसिकानां पुरतः । विदितमेतत् शास्त्रेषु

अधीतानां यत् सकलेषु भारतीयदर्शनेषु महती अस्ति परम्परा न्यायदर्शनस्य । अस्यामेव परम्परायां न्यायसिद्धान्तमुक्तावली तर्कभाषादिग्रन्थत आरभ्य नव्यन्यायग्रन्थाः न्यायभाष्यवार्तिकतात्पर्यटीकापरिशुद्धिप्रभृतयः किरणावली-न्यायमञ्जरी-न्यायलीलावतीप्रभृतयश्च प्राचीनन्यायवैशेषिकग्रन्थाः स्वगुणपरिमाणाः सर्वतः प्रसारमासाद्य भूरिश उपकारान् शास्त्रीयजगति विदधतीति न तिरोहितं विदुषाम् । तथापि तेषां ग्रन्थानां सुकुमारमतीनां बालजनानां दुःखगमतामाकलय्य श्रीमदन्नमभट्टः तर्कसंग्रहनामकं न्यायवैशेषिकाश्रितं ग्रन्थं प्रणिनाय । तदुपरि च स्वयं मूलकारः श्रीमानन्नमभट्टः प्राचीनन्यायपरमपरासरण्या दीपिकाभिदां व्याख्यां टीकां वा व्यरचयत् ।

तर्कसंग्रहो हि व्याख्येयग्रन्थः दीपिका च व्याख्याग्रन्थः, व्याख्येयव्याख्याग्रन्थयोश्च समानविषयत्वं सर्वसम्मतम् । अतः तर्कशास्त्रप्रतिपाद्याः तर्कसंग्रहप्रतिपाद्याः वा न्यायशास्त्रप्रतिपाद्याश्च अर्थाः अभिन्नाः, तेषामेव सुखावबोधार्थमुभयोः व्याख्येयव्याख्याग्रन्थयोरवतारः ।

'तर्कसंग्रह' इत्यत्र तर्कशब्दः तर्कशास्त्रप्रतिपाद्यपरः तर्कानुग्राह्यपरो वा । तर्क्यन्ते प्रमितिविषयीक्रियन्ते इति तर्काः द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाः सप्तपदार्थास्तेषां प्रतिपाद्यभूतविषयाणां सम्यक् प्रकारेण ग्रहः ग्रहणं निश्चयात्मकं ज्ञानं यस्मादसौ तर्कसंग्रहः । संग्रहशब्दश्च सम्यक्ग्रहसाधानपरः । तथा च तर्कसंग्रहो नाम तर्कानुगृहीतप्रमाणैः परिच्छिन्नानां तर्कशास्त्रप्रतिपाद्यानां बोधकः संक्षिप्तः शब्दसमूहः । तमेवाधिकृत्य सुधिया श्रीमदन्नमभट्टेन दीपिकानामा व्याखयाग्रन्थः टीकाग्रन्थः वा विरचितः । यथोक्तं तदुपक्रमे तेनैव-

**''विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।**

**टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ॥'' इति ।**

तत्र भगवान् तर्कसंग्रहप्रणेता श्रीमदन्नमभट्टो नाम्ना दाक्षिणात्य इति स्पष्टमेव । यद्यप्यसौ जात्या दाक्षिणात्यो ब्राह्मणः आसीत् तथापि दक्षिण-भारतात् वाराणसीमागत्य स्व-कर्म-भूमित्वेन ज्ञान-नगरीमेव स्वीकृतवान् । तत्रैव भारतीय-दर्शनशास्त्रस्य अद्वितीयः प्रतिनिधिरसौ उदयनाचार्यकृतन्यायकुसुमाञ्जलेः प्रेरणां प्राप्य जिज्ञासूनां सुखबोधाय तर्कसंग्रहनामकं लघुप्रकरणग्रन्थं रचितवान् । अतः काश्यामागत्य अन्नमभट्टः अधीतवानिति '**काशीगमनमात्रेण नान्नमभट्टायते द्विजः**' इति लोकोक्त्या विज्ञायते ।

तर्कशास्त्र-पारंगतोऽसौ उदयनाचार्यस्य समकालीनः आसीत् । उदयनाचार्यस्य समयः क्रिस्ताब्दस्य दशमशताब्द्याः मध्यकालः स्वीकृतोऽस्ति । अतः स एव समयः अन्नमभट्टस्यापि सिद्धो भवति ।

नव्यन्यायपरम्परानुसारेण तत्र मुख्यत्वेन परम्परायाः क्रमविशेषोऽत्रपस्थाप्यते ।

गङ्गेशोपाध्यायः तत्त्वचिन्तामणिग्रन्थस्य कर्ता । अयं ग्रन्थो नव्यन्यायपरम्परायाः प्रसिद्धः तथा महत्त्वपूर्णः ग्रन्थः अस्ति । ततः वर्धमानोपाध्यायः न्यायनिबन्धप्रकाशग्रन्थस्य कर्ता अस्ति ।

तदनन्तरं वासुदेवसार्वभौमः तत्त्वचिन्तामणिव्याख्याग्रन्थस्य कर्ता अस्ति । ततःपश्चात् रघुनाथशिरोमणिः तत्त्वचिन्तामणिदीधितिटीकायाः कतृरुपेण प्रसिद्धः । तथैव विश्वनाथः न्यायसूत्रवृत्तिग्रन्थं आरचयत।

ततश्च श्रीमन्नंभट्टः स्व-मौलिकग्रन्थस्य तर्कसंग्रहदीपिकाख्यस्य व्याख्यात्मकग्रन्थस्य कतृरुपेण सुप्रसिद्धः अस्ति । इत्येवं नव्यन्यायपरम्परायाः मुख्यः ग्रन्थो क्रमो विज्ञेयः ।

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) प्रेक्षणार्थकाद् ................ धातोः ग्रहणं भवति । (गम्, दृश्, प्रेक्ष)

(२) परमतत्त्वं ............... शास्त्रेण ज्ञायते । (व्याकरण, पुराण, दर्शन)

(३) आस्तिकदर्शनानि ............. सन्ति । (पञ्च, षट्, चत्वारि)

(४) गौतमः ............. दर्शनस्य प्रवर्तकः । (न्याय, सांखय, मीमांसा)

(५) न्यायदर्शनं ............ दर्शनं भवति । (नास्तिक, आस्तिक, न किमपि)

(६) नीयते अनेन इति ............ । (साखयम्, न्यायः, वेदान्तः)

(७) तर्कसंग्रहदीपिकायाः कर्ता ............ अस्ति । (श्रीमदन्नमभट्ट, गौतम, केशवमिका)

(८) सर्वविद्यानां प्रदीपः ............... अस्ति । (मीमांसा, न्यायः, वेदान्तः)

(९) तत्त्वचिन्तामणिकारस्य नाम .............. अस्ति । (गङ्गेशोपाध्यायः, कणादः, गौतमः)

(१०) वर्धमानोपाध्यायः ............... पुत्रोऽस्ति । (गुङ्गेशोपाध्यायस्य, गौतमस्य, अन्नंभट्टस्य)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) किं नाम दर्शनम्?

(२) नव्यप्राच्ययोः को भेदः?

(३) नव्यपरम्परा कस्मादारभते?

(४) न्यायदर्शनस्य भाष्यकारः कोऽस्ति?

(५) कति न्यायपरम्परा अस्ति के च ते?

(६) आन्वीक्षिकी इति कस्य दर्शनस्य नाम?

(७) अन्नंभट्टस्य मूलग्रन्थस्य नाम किम्?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) कथं दर्शनशब्दो निष्पद्यते?

(२) दर्शनहेतवः के?

(३) तर्कसङ्ग्रह शब्दस्य कोऽर्थः?

(४) कथं न्यायशब्दो निष्पद्यते?

(५) नव्यन्यायपरम्परायाः आचार्याणां नामानि लिखत ।

**४. टिप्पणीः लिखत ।**

(१) तत्त्वचिन्तामणिः ।

(२) तर्कसंग्रहदीपिका ।

(३) षोडशपदार्थाः ।

**५. निबन्धात्मकमुत्तरं लिखत ।**

(१) वर्धमानोपाध्यायः ।

(२) गङ्गेशोपाध्यायः ।

(३) श्रीमदन्नंभट्टः ।

•

| २ | मङ्गलाचरणात् अभावनिरूपणं यावत् |
|---|---|

**मङ्गलपद्यम् ( तर्कसंग्रहदीपिका )**

**विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।**
**टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ॥**

न्यायदर्शनस्य पदार्थानां प्रतिपादनार्थं प्राथमिकस्तरे केचन ग्रन्थाः प्रकरण-प्रवेश-ग्रन्थरूपेण सर्वोत्कृष्टाः सन्ति । ते च तर्कभाषा, तर्कामृतम्, तर्कसंग्रहाख्याः ग्रन्थाः । तेषु अत्युत्तमः परमादरणीयः सरलः सुस्पष्टः ग्रन्थः तर्कसंग्रह एव । ग्रन्थस्यास्य प्रणेता श्रीमदन्नंभट्टः । तर्कसंग्रहाधारिताः अधिकाधिकाः विस्तररूपाः चतुर्विशंति (२४) टीकाः समुपलभ्यन्ते। तासु टीकासु 'तर्कसंग्रहदीपिका' टीका स्वतः अन्नंभट्टेनैव विलिखितेति विशेषः ।

सर्वप्रथमं श्रीमदन्नंभट्टः विश्वेश्वरं साम्बमूर्तिं प्रणम्य दीपिका-टीकायाः प्रारम्भं करोति ।

**दीपिका**

अम्बया, पार्वत्या सहिता मूर्तिर्यस्या असौ साम्बमूर्तिः तं साम्बमूर्तिम् अर्द्धनारीश्वरं, गिरां गुरुम्, निखिलविद्यानामुपदेष्टारम्, विश्वेषाम् ईश्वरः विश्वेश्वरः तं जगन्नियन्तारं, विश्वनाथं प्रणिपत्य-प्रणम्य, शिशुभ्यो हितां शिशुहितां-बालोपकारिकाम्, तर्कसंग्रहस्य, दीपिकेव - तर्कसंग्रहदीपिका, तां तर्कसंग्रहदीपिकां टीकां - विवृतिम्, कुर्वे - अहम् अन्नंभट्टो विदधे । अत्र द्वितीयान्तम् अतः गिरां-वाणीं, गुरुं - स्वगुरुञ्च नत्वेत्यर्थोऽपि समभवति । परन्तु अत्र साम्प्रदायिकः पाठः गिरं गुरुम् इत्येव साधु ।

**सरलार्थः**

अन्नंभट्टः कथयति यद्, अहम् अन्नंभट्टः अर्द्धनारीश्वरं साम्बमूर्तिं तथा च निखिलविद्यानाम् उपदेष्टारं गुरुदेवं, जगन्नियन्तारं विश्वेश्वरं विश्वनाथं प्रणम्य, शिशुभ्यो हितां बालोपकारिकां तर्कसंग्रहस्य दीपिकाटीकां विदधे इति श्लोकार्थः।

**मूलम्**

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।**
**बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥**

**दीपिका**

**चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमित-श्रुतिबोधितकर्तव्यताकमिष्टदेवता-नमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं ग्रन्थादौ प्रतिजानीते-निधायेति ।**

**ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति, मङ्गले कृतेऽपि कादम्बर्यादौ निर्विघ्नपरिसमाप्त्यदर्शनात्, मङ्गलाभावेऽपि किरणावल्यादौ समाप्तिदर्शनादन्वयव्यतिरेकव्यभिचारादिति चेन्न, कादम्बर्यादौ विघ्नबाहुल्यात्समाप्त्यभावः, किरणावल्यादौ तु ग्रन्थाद्बहिरेव मङ्गलं कृतमतो न व्यभिचारः ।**

**ननु मङ्गलस्य कर्तव्यत्वे किं प्रमाणमिति चेन्न, शिष्टाचारानुमितश्रुतिरेव प्रमाणत्वात्, 'समाप्तिकामो मङ्गलमाचरेत' इति श्रुतेः, तथाहि - 'मङ्गलं वेदबोधितकर्तव्यताकम्' अलौकिकाविगीतशिष्टाचारविषयत्वात्, दर्शादिवत् । भोजनादौ व्यभिचारवारणायालौकिकेति, रात्रिश्राद्धादौ व्यभिचारवारणायाविगीतेति, शिष्टपदं स्पष्टार्थम् । न कुर्यान्निष्फलं कर्मेति जलताडनादेरपि निषिद्धत्वादिति ।**

**तर्क्यन्ते प्रतिपाद्यन्त इति तर्का:- द्रव्यादिसप्तपदार्थास्तेषां संग्रह: - संक्षेपेण स्वरूपकथनं क्रियते इत्यर्थ: । कस्मै प्रयोजनायेत्यत आह सुखबोधायेति । सुखेन - अनायासेन, बोध: - पदार्थज्ञानं तस्मात् इत्यर्थ: ।**

**ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वग्रन्थ: क्रियते ? इत्यत आह बालानामिति । तेषामतिविस्तृतत्वात् बालानां तत: सुखेन बोधो न भवतीत्यर्थ। ग्रहणधारणपटुर्बाल:, न तु स्तनन्धय: । किं कृत्वा क्रियत इत्यत आह - निधायेति। 'विश्वेशं' जगन्नियन्तारं शिवं हृदि 'निधाय'-नितरां स्थापयित्वा सर्वदा तद्ध्यानपरो भूत्वेत्यर्थ: । 'गुरुणां'-विद्यागुरुणां, 'वन्दनं' - नमस्कारं, विधाय कृत्वेत्यर्थ: ।**

**सरलार्थ:**

ग्रन्थादौ कृतस्य मङ्गलस्य तन्निबन्धनस्य च साफल्यम् अत्र दर्शयति । कर्त्तुमिष्ट: चिकीर्षित:, तस्य तर्कसंग्रहग्रन्थस्य निर्विघ्नसमाप्तिरूपफलाय इत्यर्थ: । शिष्टानाम् आप्तानां च आचार:, तेन अनुमिता या श्रुति: अर्थात् समाप्तिकामो मङ्गलमाचारेत् इति । स्वेष्टदेवस्य विश्वेश्वरं नमस्काररूपं मङ्गलम् । तर्कसंग्रहग्रन्थादौ निर्विघ्नन्, पदार्थसंग्रहं शिष्यावधानाय तन्निरूपणविषयां प्रतिज्ञां कुरुते ।

ननु मङ्गलस्य परिसमाप्तिं प्रति हेतुतैव नास्ति, तस्माद् मङ्गलाचारणं न कर्तव्यम् इति चेद् न । तत्र उदयनाचार्यकृता किरणावलीनुसारं 'यत्सत्त्वे यत्सत्त्वम्', 'दण्डसत्वे घटसत्वं' इति अन्वयसहचार: 'यदभावे यदभावे:' 'दण्डाभावे घटाभाव:' इति अनयो: व्यतिरेकसहचार:निश्चयाद् दण्डे घटकाटणत्वनिश्चय: तथा मङ्गले 'मङ्गलसत्त्वे समाप्तिसत्वंम् इति' मङ्गलसहचारनिश्चयाभावान्न समाप्तिसाधनतेत्याशय: ।

तत्र कादम्बर्यादौ बलवत्तरस्य वा मङ्गलस्यैव समाप्तिहेतुतायां विघ्नबाहुल्यात् समाप्ते: अभाव:, पुनश्च किरणावल्यां ग्रन्थाद् बहिरेव मङ्गलकृतमिति कल्पनात् तत्र ग्रन्थान्तरेषु नास्तिकादिषु वा जन्मान्तरीयमङ्गलकल्पनामात्रेण न व्यभिचार: इत्याशय: ।

मङ्गलस्य किं प्रयोजनमित्याशङ्कते । मङ्गलाचरणं कर्तव्यमिचित्यत्र 'समप्तिकामो मङ्गलचारेत' इति श्रुतिस्तत्र प्रमाणम् । तथा शिष्टाचरणम् अपि अर्थात् वेदानुमतकर्मानुष्ठानवत्वम् । य: निर्विघ्नग्रन्थपरिसमाप्तिमिच्छति स एव मङ्गलं करोति ग्रन्थसमाप्तिरूपफलकत्वात् इत्यनुमानरुपप्रमाणान्तरसत्त्वमपि सूचितम् । 'न कुर्यान्निष्फलं कर्मेति' अत्र धर्मशास्त्रनिषिद्धत्वात् जलताडनादौ व्यभिचारवारणाय शिष्टपदं देयम् इति सरलोऽर्थ: ।

- **पदार्थलक्षणम्**

**मूलम् - द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा: सप्तपदार्था: ।**

**दीपिका - पदार्थान्विभजते - द्रव्येति । 'पदस्यार्थ: पदार्थ' इति व्युत्पत्त्याऽभिधेयत्वं पदार्थसामान्यलक्षणमिति लभ्यते।**

**नन्वत्र विभागादेव सप्तत्वे लब्धे 'सप्त' ग्रहणं किमर्थमिति चेन्न अधिकसंख्याव्यवच्छेदार्थत्वात् ।**

**नन्वतिरिक्त: पदार्थ: - प्रमितो न वा ? नाद्य:, प्रमितस्य निषेधाऽयोगात्, नान्त्य:, प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न, पदार्थत्वं द्रव्यादिसप्तान्यतमत्व्याप्यमिति व्यवच्छेदार्थत्वात् ।**

**ननु सप्तान्यतमत्वं-सप्तभिन्नभिन्नत्वम्, एवं च सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वं कथमिति चेन्न । द्रव्यादिसप्तान्यतमत्वं- द्रव्यादिभेदसप्तकाभाववत्त्वमिति तदर्थत्वात् ।**

**सरलार्थ:** – पदस्य अर्थ: पदार्थ इति पदार्थस्य लक्षणम् । अत्र व्युत्पत्त्या अभिधेयत्वम् पदार्थसामान्यलक्षणमिति लभ्यते। अर्थात् इन्द्रियानुभवयोग्य:, ज्ञेय: अभिधेयो वा य: स अर्थ: । तस्मात् पदार्थ इत्यनेन पदसम्बन्धाभिधाविषयत्वेस्य लाभोऽपि, पदसम्बन्धित्वांशस्य अव्यावर्तकत्वात् अभिधेयत्वमात्रं पदार्थलक्षणम् ।

वैशेषिकनये षट् भावपदार्था, एकश्च अभावपदार्थ इति सप्तपदार्थाः स्वीकृताः । तथा चोक्तं मूलग्रन्थे तर्कसंग्रहे – द्रव्य – गुण – कर्म – सामान्य – विशेष – समवाय – अभावाः सप्त एव पदार्थाः पुनश्च न्यायसिद्धान्तमुक्तावल्यामुक्तं यथा।

'द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।

समवायस्तथाऽभावः पदार्थाः सप्तकीर्तिताः ॥'

नव्यन्यायमते एते एव सप्तपदार्थाः अङ्गीकृताः, प्राचीनन्याये तु प्रमाणप्रमेयादयः यथा पूर्वमुक्तं षोडशपदार्थाः स्वीकृताः। एते षोडशपदार्थाः सप्तपदार्थेष्वेव अन्तर्भवन्तीति च तत्र सप्त एव पदार्थाः इति नवीनानाम् अभिप्रायः ।

अभिधेयत्वम् अर्थात् शब्दशक्यत्वम् । तत्र अधिकसंख्याव्यवच्छेदः च सप्त इति पदात् सिद्ध्यति । न तत्र अष्टत्व-नवत्वादिग्रहणम् अधिकसंख्याव्यवच्छेदात् । अत्र आशंक्य दर्शयति यद् अतिरिक्तपदार्थत्वेन प्रमाविषयः प्रसिद्धो न वा ? यदि अतिरिक्तः प्रमाणसिद्धः, तर्हि तस्य निषेधः सर्वथा न युक्तो भवति।

सप्तभिन्नभिन्नेति द्रव्यादयः सप्त एव पदार्थाः । अन्यतमत्वम् अन्यथा व्याचष्टे । अर्थात् द्रव्यं न, गुणो न, कर्म न, इत्यादिभेदानां प्रत्येकं प्रसिद्धानां सप्तानां कुत्रापि असत्त्वदर्शनात् यथा द्रव्ये-द्रव्यं नेति भेदस्य, गुणे-गुणो नेति भेदस्य, कर्मादौ कर्म नेत्यादिभेदानां च असम्भवात्, इत्यर्थः। एवञ्च द्रव्यादिषु सप्तसु परस्परं प्रत्येकभेदस्य परस्परं प्रसिद्धत्वेऽपि भेदसप्तकसमूहस्य कुत्रापि अविद्यमानत्वात् तस्य अभावस्य सर्वत्र समुपलभ्यते। अनया रीत्या सप्तभिन्नभिन्नत्वं सिद्ध्यति।

**पदार्थाः सप्तकीर्तिताः**

↓

| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
|---|---|---|---|---|---|---|
| द्रव्यम् | गुणः | कर्म | सामान्यम् | विशेषः | समवायः | अभावः |

**मूलम् – तत्र द्रव्याणि – पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ॥**

**दीपिका– द्रव्यं विभजते – तत्रेति । तत्र – द्रव्यादिमध्ये, द्रव्याणि नवैवेत्यन्वयः । कानि तानीत्यत आह– पृथिवीत्यादि।**

**ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नवैव द्रव्याणि ? तथा हि–**

**'तमः खलु चलं नीलं परापरविभागवत् ।**

**प्रसिद्धद्रव्यवैधर्म्यात् नवभ्यो भेत्तुमर्हति ॥'**

**नीलं तमश्चलतीत्यबाधितप्रतीतिबलान्नीलरुपाधारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धम् । तत्र तमसो नाकाशादिपञ्चकेऽन्तर्भावो. रुपवत्त्वात् अत एव न वायौ, स्पर्शाभावात्, सदागतिमत्त्वाभावच्च, नापि तेजसि भास्वररुपाभावादुष्ण स्पर्शाभावाच्चा, नापि जले, शीतस्पर्शाभावान्नीलरुपाश्रयत्वाच्चा, नापि पृथिव्यां गन्धवत्त्वाभावात्स्पर्शरहितत्वाच्च, तस्मात्तमो दशमद्रव्यमिति चेन्न, तमस्तेजोऽभावरुपत्वात् च, तथा हि–**

**तमो हि न रुपिद्रव्यं–आलोकासहकृतचक्षुग्राह्यत्वात्, तस्मात्प्रौढप्रकाशकतेजः सामान्याभावस्तमः, तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः, – अतो नव द्रव्याणीति सिद्धम् ।**

**सरलार्थः** – तत्र नव द्रव्याणि । कानि च तानि इति अतः आह–पृथिवीत्यादि । अर्थात् पृथिव्यादिनव अन्यतमत्वव्याप्यमित्यर्थः करणीयः । यथा – पृथिवी – अप् – तेज – वायु – आकाश – काल – दिक् – आत्मा – मन इति नव । तत्र तमसो दशमद्रव्यत्वे युक्तिं प्रदर्शयन्ति मीमांसकाः–

'तम: खलु चलं नीलम्' इत्यनेन ।

तम: चलनक्रियाश्रय तथा प्रसिद्धम् । पुनश्च नीलगुणशालि इति । अपि च परत्वादिगुणवत् इति यावत् । गन्धादिशून्यतया प्रसिद्धनवद्रव्येषु नान्तर्भुतम् । नवभ्यो द्रव्येभ्यो भेदमर्हति । अत: दशमद्रव्यत्वेन तम एव स्वीकार्य: । अर्थात् तत्र तमसो आकाश-काल-दिगात्म-मनस्सु पञ्चसु न अन्तर्भाव: नीलरुपगुणववात् । तमसो न वायो अन्तर्भाव:। वायौ समवायेन स्पर्शो वर्त्तते, तमसि च स्पर्शो, नास्तीत्यर्थ: । पुनश्च वायुर्हि सर्वदा गतिमान्, न चैवं तम: सदा गच्छति अत: वायौ न तमस: अन्तर्भाव: इत्याशय: । तमसो न तेजसि अन्तर्भाव: । तत्र तमसि भास्वररूपस्य उष्णस्पर्शस्य अभावात् । तमसो जलेऽपि नान्तर्भाव: । शीतस्पर्शाभावात्, नीलरूपवत्त्वाच्च। नापि तमसो पृथिव्यामन्तर्भाव: । तत्र गन्धवत्त्वाभावात्, स्पर्शरहितत्वाच्चेत्यर्थ: । अत एव तम: नवभ्य: पृथक् दशमं द्रव्यमिति मीमांसका: कल्पयन्ति तदत्र नैयाचिका:। तमसो तत्र केवलं तेजोऽभावरूपत्वेन ग्रहणं भवेत् चेदपि पर्याप्तम् स्वीकुर्वन्ति। तत्र तमसि चलत्वं नीलरुपवत्वं च। पर्याप्तम् । तत्र तमसि चलत्वं नीलरुपवत्वं च कल्पना भ्रम मात्रम् । अत: तद् भ्रान्तिजनकमेव । तत्र रूपिद्रव्यं चाक्षुषत्वावच्छिन्नं प्रत्यालोकस्य कारणताया: कल्पनामात्रत्वात् तम: प्रत्यक्षे चालोकापेक्षाविरहादिति सरलार्थ: । रूपि द्रव्यभिन्नत्वात्,

तत्र सामान्यतया, तेजसोऽभावरुपं एव तम: इत्युच्यते । तत्र 'नीलं तमश्चलतीति ज्ञानं' भ्रान्तिजनकेभ्। तथा च-

'आलोकाभाव एवेदं तमो न तु द्रव्यमपिति । नीलक्रियाप्रतीतिस्तु भ्रान्तिरेवेति मन्यताम् ।' अत: नव द्रव्याणीति सिद्धम् ।

**नव द्रव्याणि**

↓

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| पृथिवी | आप: | तेज: | वायु: | आकाशम् | काल: | दिक् | आत्मा | मन: |

- **द्रव्यसामान्यलक्षणम्, दोषत्रयलक्षणानि ।**

**दीपिका - द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम् ।**

**सरलार्थ:** - द्रव्यत्वजातिमत्त्वं इति द्रव्यसामान्यलक्षणम् । तत्तद् द्रव्यमिति स्वीकरणीयम् । तत्र घटत्व-पटत्वादे: न्यूनवृत्तितयाऽवच्छेदकत्वासम्भवात्, सत्ताजाते: अपि अधिकदेशवृत्तितया न कारणतावच्छेदकत्वमिति विभागादि समवायिकारणताया: अवच्छेदको धर्मो द्रव्यत्वमेव इत्याशय: ।

अत्र पुन: गुणत्वमित्यस्य क आशय:, इत्याशंक्योच्यते - तत्र लक्षणस्य द्रव्यत्वजातिमत्त्वस्य द्रव्यत्वरुपता, लक्ष्यतावच्छेदकस्यापि द्रव्यत्वरुपते लक्षणलक्ष्यतावच्छेदकयो: अभेदात् एतत् लक्षणं न युक्तमिति उकत्वा तत्र दोषत्रयरहितत्वज्ञानाधीनतया एव लक्षणं स्वीकरणीयमिति सरलार्थ: ।

- **दोषत्रयलक्षणानि**

**दीपिका - लक्ष्यैकदेशावृत्तित्वमव्याप्ति: । यथा गो: कपिलत्वम् । अलक्ष्यवृत्तित्वमतिव्याप्ति: । यथा- गो: शृङ्गित्वम् । लक्ष्यमात्रावर्तनमसम्भव: । यथा-गोरेकशफवत्वम् । एतत् दूषणत्रयरहितो धर्मो लक्षणम् । यथा- गो: सास्नादिमत्वम् । स एवासाधारणधर्म इत्यच्यते ।**

**सरलार्थ:** - तत्र त्रय: दोषा: वर्तन्ते । यथा-

(१) अव्याप्ति: (२) अतिव्याप्ति: (३) असम्भव:

**'अव्याप्तिदोष:'**

**लक्षणम्** - लक्ष्यैकदेशावृत्तित्वम् अव्याप्तिदोष: । यथा- कपिलत्वं गो: लक्षणमित्युक्तम् । अर्थात् कपिलवर्णा या सा एव गौ: इत्यर्थ: । गावस्तु न मात्रं कपिलवर्णा एव अपि तु कृष्णादिवर्णयुक्ता: भवन्ति । इदं लक्षणं काश्चन गा: लक्षयति, पुन: काश्चन गा: न लक्षयति, अत्र गो: कपिलत्वस्य लक्ष्यस्य च एकदेशावृत्तत्वात् इदम् अव्याप्तिदोषयुक्तं लक्षणम् ।

**अतिव्याप्तिदोषः**

लक्ष्यवृत्तित्वे अति अलक्ष्यवृत्तित्वम्। यथा - श्रृङ्गित्वम् लक्ष्या गौः, लक्षणं श्रृङ्गित्वम्। अत्र लक्षणं श्रृङ्गिच लक्ष्यभूत गोसमुदायेषु अलक्ष्यभूत महिषादावपि वर्तमानत्वात् अयं दोषः सम्भवति।

**'असम्भवदोषः'**

**लक्षणम्** - लक्ष्यमात्राऽवृत्तित्वम् असम्भवत्वम् । यथा- एकशफवत्वं गोः लक्षणमिति । अर्थात् एकशफयुक्ता या सा गौः इति । किन्तु गवि न कदापि एकशफवत्वं सम्भवति तस्मात् इदं लक्षणम् असम्भवदोषयुक्तम् । तदेव हि लक्षणं यद् दोषत्रयशून्यम् । यथा- गोः लक्षणं भवति, 'सास्नादिमत्त्वम्' ।

अत्र लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वरुपं साधारणं, तद्विपरीतमसाधारणत्वं लक्ष्यमात्रवृत्तित्वात् । अतः सास्नादिमत्वं गोत्वामिति गोः लक्षणं स एवासाधारणधर्म इत्युच्यते ।

- **लक्षणस्य लक्षणम्**

असाधारणधर्मो लक्षणस्य लक्षणम् । अर्थात् लक्ष्यमात्रवृत्तिधर्मः असाधारणधर्मः । अतः यो धर्मः मात्रं लक्ष्ये एव वर्तते नान्यत्र, सः धर्मः असाधारणधर्मः । यथा-गन्धवत्वं पृथिव्याः लक्षणम् । तस्मात् दोषत्रयशून्यमेव लक्षणम् ।

**दीपिका - लक्ष्यतावच्छेदक-समनियतत्वमसाधारणत्वम्, व्यावर्तकस्यैव लक्षणत्वे व्यावृत्तावभिधेयत्वादौ अतिव्याप्तिवारणाय 'तद्भिन्नत्वं' धर्मविशेषणं देयम्, व्यवहारस्यापि लक्षणप्रयोजनत्वे तु न देयम्, व्यावृत्तेरपि व्यवहारसाधनत्वात् ।**

**ननु गुणवत्वं न द्रव्यसामान्यलक्षणम्, आद्यक्षणे उत्पन्नविनष्टद्रव्ये चाव्याप्ते रिति चेन्न, गुणसामानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात् । नन्वेवमप्येकं रुपं रसात्पृथगिति व्यवहाराद् रुपादौ अतिव्याप्तिरितिचेन्न, एकार्थसमवायादेव व्यवहारोपपत्तौ गुणे गुणानङ्गीकारात् ।**

**सरलार्थः** - समनियतत्वञ्च व्याप्यत्वे सति व्यापकत्वम्, लक्ष्यतावच्छेदकव्यापकत्वे सति, लक्ष्यतावच्छेदकव्याप्यत्वमसाधारणत्वमिति । तदेव लक्षणमित्याशयः । इतरभेदानुमितिजनकस्य सास्नादिमत्त्वरुपस्य हेतोरेव, न तु इतरभेदस्य । व्यावृत्तिभिन्नत्वमभिधेयत्वभिन्नत्वञ्च लक्षणस्य लक्षणे निवेश्यमित्यर्थः ।

अतः वृत्त्यादिभिन्त्वे सति लक्ष्यतावच्छेदकसमनियतत्वं लक्षणलक्षणं बोध्यम् । व्यवहारसाधनत्वात् व्यावृत्तेरपि गोलक्षणत्वम् इष्टम् इत्याशयः ।

उत्पन्नं द्रव्यं क्षणमगुणं निर्ष्क्रियञ्च तिष्ठति, तत्र गुणवत्त्वस्य अभावे नाव्याप्तिरित्यर्थः । गुणाधिकरणवृत्तिः या सत्ता भिन्ना जातिः तद्वत्वंच द्रव्यलक्षणत्वाद् इत्यर्थः । समयेनैव गुणे गुणानङ्गीकारादित्यर्थः । तस्मात् गुणसमानाधिकरणसत्ताभिन्नजातिः द्रव्यत्वजातिरेव, नातिव्याप्तिः ॥

- **गुणकर्मसामान्यविशेषसमवायाभावानां लक्षणानि**

**मूलम् - रूप-रस-गन्ध-स्पर्श-संखया-परिमाण-पृथकत्व-संयोग-विभाग-परत्वाऽपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द- बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माऽधर्म-संस्काराश्च चतुर्विंशतिर्गुणाः ॥**

**दीपिका - गुणं विभजते - रुपेति । द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः, गुणत्वजातिमान्वा । लघुत्व - मृदुत्व - कठिनत्वादीनां विद्यमानत्वात् कथं चतुर्विंशतिर्गुणा इति चेन्न, लघुत्वस्य गुरुत्वाभावरुपत्वात्, मृदुत्व-कठिनत्वयोः अवयवसंयोगविशेषरूपत्वात् ।**

**सरलार्थः** - तत्र चतुर्विंशतिर्गुणाः सन्ति । यथा- रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथकत्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म-संस्काराः चतुर्विंशतिर्गुणाः।

द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं गुणसामान्यलक्षणम् । अत्र सामान्यकत्वस्य द्रव्यादौ अपि सत्त्वात् अतिव्याप्तिः। अतः कर्मभिन्नत्वं विशेषणम् । अत्र द्रव्यकर्मभिन्नत्वविशिष्टसामान्यवान् गुण एव नान्य इति गुण पदं निरर्थकं न । तस्य लक्ष्यप्रदर्शनार्थकत्वात् इत्येवम् । पुनश्च लक्षणान्तरे गुणत्वजातिमान् इति आह - अत्र गुणागुणेतर व्यावृत्ताः यदि स्यात् तर्हि न समीचिनम् । अत्र केवलं गुणकर्मजातिसिद्धिः च द्रव्यकर्मभिन्ने सामान्ये ग्रहणं भवति ।

अत्र चतुर्विशंतिगुणाः कथमिति शंका न करणीया यथा कल्पनासु अन्तर्भावात् नातिरिक्तस्य लघुत्वस्य कल्पनमावश्यकमित्याशयः । पुनश्च संयोग एव अन्तर्भावात् नातिरिक्तगुणकल्पनप्रसङ्गः

**मूलम् - उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चकर्माणि ॥**

**दीपिका - कर्म विभजते - उत्क्षेपणेति । संयोगभिन्नत्वे सति संयोगसमवायिकारणं कर्म, - कर्मत्वजातिमद्वा । ननु भ्रमणादेरतिरिक्तस्य कर्मणः सत्वात् पञ्चेत्यनुपपन्नमिति चेन्न, भ्रमणादीनामपि गमनेऽन्तर्भावान्न-पञ्चत्वविरोधः ।**

**सरलार्थः** - तत्र पञ्च कर्माणि सन्ति । यथा- उत्क्षेपणम् - अपक्षेपणम् - आकुञ्चनम् - प्रसारणम् - गमनम् इत्येतानि पञ्चकर्माणि ।

अत्र संयोगसमवायिकारणे द्रव्ये अतिव्याप्तिवारणाय असमवायिकारणमिति बोध्यम् । अन्यच्च लाघवादयाह- कर्मत्वजातिमद् वा इति । पुनः भ्रमणस्य अतिरिक्तकर्मग्रहणं नैव भवति । भ्रमणस्य गमनेऽन्तर्भावत्वात् तत्र पञ्चैव कर्माणि इति ।

- **पञ्चकर्माणि**

(संयोगाभिन्नत्वे सति संयोगसमवायिकारणं कर्म, कर्मत्वजातिमद् वा कर्म लक्षणम्)

१. उत्क्षेपणम् । (उर्ध्वदेशसंयोगहेतुः)
२. अपक्षेपणम् । (अधोदेशसंयोगहेतुः)
३. आकुञ्चनम् । (शरीरस्यसंयोगहेतुः)
४. प्रसारणम् । (विप्रकृष्टदेशसंयोग हेतुः)
५. गमनम् । (अन्यत्सर्वम्)

**मूलम् - परमपरं चेति द्विविधं सामान्यम् ॥**

**दीपिका - सामान्यं विभजते परमिति । परम्, अधिकदेशवृत्ति, अपरं न्यूनदेशवृत्ति । सामान्यादि चतुष्टये जातिनास्ति।**

**सरलार्थः** - तत्र सामान्यं द्विविधम् । परसामान्यम् अपरसामान्यं चे ति। अधिकदेशवृत्तित्वं परत्वम् । न्यूनदेशवृत्तित्वम् अपरत्वम् । अर्थात् द्रव्यादीनां सत्ताऽपेक्षयान्यूनदेशवृत्तितयाऽपरत्वं, घटत्वाद्यपेक्षयाऽधिकदेशवृत्तितयो परत्वमिति बोध्यम् ।

**सामान्यं द्विविधम्**
↓

| ↓ | ↓ |
|---|---|
| परसामान्यम्, | अपरसामान्यम् |
| (अधिकदेशवृत्तित्वम्) | (न्यूनदेशवृत्तित्वम्) |

**मूलम् - नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ॥**

**दीपिका - विशेषं विभजते - नित्येति । पृथिव्यादि चतुष्टयस्य परमाणवः, आकाशादिपञ्चकं च - नित्यद्रव्याणि ।**

**सरलार्थः** - व्यावर्तकाः अनन्ताः वा विशेषाः । परमाणवः नाम पृथिवी-आप-तेज-वायुरूपाणां चतुर्विधानां भौतिकद्रव्याणाम् अन्त्यावयवरूपा इत्याशयः । आकाश-काल-दिक्-आत्म-मनांसि च नित्य द्रव्याणि । तेषु प्रत्यकं पृथक् पृथक् वर्तमानाः, तेषां परस्परभेदसाधकाश्च विशेषा इत्यर्थः ।

**मूलम् - समवायस्त्वेक एव ॥**

**दीपिका - समवायस्य भेदो नास्तीत्याह- समवायस्तित्वति ।**

**सरलार्थः** - तत्र समवायस्य भेदो नास्ति । समवायः एक एव ।

**मूलम् - अभावश्चतुर्विधः - प्रागभावः, प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ॥**

**दीपिका - अभावं विभजते - अभाव इति ।**

**सरलार्थः** - अभावः च चतुर्विधः । यथा - प्रागभावः, प्रध्वंसाभावः अन्योन्याभावः, अत्यन्ताभावश्चेति ।

अभावः प्राधान्येन द्विविधः, संसर्गाभाव अन्योन्याभावश्चेति । तत्र संसर्गाभावः पुनः त्रिविधः प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावश्चेति ।

**अभावः चतुर्विधः**

↓

संसर्गाभावः — अन्योन्यायभाावः

संसर्गाभावः ↓

प्रागभावः (घटो भविष्यति इति प्रतीति गोचरः)

प्रध्वंसाभावः (घटो ध्वस्तः इति प्रतीति गोचरः)

अत्यन्ताभावः (घटो नास्ति इति प्रतीति गोचरः)

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) अम्बा इति ............. । (पार्वती, लक्ष्मी, राधा)

(२) पदार्थाः ........... सन्ति । (पञ्च, सप्त, नव)

(३) पदस्य अर्थः ............. भवति । (द्रव्यम्, गुणः, पदार्थः)

(४) प्राचीनन्यायमते पदार्थाः .......... सन्ति । (एकादशः, दशः, षोऽशः)

(५) द्रव्याणि ............. सन्ति । (दश, नव, अष्ट)

(६) तेजसोऽभावरूपः ............ अस्ति । (तमः, वायुः, कालः)

(७) गुणाः ........... सन्ति । (चतुर्विंशतिः, सप्तदशः, त्रयः)

(८) दोषाः .......... सन्ति । (पञ्च, त्रयः, षट्)

(९) कर्माणि .......... सन्ति । (एकम्, पञ्च, नव)

(१०) सामान्यं ........... विद्यम् । (द्वि, त्रि, पञ्च)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) अभावः कतिविधः ?

(२) विशेषस्य लक्षणं किम् ?

(३) कति समवायः ?

(४) उत्क्षेपणस्य लक्षणं किम् ?

(५) गुणस्य लक्षणं किम् ?

(६) लक्षणस्य लक्षणं किम् ?

(७) अव्याप्तेः लक्षणं किम् ?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) के दोषाः सन्ति ?

(२) गुणाः के सन्ति ?

(३) द्रव्याणि कानि ?

(४) कर्मणो लक्षणं किम् ?

(५) परमाणवः के ?

**४. टिप्पणीः लखत ।**

(१) अतिव्याप्तिदोषः ।

(२) कर्म ।

(३) नित्यद्रव्याणि ।

**५. निबन्धात्मकमुत्तरं लिखत ।**

(१) दीपिकायाः मङ्गलपद्यम् ।

(२) तमोवादः ।

(३) पदार्थलक्षणम् ।

●

# ३ पृथिवीनिरूपणात् वायुनिरूपणं यावत्

**पृथिव्याः लक्षणम्**

**मूलम् - तत्र गन्धवती पृथिवी ॥**

**दीपिका - तत्र उद्देशक्रमानुसारेण प्रथमं पृथिव्या लक्षणमाह-गन्धवतीति ।**

**नाम्ना पदार्थसङ्कीर्तनमुद्देशः, उद्देशक्रमे च सर्वत्रेच्छैव नियामिका ।**

**सरलार्थः** - तत्र पृथिव्यादीनां द्रव्याणां नामोल्लेखतक्रमेणत्रिविधा चास्य ग्रन्थस्य प्रवृत्तिः । यथा (१) उद्देशः, (२) लक्षणम् (३) परीक्षा येति । तत्र उद्देशस्तु नाममात्रेण वस्तुसङ्कीतनम् । अर्थात् तत्र पदार्थानां भवतु अथवा द्रव्याणां भवतु क्रमेण येषां नामोल्लेखनं भवति, तदेव उद्देशो क्रमः यथा द्रव्यं गुण, पृथिव्यादीनाम् ।

**यथा - असाधारणधर्मवचनम् । तत्र गन्धवत्वं पृथिव्याः लक्षणम् ।**

**परीक्षा यथा - लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा । परितः ईक्षणं च परीक्षा वा । समीक्षारुपा एषा परीक्षा अवान्तरभेदादिनिरूपण स्वरूपा च । अतः क्रमेण पृथिव्याः लक्षणम् आदौ आह इति आशयः ।**

**दीपिका - ननु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्वादादव्याप्तिः, न च तत्र गन्धप्रतीत्यनुपपत्तिरिति वाच्यम्, अवयवगन्धस्यैव तत्र भानसम्भवेन चित्रगन्धानङ्गीकारात् ।**

**किञ्च उत्पन्नविनष्टघटादावव्याप्तिरिति चेन्न, गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्वस्य विवक्षितत्वात् ।**

**ननु जलादावपि गन्धप्रतीतेरतिव्याप्तिरिति चेन्न, अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र भानाङ्गीकारात् ।**

**ननु तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां तत्रातिव्याप्तिरिति चेन्न, सर्वाधारताप्रयोजकसम्बन्धभिन्नसम्बन्धेन लक्षणस्याभिमतत्वात् ।**

**सरलार्थः** - अत्र पृथिवी लक्षणस्य अव्याप्तिमाशङ्कते तद्यथा सुगन्ध-दुर्गन्धयोः घट-पटादौ द्रव्ये परस्परविरोधेन अवयविनि घटादौ गन्धानुत्पादात् विरुद्धगन्धारब्धे पटादौ गन्धभानन्तु प्रत्यक्षसिद्धमेव । तत्र अवयवगन्धः, तदाश्रयः - कपालादौ अवयवः, समवायेन वर्तमानत्वं गटादौ अवयविनि इति समन्वयः । अतः विरुद्धगन्धवत् आरब्धविचित्रगन्धस्य एवञ्च तादृशे घटे गन्धाभावाद् गन्धवत्त्वरुपपृथिवीलक्षणस्य अव्याप्तिरिति आशयः ।

अतः गन्धाधिकरणवृत्ति - द्रव्यत्वव्याप्यजातिमत्त्वं पृथिव्याः फलितलक्षणम् । तत्र उत्पन्नविनष्टादौ तादृशपुष्पादिवृत्तिः पृथिवीत्वजातेः सत्त्वात् लक्षणसमन्वयः, गन्धसमानाधिकरणत्वात् । सत्ताजातिमादाय जलादौ अतिव्याप्तिवारणाय द्रव्यत्वापरेति बोध्यः । तथैव जातिमत्त्वात् जले नातिव्याप्तिः ।

पुनश्च जातिमत्त्वरूपपृथिवीलक्षणस्य जलादौ सत्त्वात् न तत्र अतिव्याप्तिदोषः । पृथिवीसम्बन्धसत्त्वे गन्थसत्त्वं, पृथिवीसम्बन्धाभावे गन्धाभावः इत्यन्वयव्यतिरेकौ, 'गन्धवती' इति प्रतीतिसिद्धाधेयता, न तु 'गुणवती' इति प्रतीतिसिद्धा। तादृश आधेयता निरूपिता अधिकरणत्वं तु पृथिव्यामेव वर्तते, न तु जलादाविति नातिव्याप्तिः ।

काले-गन्धनिष्ठाधेयता कालिकसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना । गुणगुणिनोः समवायात्, गन्धस्य पृथिवीगुणत्वात् । गन्धः न कालस्य गुणः । कालस्य सर्वाधारताप्रयोजकसम्बन्धः कालिकः एव । अतः समवाय-सम्बन्धावच्छिन्न-गन्धनिष्ठाधेयतानिरूपिताधिकरणत्वं पृथिव्यामेव वर्तते, न तु काल इति काले नातिव्याप्तिः ।

**मूलम् - सा-द्विविधा, नित्याऽनित्या च, नित्या-परमाणुरूपा, अनित्या-कार्यरुपा ।पुनस्त्रिविधा-शरीरेन्द्रियविषय-भेदात्। शरीरमस्मदादीनाम्, इन्द्रियं गन्धग्राहकं घ्राणं तच्च नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।**

**दीपिका - पृथिवीं विभजते - सा द्विविधेति । नित्यत्वं ध्वंसाप्रतियोगित्वं, ध्वंसप्रतियोगित्वम् - अनित्यत्वम् । प्रकारान्तरेण विभजते - पुनरिति ।आत्मनो भोगायतनं शरीरम्, यदवच्छिन्ने आत्मनि भोगो जायते तद्भोगायतनम्, सुखदुःखान्यतरसाक्षात्कारो भोगः ।शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः संयोगाश्रेयत्वम्-इन्द्रियत्वम् । शरीरेन्द्रियभिन्नो-विषयः । एवं च गन्धवच्छरीरं-पार्थिवशरीरम्, गन्धवदिन्द्रियं-पार्थिवेन्द्रियम्, गन्धवान् विषयः पार्थिवविषय इति तत्तलक्षणं बोध्यम् । पार्थिवं शरीरं दर्शयति - शरीरमिति । इन्द्रियं दर्शयति - इन्द्रियमिति । गन्धग्राहकमिति प्रयोजन-कथनम्, घ्राणमिति संज्ञा, नासाग्रेत्याश्रयोक्तिः, एव मुत्तरत्र ज्ञेयम् । पार्थिवविषयं दर्शयति मृत्पाषाणादिः ।**

**सरलार्थः** - सा पृथिवी द्विविधा इति । नित्या, अनित्या च । नित्यत्वम् अर्थात् ध्वंसरहितत्वम् । अनित्यत्वम् इत्युक्ते ध्वंसयुक्तम् ।अत्र नित्या पृथिवी परमाणुस्वरूपा, यथा 'परमाणुः ध्वस्त' इत्येवंपरमाणोः ध्वंसस्तु न प्रसिद्धः ।अनित्या पृथिवी कार्यरुपा अर्थात् 'घटो ध्वस्त' इत्यादि ।

शरीरावच्छिन्नः सुखदुःखादिकभोगः आत्मनि जायते ।आत्मनः भोगायतनं शरीरम् ।शब्दात् इतरे ये उद्भूतविशेषणाः, तदाश्रयत्वे सति ज्ञानस्य कारणं यो मनः संयोगः, तदाश्रयत्वमित्यर्थः । विशेषपदं, संयोगस्तु न विशेषगुण इति न दोषः ।

शरीरेन्द्रियभिन्नत्वं विषयत्वमिति भावः । गन्धवत्त्वस्य पृथिवीमात्रलक्षणत्वे च, पार्थिवशरीरलक्षणम् । गन्धग्राहकतयाणं प्रार्थिवेन्द्रियम् । गन्धवान् विषयः एव पार्थिवविषयः इति तत् लक्षणं ज्ञेयम् ।पार्थिवविषयरूपेण मृत्पाषाणादयः प्रसिद्धाः ।




- **अपां लक्षणम्**

**दीपिका - अपां लक्षणमाह - शीतेति । उत्पन्नविनष्टे जलेऽव्याप्तिवारणाय-शीतस्पर्शसमानाधिकरणद्रव्य-त्वापरजातिमत्वे तात्पर्यम् 'शीतं शिलातलम्' इत्यादौ जलसम्बन्धादेव शीतस्पर्शभानमिति नातिव्याप्तिः । अन्यत्सर्वं पूर्वरीत्या व्याखयेयम्॥**

**सरलार्थः** - अत्र लक्षणे - शीतस्पर्शसमानाधिकरणम् अर्थात् पृथिवीत्वादेः अतिव्याप्तिवारणायेति । पुनः सत्तामादाय पृथिव्यादौ अतिव्याप्तिवारणाय द्रव्यत्वापरेति युक्तम् । शीतं शीलातलम् इत्यनेन चन्दनं शीतलमित्यादेः परिग्रहः ।

नित्या आपः परमाणुरुपा अर्थात् ध्वंसरहिता इति । अनित्या आपः कार्यरुपा ध्वंसयुक्ता इति । जलीयशरीरं जलस्याधिष्ठाता वरुणलोकः इति प्रसिद्धः । शीतस्पर्शवत्त्वस्य जलमात्रलक्षणत्वे च जलीयशरीरलक्षणम् । रसग्राहकतया रसनं जिह्वायाः उपरिभागो जलीयेन्द्रियम् । शीतस्पर्शवत्वमिति विषयः जलीयविषयः इति तत् लक्षणं ज्ञेयम् । शरीरेन्द्रियभिन्नत्वं विषयत्वमिति भावः । जलीयविषयरुपेणसरित्सुमुद्रादयः प्रसिद्धाः ।

**जलम्**

↓

नित्यं (परमाणुरुपम्)　　　　अनित्यं (द्वयेणुकादि कार्यरुपम्)

↓

शरीरम् (अयोनिजमात्रम्)　　इन्द्रियम् (रसनेन्द्रियम्)　　विषयः (सिन्धुहिमकरा)

**जलीयगुणाः**

↓

| | | | | | |
|---|---|---|---|---|---|
| १. | रूपम् । | ६. | परिमाणम् । | ११. | अपरत्वम् । |
| २. | रसः । | ७. | पृथकत्वम् । | १२. | गुरुत्वम् । |
| ३. | स्पर्शः । | ८. | संयोगः । | १३. | द्रवत्वम् । |
| ४. | स्नेहः । | ९. | विभागः । | १४. | संस्कारः । – वेगाख्यः |
| ५. | संख्या । | १०. | परत्वम् । | | |

- **तेजसो लक्षणम्**

**मूलम् – उष्णस्पर्शवत्तेजः । तत् द्विविधं नित्यमनित्यञ्च, नित्यं परमाणुरुपम्, अनित्यं कार्यरूपम् । पुनस्त्रिविधम्, शरीरेन्द्रियविषयभेदात्, शरीरमादित्यलोके प्रसिद्धम् , इन्द्रियं रूपग्राहकं चक्षुः कृष्णाताराग्रवर्ति । विषयश्चतुर्विधः – भौमदिव्योदर्याकरजभेदात्, भौमं वह्न्यादिकम्, अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरुदर्यम्, आकरजं सुवर्णादि।**

**दीपिका – तेजसो लक्षणाह – उष्णस्पर्शवदिति । 'उष्णं जलम्' इति प्रतीतेस्तेजः संबन्धानुविद्यायित्वान्नातिव्याप्तिः। विषयं विभजते – भौमेति ।**

**ननु सुवर्णं पार्थिवम्, पीतत्वातगुरुत्वात्, हरिद्रावत् , इति चेन्न, अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन, जलमध्यस्थघृते द्रवत्वनाशदर्शनेन, असति प्रतिबन्धके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात् । सुवर्णस्य अत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रव्यत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः, तस्मात् पीतद्रव्य द्रवत्वनाशप्रतिबन्धकतया द्रव्यद्रव्यान्तरसिद्धौ – नैमित्तिक द्रवत्वाधिकरणतया जलत्वानुपपत्तेः, रुपतया वाय्वादिष्वनन्तर्भावात्- तैजसत्वसिद्धिः ।**

**तस्योष्णस्पर्शभास्वररूपयोपस्पष्टम्भकपार्थिवरूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धिः, तस्मात् 'सुवर्ण तैजस' मिति सिद्धम् ।**

**सरलार्थः** - उष्णस्पर्शवत् तेजः इति तेजसो लक्षणम् । तेजः समबन्धे उष्णत्वं, तेजः समबन्धाभावे उष्णत्वाभाव, इत्यन्वयव्यतिरेकानुविधायितयेत्यर्थः । अतः जले नातिव्याप्तिः ।

ननु सुवर्णे विजातीयं पीतत्वं स्वीक्रियत इति तन्न पाथिवत्वसाधकम् अतः उक्तं गुरुत्वात् इति । तत्र तैजसत्वाभावसाधकोऽयं हेतुः, तथा च सुवर्णे न तैजसं, गुरुत्वात् पाषाणवत् इति । प्रयोगः । अव्यन्तालसंयोगे द्रवत्वनाश अदर्शनात् उक्तम् अत्यन्तानलसंयोगः इति ।

पार्थिवद्रवत्वनाशं प्रति अग्निसंयोगः कारणम् इति कार्यकारणभावः । असति प्रतिबन्धक-सत्वात् जलमध्यस्थघृते अत्यन्तानलसंयोगेऽपि पार्थिवद्रव्यत्वनाश अदर्शनत्वं कार्यकारणभावस्य संभवति । तस्मात् सुवर्णस्य एव सिद्धिः । अन्वयव्यतिरेकात् कार्यकारणभावसिद्धौ भवति । अतः पीतद्रव्यत्वात् सुवर्णेऽत्यन्तानलसंयोगे सत्यपि द्रव्यत्वनाशादर्शनमिति। अत्यन्तानलसंयोगे सत्यव्यनुच्छिद्यमानद्रव्यत्वाधिकरणत्वे सति गुरुत्वात्, जलमध्यस्थधृतादिवत्, इति । एवञ्च द्रवद्रव्यान्तर सिद्धिः ।

तत्र नैमित्तिकत्वात्, जलस्य हि स्वाभाविकं द्रवत्वं, न नैमितिकं, सुवर्णे च अग्निसंयोगात् निमित्तकृतमेव द्रवत्वमिति सांसिद्धिकद्रवत्वाभावात् न तद् द्रव्यान्तरं जलं भवितुमर्हति, जले हि- 'सांसिद्धिकं द्रवत्वन्तु' तत्र स्वाभाविकद्रवत्वस्यैव अभ्युपगमात् इति भावः । एवञ्च न वाच्यादिकमिति परितोषात् तस्य तैजसत्वमिति आशयः । उष्णस्पर्शभास्वरूपयोः इत्यन्वयः, बलवत् पार्थिवरुपस्पर्शाभ्याम् अभिभवात् इति सरलार्थः । तस्मात् सुवर्णं तैजसत्वमिति सिद्धम् ।



● **वायुलक्षणम्**

**मूलम् - रूपरहितस्पर्शवान् - वायुः, स द्विविधः नित्योऽनित्यश्च, नित्यः - परमाणुरूपः ।अनित्यः - कार्यरूपः, पुनस्त्रिविधः - शरीरेन्द्रियविषयभेदात्, शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति, विषयो-वृक्षादिकमपनहेतुः, शरीरान्तः सञ्चारी वायुः प्राणः, स चैकोऽप्युपाधिभेदात् प्राणापानादि संज्ञां लभते ॥**

**दीपिका - वायुं निरूपयति - रूपरहितेति । आकाशादावतिव्याप्तिवारणाय 'स्पर्शवा' निति । पृथिव्यादावतिव्याप्तिवारणाय 'रूपरहिते' ति ।**

**ननु प्राणस्य कुत्रान्तर्भाव इत्यत आह- शरीरेति । स चेति । एक एव प्राणः स्थानभेदात् प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः ।**

**स्पर्शानुमेयो वायुः - तथा हि योऽयं वायौ वाति सति अनुष्णाशीतस्पर्शो भासते, स स्पर्शः क्वचिदाश्रितः, गुणत्वात्, रूपवत् । न चास्य पृथिवी आश्रयः, उद्भूतस्पर्शवतः पार्थिवस्योद्भूतरूपवत्त्वनियमात्, न जलतेजसोः, अनुष्णाशीत त्वात्। न विभुचतुष्टयम्, सर्वत्रोपलब्धिप्रसङ्गात् । न मनः, परमाणुस्पर्शस्यातीन्द्रियत्वात्, तस्मात् यः प्रतीयमानस्पर्शाश्रयः, स-वायुः।**

**ननु 'वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वात्, घटवत्' इति चेन्न, उद्भूतरूपवत्वस्योपाधित्वात्, यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षत्वं, तत्र उद्भूतरुपवत्त्वम् इति - घटादौ साध्यव्यापकत्वम् पक्षे साधनव्यापकत्वम् । न चैवं तप्तवारिस्थितेजसोऽप्रत्यक्षत्वापत्तिः, द्रष्टत्वात्, - तस्मात् रूपरहितत्वात् वायुरप्रत्यक्षः ।**

**सरलार्थः** - 'रूपरहितत्वे सति स्पर्शवत्त्वं' वायोर्लक्षणमित्यर्थः । तत्र स्पर्शत्वात् वायुरस्ति इति प्रमाणम् । पुनः वायुः नात्युष्णो नातिशीतंरच विजातीय इति यावत्। त्वगिन्द्रियेण एव अस्य प्रत्यक्षी क्रियते । उत्कृष्टस्पर्शशालिनः पार्थिवभागस्य इति । यो यो उद्भूतस्पर्शवान् पार्थिवभागः स उद्भूतरूपवान् , यथा शितलशिलातमिति न च व्याप्तिः । एवञ्च स्पर्शाश्रयोऽपि रूपशून्योऽयं न पृथिवीति सिद्धम् ।

पुनश्च जले शीतस्पर्शस्यैव, तेजसि उष्णस्पर्शस्यैव सत्त्वात्, अनुष्णशीतस्पर्शस्य जलतेजसोरसम्भवात् इत्याशयः । न आकाश-काल-दिगात्मकचतुष्टयम्, सर्वत्रोपलब्धिप्रसङ्गात् । न मनः, मनसोणुत्वात् गतस्पर्शस्य अपि प्रत्यक्षत्वप्रसङ्गत् इति सरलार्थः । अनुद्भूत स्पर्शाश्रयत्वस्य त्वगिन्द्रिये सत्त्वेऽपि तस्याप्रत्यक्षत्वात् व्यभिचारः अतः उक्तं प्रत्यक्षस्पर्शेति ।

साध्यव्यापकत्वे सति साधनाव्यापको हि उपाधिः, यथा- धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनसंयोगः उपाधिः । स हि यत्र यत्र धूमः तत्र आर्द्रेन्धनसंयोगः इति साध्यस्य धूमस्य व्यापकः, साधनस्य वह्नेः अव्यापकश्च अयोगोलके वह्निसत्वेऽपि आर्द्रेन्घसंयोगाभावात्, तथा प्रकृते - 'वायुः प्रत्यक्ष' इत्यादौ । बहिरिन्द्रियाजन्यप्रत्यक्षाविषयत्वं साध्यम्, उद्भूतस्पर्शाश्रयत्वं हेतुरिति उद्भूतरूपवत्त्वमुपाधिः । अतः साध्यव्यभिचारोन्नयनसम्भवान्न वायौ प्रत्यक्षत्वसिद्धिरिति भावः ।

अत्र रूपादौ गुणे द्रव्यत्वविरह इति न तमादाय साध्यव्यापकत्वहानिः इति आशयः । घटादिरूपपृथिव्यन्तर्भावेण, उद्भुतरूपत्त्वस्य स्पर्शाश्रयस्य प्रत्यक्षत्वानङ्गीकारे, तप्तवारीति उचितम् । उष्णजलगतान्निस्वरूपस्य तेजसः, उद्भूतस्पर्शवत्त्वेऽपि उद्भूतरूपवत्त्वाभावात् इति शेषः ।

**वायुः**

↓

नित्यं (परमाणुरूपः) | अनित्यं (कार्यरूपः)

अनित्यं (कार्यरूपः) ↓

- शरीरम् — अयोनिजप्रेतादि
- इन्द्रियम् — त्वक्
- विषयः — प्राणादिवायुना महावायुपर्यन्तम्

**वायवीयगुणाः**

↓

| | |
|---|---|
| → स्पर्शः । | → विभागः । |
| → संख्या । | → परत्वम् । |
| → परिमाणम् । | → अपरत्वम् । |
| → पृथक्त्वम् । | → वेगः । |
| → संयोगः । | |

**कार्यद्रव्याणाम् उत्पत्तिविनाशक्रमः ।**

**दीपिका- इदानीं कार्यरूपपृथिव्यादियतुष्टयस्योत्पत्तिविनाशक्रमः कथ्यते- ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते, ततः परमाणुद्वयसंयोगे सति द्वणुकमुत्पद्यते, त्रिभिद्दणुकैः - त्र्यणुकम्, एवं चतुरणुकादिक्रमेण महापृथिवी, महत्य आपः, महत् तेजः, महान्वायुः उत्पद्यते । एवमुत्पन्नस्य कार्यद्रव्यस्य सञ्जिहीर्षावशात् क्रियया परमाणुद्वयविभागे सति-द्वणुकस्य नाशः, ततस्त्र्यणुकस्य, तच्चतुरणुकस्य, - इत्येवं पृथिव्यादिनाशः ।**

**'असमवायिकारणनाशत् द्वणुकनाशः, समवायिकारणनाशाद् त्र्यणुकनाशः' इति सम्प्रदायः । सर्वत्र असमवायिकारणनाशाद् द्रव्यनाश इति- नवीनाः ।**

**किं पुनः परमाणुसद्भावे प्रमाणम् ? उच्यते, जालसूर्यमरीचिस्थं सूक्ष्मतमं यद् रजो दृश्यते तत्सावयवं, चाक्षुषद्रव्यत्वात्, पटवत् । त्र्यणुकावयवोऽपि सावयवः, महदारम्भकत्वात् तन्तुवत् । यो द्वणुकावयवः स एव परमाणुः, स च नित्यः, कार्यत्वेऽनवस्थाप्रङ्गत्, तथा च मेरुसर्षपयोरपि तुल्यपरिमाणोक्ते : ।**

**सृष्टिप्रलय सद्भावे धाता यथा पूर्वमकल्पयत् इति श्रुतिः प्रमाणम् । सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः, सर्वभावकार्यध्वंसो महाप्रलयः - इति विवेकः ।**

**सरलार्थः** - पृथिव्यादीनां विभागोऽनुचितः नित्यत्वात् इत्याशङ्कयाह इदानीमिति । कार्यरूपपृथिव्यादियतुष्टयस्य उत्पत्तिविनाशक्रमात् तत्र प्रथमतः सृष्ट्युत्पत्तिं कथ्यते । पृथिवी-जल-तेज-वायुनां नित्याऽनित्यभेदेन द्विविधं दर्शितम् । तेषु नित्यं सूक्ष्मभूतम् उपयुज्यते अनित्यं स्थूलभूतमिति । सूक्ष्मभूतं हि स्थूलभूतानां कारणम् । स्थूलभूतं कार्यरूपम् । स्वकारणेभ्यः एव उत्पत्तिः तदनु विनाशश्च । कार्यद्रव्याणामुत्पत्तिः द्वयणुकादिक्रमेण क्रियाविभागादिन्यायेन विनाशश्च । 'एकोऽहंबहुस्याम्' इत्येवं जगत्सृष्टिकारणेन संयोगानुकुला क्रिया, ततः, स्थूला घटादिरूपा पृथिवी उत्पद्यत इति सरलार्थः । अनया रीत्या कार्यद्रव्यस्य घटादेः संहारेच्छा ईश्वरस्येति भावः ।

यदा समस्तपरमाणुषु क्रिया जायते, तदा सजातीयपरमाणुद्वयस्य संयोग भवति । संयोगे सति कार्यरूप द्रणुकोत्पत्तिः, अर्थात् परमाणुद्वयसंयोगे द्वयणुकमुत्पद्यते ।

अत्र परमाणुद्वयासंयोगरूपाऽसमवायिकारणनाशात् द्वयणुकानाशः, न तु समवायिकारणपरमाणुनाशात्, परमाणूनां नित्यत्वादित्यर्थः । द्वयणुकरूपसमवायिकारणनाशात् त्र्यणुकनाशः, समवायिकारणस्य द्वयणुकस्यानित्यत्वादित्यर्थः इति प्राचीनमतम् । सर्वत्र असमवायिकारणनाशात् द्रव्यनाशः अर्थात् त्र्यणुकादेः अपि नाशः इति नवीनमतम् ।

**परमाणुसिद्धिः**

किं पुनः परमाणोः अस्तित्वे प्रमाणम् ? गवाक्षादितो गृहे सूर्यकिरणानि समागच्छन्ति, तेषु यत्सूक्ष्मं रजः दृश्यते तद् त्र्यणुकमस्ति । चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति द्रव्यत्वादित्यर्थः, तत्र रूपादौ व्यभिचारवारणाय इति । अत्र त्र्युणुके महत्त्वस्य चाक्षुषत्वसम्पत्त्यर्थम् आवश्यकस्य अवयवसंख्याजन्यतया तस्य सावयवत्वं विना असम्भवात् । द्वयणुकं महत्त्ववत् त्र्यणुकारम्भकत्वादित्यर्थः । इत्येवमनुमानेन द्वणुकस्यापि सावयवत्वे सिद्धे इति अर्थः । परमाणोः अनित्यत्वे वारं वारं पुनरवयवा इति रीत्या अनवस्था इति अर्थः ।

अनन्तावयवत्वस्योभयत्र तुल्यत्वादिति अर्थः । यत्र च विश्रामः एवास्माकं परमाणुः निश्चितः इत्याशयः ।

जगत्स्रष्टा प्रलयपूर्वजगत्सदृशम्, पृथिव्यादिकं निर्ममे अनयाश्रुत्या प्रलयसद्भावो दर्शितः । पृथिव्यादादिपरमाणूनां नित्यतया तद्गतरूपस्य अवान्तरप्रलयेऽपि सत्त्वेन तद्ध्वंसाभावात् द्रव्ये इत्युक्तम् । अर्थात् सर्वकार्यद्रव्यध्वंसः खण्डप्रलयः। सर्वपदार्थध्वंसः महाप्रलयः इति विविच्य याथातथ्येन प्रतिपादितम् ॥

**कारणम्**

↓

| ↓ | ↓ | ↓ |
|---|---|---|
| समवायिकारणम् | असमवायिकारणम् | निमित्तकारणम् |

**स्वाध्यायः**

**१. योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(१) उद्देशक्रमानुसारेण प्रथमं ............. लक्षणमाह । (जलस्य, पृथिव्याः, तेजसः)

(२) नाम्ना पदार्थसङ्कीर्तनम् .............. । (नियमः, भजनम्, उद्देशः)

(३) पृथिव्याः लक्षणं ........... । (गन्धः, स्पर्शम्, रसनाम्)

(४) ध्वंसाप्रतियोगित्वं ............... अस्ति । (अनित्यत्वम्, नित्यत्वम्, कार्यरुपम्)

(५) शिलातलं ............ अस्ति । (उष्णम्, स्पर्शम्, शीतम्)

(६) सरित्समुद्रादयः ............. विषयाः । (तेजसः, पृथिव्याः, जलस्य)

(७) सुवर्णं ............... इति सिद्धम् । (तैजसम्, जलीयम्, पार्थिवम्)

(८) रूपरहितः ............. अस्ति । (जलम्, वायुः, तेजः)

(९) परमाणुषु .......... जायते । (शब्दः, क्रिया, विनाशः)

(१०) त्रिभिद्वणुकैः .............. उत्पद्यते । (चतुरणुकम्, द्वणुकम्, त्र्यणुकम्)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) नित्यं किम् ?

(२) तेजसः लक्षणं किम् ?

(३) कार्यरुपा का ?

(४) अप्रत्यक्षः कः ?

(५) पृथिव्याः लक्षणं किम् ?

(६) द्वणुकस्य उत्पत्तिः कस्मात् जायते ?

(७) लक्षणं किम् ?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) प्रवृत्तिः काः ?

(२) द्रव्यत्वापरजातित्वे किं तात्पर्यम् ?

(३) विभुचतुष्ट्यं किम् ?

(४) उपाधिः का ?

(५) कार्यद्रव्याणि कानि ?

**४. टिप्पणीः लिखत ।**

(१) उद्देशः ।

(२) सुवर्णस्य तैजसत्वम् ।

(३) परमाणुसिद्धिः ।

**५. निबन्धात्मकमुत्तरं लिखत ।**

(१) भेदपुरस्सरं पृथिव्याः लक्षणं लिखत ।

(२) कार्यद्रव्याणाम् उत्पत्तिविनाशक्रमः ।

(३) अपां लक्षणम् ।

•

# ४ आकाशात् मनोनिरूपणं यावत्

**१. आकाशलक्षणम्**

**मूलम् - शब्दगुणकमाकाशम् । तच्चैकं, विभु, नित्यं च ॥**

**दीपिका - आकाशं लक्षयति - शब्दगुणकमिति । ननु किमाकाशं पृथिव्यादिवन्नाना ? नेत्याह - तच्चैकमिति । भेदे प्रमाणाभावादित्यर्थः । एकत्वादेव सर्वत्रोपलब्धेर्विभुत्वमङ्गीकर्तव्यमित्याह- विभ्विति । सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। मूर्तत्वं परिच्छिन्नपरिमाणा वत्त्वं, क्रियावत्त्वं वा । विभुत्वादेव आत्मवन्नित्यत्वमित्याह- नित्यं चेति ।**

**सरलार्थः** - अत्र शब्दगुणकमाकाशमिति आकाशस्य लक्षणम् उच्यते । शब्दस्य द्रव्यत्वभ्रमन्निरासाय गुणपदं युक्तमिति । एतेन आकाशे प्रमाणम् उपदर्शितम् । न च शब्दस्य द्रव्याश्रिततत्वमेव कुत इति चेत् वाच्यम् । शब्दो द्रव्याश्रितः, गुणत्वात् संयोगवत् इति अनुमानेन तत् सिद्धेः, ननु शब्दस्य गुणत्वे किं मानमिति चेत् उच्यते-शब्दो गुणः, चक्षुः ग्रहणायोग्य-बहिरिन्द्रियग्राह्यत्वजातिमत्त्वात्, स्पर्शवत् इत्यनुमानेन गुणत्वसिद्धिः । घटादौ व्यभिचारवारणाय चक्षुः ग्रहणायोग्येति आत्मनि व्यभिचारवारणाय बहिरिन्द्रियग्राह्य इति । रसत्त्वादिव्यावृत्तये जातिमत् इति अर्थः ।

तत्र आकाशस्य भेदे प्रमाणाभावः इत्याशयः । आकाशस्य एकत्वमात्रं, न विभुत्वप्रयोजकम् । तस्मात् सर्वत्र सम्बन्धित्वं तस्य विभुत्वे हेतु अन्तरम् । सर्वदिगवच्छेदेन उपलभ्यमानत्वम् इत्यर्थः,।

यदि सर्वत्रोपलब्धि एव विभुत्वे साधकं भवेत् तर्हि एकत्वादिति हेत्वन्तरस्य प्रयोजनं तत्र नास्ति । तथा न, धूलीपटलस्थपरमाण्वादीनां सर्वदिगवच्छेदेनोपलब्धेः, अतः तन्निरासाय तदावश्यकत्वात्, परमाणूनाम् अनेकत्वात् न विभुत्वमिति शेषः यदि गगनंस्यानेकत्वं स्यात तर्हि प्रयोजना भावेन गौरवं स्यात तेस्मात् लाघवात् गमनमेकमेव इति तात्पर्य विषयं मुलत्वं एकत्वम्। तत्र मूर्त्तद्रव्याणि अर्थात् पृथिव्यप्तेजोवायुमनांसि । अपकृष्टपरिमाणवत्त्वमित्यर्थः । क्रियाश्रयत्वस्य क्षित्यादिषु लाभात् आकाशस्य नित्यत्वमिति सरलार्थः ।

**२. काललक्षणम्**

**मूलम् - अतीतादिव्यहारहेतुः कालः । स चैको विभुर्नित्यश्च ।**

**दीपिका - कालं लक्षयति - अतीतेति । सर्वाधारः कालः, सर्वकार्यनिमित्तकारणञ्च ।**

**सरलार्थः** - तत्र अतीत-वर्त्तमान-भविष्यत्कालानां ग्रहणम् । अतीतत्वं-वर्त्तमानध्वंसप्रतियोगित्वम् । वर्त्तमानत्वम् अर्थात् घटः अस्ति इत्यादिशब्दप्रयोगाधिकरणकालवृत्तित्वम् । भविष्यत्वं नाम वर्त्तमानप्रागभावप्रतियोगित्वम् । इह घटोऽभूत्, घटो भविष्यति इत्यादि शब्दप्रयोगरुपव्यवहारं प्रति कालस्य कारणत्वात् अतीतादिव्यवहाराऽसाधारणकारणत्वं कालस्य लक्षणं उपपन्नम् । आकाशेऽतिव्याप्तिनिरासाय कारणपदेन निमित्तकारणं विचारणीयम् । कण्ठताल्वादि अभिघाते अतिव्याप्तिवारणाय विभुत्वमिति ग्रहणं सर्वाधारत्वात् । कालिकसम्बन्धेन इत्यादिः । तत्र समवायि-असमवायि-कारणभिन्नं निमित्तकारणमितितल्लक्षणम् ।

**३. दिग्लक्षणम्**

**मूलम् - प्राच्यादिव्यवहारहेतुर्दिक्, सा चैका, नित्या, विभ्वी च ।**

**दीपिका - दिशो लक्षणमाह- प्राचीति । दिगपि कार्यमात्रे निमित्तकारणम् ।**

**सरलार्थः** - उदयाचलसन्निहितदेशाद्यवच्छिन्ना या दिक् सा प्राची । उदयाचलाऽसन्निहितदेशावच्छिन्ना या दिक् सा प्रतीची । सुमेरुसन्निहितदेशावच्छिन्ना या दिक् सा उदीची । सुमेरुविप्रकृष्ट अवच्छिन्ना या दिक् सा अवाचीति सर्वत्र अपेक्षाभेदेन दिग्व्यवहारः। दिगपि कार्यमात्रसमये निमित्तकारणमिति ज्ञेयम् ।

४. आत्मालक्षणम्

**मूलम् - ज्ञानाधिकरणमात्मा, स द्विविधः - परमात्मा, जीवात्मा चेति । तत्रेश्वरः सर्वज्ञः परमात्मैक एव ।**

**दीपिका - आत्मनो लक्षणमाह - ज्ञानेति । आत्मानं विभजते - स द्विविध इति । परमात्मनो लक्षणमाह- तत्रेति । नित्यज्ञानाधिकरणत्वम्-ईश्वरत्वम् । नन्वीश्वरस्य सद्भावे किं प्रमाणम् ?, न तावत्प्रत्यक्षम्, तद्धि बाह्यं, आभ्यन्तरं वा ? नाद्यः, - अरुपिद्रव्यत्वात्, नान्त्यः, आत्मसुखादिव्यतिरिक्तत्वात्, नाप्यनुमानम्- लिङ्गाभावात्, नाप्यागमः, तथाविधागमाभावादिति चेन्न । क्षित्यङ्कुरादिकं कर्तृजन्यं, कार्यत्वात्, घटवत् इत्यनुमानस्य प्रमाणत्वात् । उपादानगोचरापरोक्षज्ञान-चिकीर्षा - कृतिमत्त्वं,- कर्तृत्वम्, उपादानं-समवायिकारणम्, सकलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वम् । यः सर्वज्ञ स सर्ववित् इत्यागमोऽपि तत्र प्रमाणम् ।**

**जीवस्य लक्षणमाह-जीवेति । सुखादिकं जीवलक्षर्णं, ननु मनुष्योऽहं ब्राह्मणोऽहमित्यादौ सर्वत्राहं प्रत्यये शरीरस्यैव विषयत्वावच्छिन्न शरीरमेवात्मेति चेन्न, शरीरस्य आत्मत्वकरपादादिनाशे शरीरनाशादात्मनोऽपि नाशापत्तेः, नापि इन्द्रियाणामात्मत्वम्, तथात्वे योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीत्यनुसन्धानाभावप्रसङ्गात्, अन्यानुभूतेऽन्यस्यानुसन्धानायोगात्, तस्मात् देहेन्द्रियव्यतिरिक्तो जीवः, सुखादिवैचित्र्यात् प्रतिशरीरं भिन्नः, स च न परमाणुपरिमाणः, शरीरव्यापिसुखाद्यनुपलब्धि प्रसङ्गात्, न मध्यमपरिमाणः, तथा सति अनित्यत्वप्रसङ्गेन कृतहानाऽकृताभ्यागमप्रसङ्गात्, तस्मान्नित्यो विभुर्जीवः ।**

**सरलार्थः** - ज्ञानाधिकरणमात्मा इति आत्मनो लक्षणम् । अधिकरणं नाम समवायेन नित्यज्ञानेच्छादिमान् इत्यर्थः । अत्राशङ्कते यत् ईश्वरस्य सद्भावे किं प्रमाणमिति ? न तावत् प्रत्यक्षप्रमाणम्, प्रत्यक्षप्रमाणं हि बहिरिन्द्रियजन्यत्वम् अथवा मानसप्रत्यक्षम्? रूपादिशून्यद्रव्यत्वात्, चाक्षुष-स्पार्शन-ध्राणजादि-भेदभिन्नस्य बाह्यप्रत्यक्षस्य रूप-रस-गन्धादिशून्ये अनङ्गीकारात् इति हेतुतया तद्रिहत ईश्वरस्य बाह्यप्रत्यक्षानुपपत्तिरित्यर्थः ।

आभ्यन्तरमपि न, मानसप्रत्यक्षम् ईश्वरे न सम्भवति इति । सुखदुःखादिरहितस्य ईश्वरस्य मानसप्रत्यक्ष अविषयत्वात्, सुखदुःखादेरेव मानसप्रत्यक्षविषयत्वादित्याशयः । अर्थात् मानसप्रत्यक्षकारणीभूत आत्मनः संयोगः, तत्समवायी-आत्मा, तत्समवेतत्वं-सुखे, न तावत् तत समवोयी ईश्वरः इति सरलार्थः । ईश्वरबोधकवेदाभावात्, शङ्का नास्ति अर्थात् चार्वाकमतं निरस्यति । कार्यसमवायिकारणविषयकप्रत्यक्षात्मकं यत् ज्ञानं, या च तादृशी चिकिर्षा, तादृशी च या कृतिः तद्वेत्त्वमित्यर्थः । ईश्वरस्य च, यः सर्वज्ञः इत्यादि श्रुतिबोधितं क्षित्यङ्कुरादिरुप-कार्य-समवायिकारण-सकलपरमाण्वादिसूक्ष मवस्तुविषयकप्रत्यक्ष-शालित्वम् ईश्वरस्येति भावः । अर्थात् सर्वविषयकविशेषज्ञानशालित्वमेव ग्राह्यम् । तत् य ईश्वर एव नान्यत् इत्याशयः।

अस्मच्छब्दजन्यप्रतीतौ, मनुष्यत्वादेः शरीरधर्मत्वात् शरीरं विषयीकृत्यैवात्र सर्वत्र अस्मच्छब्दप्रयोग इति भावः । शरीरघटकीभूत-हस्तचरणादिभङ्गे आत्मनोऽपि नाशप्रसङ्गः इति शास्त्राशयः ।

इन्द्रियाणामात्मत्वं न स्वीक्रियते । इन्द्रियाणां चक्षुरादीनामेवात्मत्वे, अनुसन्धानाऽभावे हेतुः तावत् अन्यः चक्षुषाऽनुभूते घटादौ, त्वगिन्द्रियादेः, सोऽहमित्यादि प्रत्यभिज्ञा, अर्थात् चक्षुषा दृष्टस्य त्वचा प्रत्यभिज्ञाप्रसङ्गात् ।

शरीरन्द्रियादीनामात्मत्वाऽसम्भवात्, भिन्नः प्रतिशरीरं सुखदुःखेच्छा-कृत्यादीनां विभिन्नत्वात् जीवात्मा च शरीरव्यापीति । शरीरादितुल्यपरिमाणः, शरीरतुल्यपरिमाणशालित्वे सति, मध्यमपरिमाणस्याऽनित्यत्वं प्रसिद्धमेव । यत् मध्यमपरिमाणं द्वणुकादि तदनित्यं, यथा घट इति व्याप्तेः ।

यागादिना निष्पादितस्य धर्मस्य नाशः, अनाचारितस्य प्राप्तिः । कर्त्तुः आत्मनः अन्यस्मिन् जन्मनि असत्त्वात् न्धा पूर्वजन्मकृतयागादिजन्यधर्मादेः वैयर्थ्यप्रसङ्गः, जातस्यात्मनो जन्मान्तरसम्बन्ध अभावेन कर्त्तुरपि भोक्तृत्वे अकृतपुण्यपाप-भोक्तृत्वापत्तेः आत्मनः अनित्यत्वं नोचितं, किन्तु निव्यत्वमेवेत्याशयः ।

**५. मनसो लक्षणम्**

**मूलम् - सुखाद्युपलब्धिसाधनमिन्द्रियं-मनः, तच्च प्रत्यात्मनियतत्वादनन्तं, परमाणुरूपं, नित्यं च ।**

**दीपिका - मनसो लक्षणमाह - सुखेति । स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम् । मनो विभजते तच्चेति । एकैकस्यात्मन एकैकं मन आवश्यकमितित्यात्मनामनेकत्वान्मनसामव्यनेकत्वमित्यर्थः । परमाणुरूपमिति । मध्यमपरिमाणवत्त्वेऽनित्यत्वप्रसङ्गादित्यर्थः ।**

**ननु मनो विभु, स्पर्शरहितद्रव्यत्वात्, आकाशादिवदिति चेन्न, मनसो विभुत्वे आत्मनः संयोगस्य असमवायिकारणस्याभावाज्ज्ञानानुत्पत्तिप्रसङ्गात्, न च विभुद्वयसंयोगोऽस्तिवति वाच्यं, तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसङ्गात्, पुरीततिव्यतिरिक्तप्रदेशे आत्ममनः संयोगस्य सर्वदा विद्यमानत्वात् । अणुत्वे तु यदा मनः पुरीतति नाड्यां प्रविशति, तदा सुषुप्तिः, यदा निःसरति, तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः ।**

**सरलार्थः** - मनसो लक्षणं कथ्यते, सुखाद्युपलब्धिसाधनत्वे सति इन्द्रियत्वमित्यर्थः । मनः संयोगेऽतिव्याप्तिवारणाय विशेष्यम्, चक्षुरादौ तद्वारणाय विशेषणम् । लाधवादाह - स्पर्शेति । आकाशेऽतिव्याप्तिवारणाय क्रियावत्त्वम्, वाय्वतिव्याप्तिवारणाय स्पर्शरहितत्वे सतीति । जीवात्मनः ।

अत्र मीमासंकमते नाशङ्कते यत् ज्ञान असमवायिकारणस्य असम्भवात् विभुद्वयसंयोगस्य अनङ्गीकारात्, आत्ममनसोश्च तत्र विभुत्वादिति भावः । ज्ञानानुत्पत्तिप्रसङ्गादिति ।

भावकार्यस्य असमवायिकारणजन्यत्वनियमेन आत्ममनःसंयोगरूप-असमवायिकारणासम्भवे ज्ञानरूपभावकार्यानुत्पादप्रसङ्गापत्तेः न मनो विभु, तथा च आत्मनः संयोगस्य ज्ञान असमवायिकारणस्य सम्भवात् न दोषः इत्याशयः ।

अत्र शङ्का भवति यत् संयोगानुकूलक्रियाया असम्भवादिति विभुद्वयस्य संयोगो न इत्युच्यते । तथाऽपि प्रकृते ज्ञानोत्पत्तिसम्पत्तये नित्योऽपि विभुद्वयसंयोगः स्वीक्रियते । नित्ये च असमवायिकारणक्रियाविरहेऽपि न दोषः तस्मात् उक्तं तत्संयोगस्येति । अर्थात् विभुद्वयसंयोगस्य इत्यर्थः ।

पुरीतति नामकनाड्यतिरिक्तप्रदेशावच्छेदेन आत्ममनःसंयोगाभावः, आत्ममनसोः विभुत्वे तु सर्वदा पुरीतन्नामकनाडीविशेषातिक्तिप्रदेशे आत्ममनःसंयोगस्य सत्त्वात्, सुषुप्त्यभावप्रसङ्गात् सर्वदा ज्ञानोदयप्रसङ्गादित्याशयः मूर्त्तसंयोगत्वस्यैव विभुत्वादिति भावः ।

परमाणुरूपत्वे तु, तन्नामिकायां नाड्यां ज्ञानोत्पत्तिरिति । पुरीतत् व्यतिरिक्तिप्रदेशावच्छिन्नात्ममनःसंयोगस्य ज्ञानसामान्यत्वं प्रति कारणत्वादिति भावः ।

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(१) शब्दगुणकम् ............ । (कालः, आकाशम्, मनः)

(२) सर्वमूर्तद्रव्यसंयोगित्वं ................ । (विभुत्वम्, अनित्यम्, नित्यम्)

(३) सर्वाधारः .............. । (आकाशम्, कालः, दिक्)

(४) अतीतादिव्यवहारहेतुः ................ । (कालः, दिक्, मनः)

(५) उदयाचल या दिक् सा ............. । (प्राची, प्रतीची, उदीची)

(६) ज्ञानाधिकरणं .............. । (मनः, आत्मा, इन्द्रियम्)

(७) सर्वज्ञः ................. । (मनुष्यः, जीवः, ईश्वरः)

(८) सुखादिकं .............. लक्षणम् । (जीवस्य, गुणस्य, कर्मणः)

(९) जीवः ............. । (अनित्यः, नित्यः, उभयः)

(१०) स्पर्शरहितत्वे सति क्रियावत्त्वं ................ लक्षणम् । (मनसो, जीवस्य, आत्मनः)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) आकाशस्य लक्षणं किम्?

(२) कालस्य लक्षणं किम्?

(३) ज्ञानाधिकरणं कः?

(४) प्राच्यादिव्यवहारहेतुः का?

(५) आत्मा कतिविधः?

(६) मनसो लक्षणं किम्?

(७) मूर्त्तद्रव्याणि कति?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) आकाशस्य विभुत्वे को हेतुः?

(२) मूर्त्तत्वं किम्?

(३) भविष्यत्वं नाम किम्?

(४) जीवस्य नित्यत्वे किं प्रमाणम्?

(५) इन्द्रियाणामात्मत्वं निराशयत।

**४. टिप्पणीः लिखत ।**

(१) मनः ।

(२) कालः ।

(३) दिक् ।

**५. निबन्धात्मकमुत्तरं लिखत ।**

(१) परमात्मा ।

(२) आकाशम् ।

(३) जीवः ।

●

| ५ | रूपनिरूपणात् शब्दगुणनिरूपणं यावत् |
|---|---|

## १. रूपलक्षणम्

**मूलम् - चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम् । पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।**

**दीपिका - रूपं लक्षयति - चक्षुरिति । संख्यादौ अतिव्याप्तिवारणाय - मात्रपदम् । रूपत्वेऽतिव्याप्तिवारणाय - गुणपदम् । प्रभाभित्तिसंयोगे अतिव्याप्तिवारणाय 'चक्षुर्मात्रग्राह्यजातिमत्त्वं' वाच्यम् । रूपं विभजते - तच्चेति नन्व्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति चेत् न रूपस्य व्याप्यवृत्तित्वनियमात् । ननु चित्रपटे अवयवरूपस्य प्रतीतिरस्तु इति चेत् न, रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसङ्गात् । न च रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकम्, गौरवात् । तस्मात् पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः । रूपस्याश्रयमाह - पृथिवीति । आश्रयं विभज्य दर्शयति - तत्रेति ।**

**सरलार्थः** - रूपस्य लक्षणम् - चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणम् दीपिकायां पदानां कृत्यं दर्शयति यथा- अस्मिन् लक्षणे मात्रपदानुपादाने - चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं संख्यासंयोगादावप्यस्ति तद्वारणाय मात्रपदमुपात्तम्, संख्यादयो गुणा न चक्षुर्मात्रग्राह्याः किन्तु त्वगादिभिरपि, रूपन्तु चक्षुर्मात्रग्राह्यमिति भावः । गुणपदानुपादाने 'यो गुणो यदिन्द्रियग्राह्यः' इति नियमेन रूपत्वमपि चक्षुर्मात्रग्राह्यमस्ति, किन्तु गुणः नास्ति तस्मात् गुणपदम् । तथापि प्रभाभित्तिसंयोगेऽतिव्याप्तिः स्यात् यतो हि भित्तिरुपरि चः प्रकाशः आपतेत् तदानीं भित्तिः प्रकाशश्च संयुक्तौ भवतः सः (प्रभाभित्तिसंयोगः) संयोगः चक्षुर्मात्रग्राह्यो गुणः अस्ति तत्रातिव्याप्तिर्न भवेत तदर्थँ जातिघटितलक्षणं कथितम् - चक्षुर्मात्रग्राह्यजातिमत्त्वं रूपस्य लक्षणमिति भावः । ननु अव्याप्यवृत्तीति । ननु चित्ररूपस्य एव असत्वेन रूपस्य सप्तविधत्वेन विभागः अनुपपन्न इत्याह ननु इति । अत्र एवकारः अतिरिक्त चित्र रूपव्यवच्छेदार्थकः । तथा च रूपवति पटे परस्पराऽवच्छेदकभेदेन रूपाऽभावानामपि सत्त्वेन न सप्तमं चित्ररूपमंगीकार्यमिति भावः । उत्तरयति - नेति । रूपस्य अव्याप्यवृत्तित्वं नास्त्येव, अतो न षड्रूपसमुदायोऽभ्युपगमार्हः ।

रूपाणाम् अव्याप्यवृत्तित्वे तु । एकैकचित्ररूपस्थलेऽनेकरूपाणां एकैकतत्तद्रूपप्रागभावादिस्थलेऽनेकरूप-प्रागभावादीनाञ्च कल्पनेन अनेकरूपेषु 'चित्राणि रूपाणि' त्याकारक प्रतीतिविषयत्वकल्पनेन च गौरवम् तस्मात् लाघवेन व्याप्तवृत्ति एकं चित्ररूपमङ्गीकार्यमिति भावः ।

ननु लाघवात् पटे चित्ररूपमेव नाङ्गीकार्यम्, किन्तु तन्तुषु एव भिन्नं भिन्नं रूपं वर्तते तद् एव स्वाश्रयसमवेतत्वसम्बन्धेन पटे वर्त्तते एव इत्याशंकते - नन्विति । उत्तरयति - नेति । रूपरहितत्वेनेति । अयम् भावः - तर्हि पटे तु किमपि रूपं समवायेन - नाङ्गीकृतं भवेत् ? तदा लौकिकविषयतया द्रव्यचाक्षुषं प्रति समवायेन रूपस्य कारणतया चित्रत्वेन पटस्य प्रत्यक्षमेव न स्यात्, पटे तादृशकारणस्याभावात् । ननु सर्वत्र द्रव्यप्रत्यक्षे स्वाश्रयसमवेतत्वसम्बन्धेन - रूपवत्त्वमेव प्रत्यक्षप्रयोजकमङ्गीक्रियताम्, तथा च पटस्य प्रत्यक्षं स्यात् । स्वाश्रयसमवेतत्वसम्बन्धेन तन्तुरूपस्य पटे सत्त्वाद् इति आशंकते - न चेति ॥ उत्तरयति गौरवादिति । उपसंहरति - तस्मादिति - समवायेन - रूपस्य तादृशप्रत्यक्षकारणत्वस्य स्वीकारादित्यर्थः । अन्यथा - पटस्य चाक्षुषत्वमेव न स्यादिति भावः ।

## २. रसगन्धस्पर्शलक्षणानि

**मूलम् - रसनाग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।**

**दीपिका - रसं लक्षयति - रसनेति । रसत्वेऽतिव्याप्तिवारणाय गुणपदम् । रसस्याश्रयमाह - पृथिवीति । आश्रयं विभज्य दर्शयति - पृथिव्यामिति ।**

**सरलार्थः** - रसः लक्ष्यः, एवञ्च रसनाग्राह्यत्वे सति गुणत्वं रसस्य लक्षणम् । अत्र गुणपदानुपादाने पूर्ववत् रसत्वेऽतिव्याप्तिस्स्याद्, तद्वारणाय तत्पदम् । रसस्याधारभूते द्वे पृथिवीजले । पृथिव्यां मधुरादिषड्विधः रसः भवति । जले तु मधुर एव रसः । नारिकेलनिम्बुकादौ लवणखट्वाद्यनुभवः यः भवति स तु पृथिव्याः संसर्गात् ।

**मूलम् - घ्राणग्राह्यो गुणो गन्धः । स च द्विविधः सुरभिरसुरभिश्च । पृथिवीमात्रवृत्तिः ।**

**दीपिका - गन्धं लक्षयति - घ्राणेति । गन्धत्वेऽतिव्याप्तिवारणाय गुणपदम् ।**

**सरलार्थः** - गन्धो लक्ष्यः । घ्राणेन्द्रियग्राह्यत्वे सति गुणत्वं गन्धस्य लक्षणम् । पूर्ववत् गन्धत्वेऽतिव्याप्तिवारणाय गुणपदम् । गन्धस्य द्वैविध्यम् (1) सुगन्धः (2) दुर्गन्धश्च । स च पृथिवीं विहाय कुत्रापि न तिष्ठति अर्थात् - गन्धः केवलपृथिव्याम् एव भवति । वायुजलादौ च या गन्धस्य प्रतीतिर्भवति सापि पृथिवीगन्धस्यैव । वाटवानीतपार्थिवपरमाणु द्वारा एव वायौ सुरजयसुरभित्वप्रतीतिः जायते ।

**मूलम् - त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स च त्रिविधः । शीतोष्णानुष्णाऽशीतभेदात् । पृथिवीजलतेजोवायुवृत्तिः। तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः ॥**

**दीपिका - स्पर्शं लक्षयति - त्वगिति । स्पर्शत्वेऽतिव्याप्तिवारणाय - गुणपदम् । संयोगादौ - अतिव्याप्तिवारणाय - मात्रपदम् ।**

**सरलार्थः** - स्पर्शो लक्ष्यः । त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं स्पर्शस्य लक्षणम् । गुणपदं पूर्ववत् बोध्यम् । अत्र मात्रपदानुपादाने सति कयोश्चित् पदार्थयोः संयोगः, संख्यादिरपि त्वगिन्द्रियग्राह्यः अस्ति, (गुणस्तु अस्त्येव) यतो हि स्पर्शद्वारा संयुक्तपदार्थानां ज्ञानं कर्तुं शक्यते । तस्मात् संयोगादावपि अतिव्याप्तिस्स्यात्, तद्वारणाय मात्रपदमुपात्तम्, मात्रपदस्य भावार्थः - केवलत्वचा - ग्राह्यः गुणो भवेत् । संयोगादयः न केवलत्वगिन्द्रियग्राह्याः तेषान्तु चक्षुषाऽपि ग्राह्यत्वात् ।

**३. पाकजप्रक्रिया**

**मूलम् - रूपादिचतुष्ट्यं पृथिव्यां 'पाकजम्' अनित्यं च । अन्यत्र - अपाकजं नित्यम् अनित्यं च । नित्यगतं नित्यम्। अनित्यगतम् अनित्यम् ।**

**दीपिकाः - पाकजमिति । पाकः = तेजः संयोगः । तेन पूर्वरूपं नश्यति रूपान्तरमुत्पद्यते इत्यर्थः । अत्र परमाणुष्वेव पाको न द्वयणुकादौ । आमपाकनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्वयणुकादिक्रमेण रक्तघटोत्पत्तिः। तत्र परमाणवः समवायिकारणम्, तेजः संयोगोऽसमवायिकारणम्, अदृष्टादिकं निमित्तकारणम् । द्वयणुकादिरूप कारणरूपम् असमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः । पूर्वघटनाशं विनैव अवयविनि अवयवेषु परमाणुपर्यन्तेषु च युगपद्रूपान्तरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः । अत एव पार्थिवपरमाणुषु रूपादिकमनित्यमित्यर्थः । अन्यत्रेति । जलादावित्यर्थः । नित्यगतमिति । परमाणुगतमित्यर्थः । अनित्यगतमिति । द्वयणुकादिनिष्ठमित्यर्थः । रूपादिचतुष्ट्यम् उद्भूतं प्रत्यक्षम् । अनुद्भूतमप्रत्यक्षम् । उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मः । तद् अभावोऽनुद्भूतत्वतम् ।**

**सरलार्थः** - पाकः विलक्षणतेजः संयोगः । पूर्वरूपरसादिपरावृत्तिजनकः कश्चन विजातीयः तेजः संयोगः (सः परमाणुषु एव भवति द्वयणुकादौ न) तेन पूर्वरूपरसादिकं नश्यति नूतनरूपरसादयः उत्पद्यन्ते इत्यर्थः । वैशेषिकमते परमाणुषु एव पाकः तन्मतसमन्वयं दर्शयति व्याख्याकारः - आमपाकेत्यादिना । आमः - अपक्वः, पाके निक्षिप्तः यः घटः तस्मिन्नित्यर्थः । श्यामघटनाशे सति तत्परमाणुषु रक्तादिरूपान्तरोत्पत्तौ सत्यां पुनः रक्तघटोत्पत्तिः ।

पश्चात् परमाण्वादीनां कारणत्वं दर्शितम् । पीलवः - परमाणवः तत्र पाकवादिनो वैशेषिकाः वदन्ति इति शेषः । व्याख्यायां पूर्वघटनाश इत्यादिना नैयायिकानाम् आशयं दर्शयति । युगपद्-घटादिपरमाण्वन्तेषु सर्वत्र एकदा एव पाक इति भावः ।

**४. पञ्चसामान्यगुणाः**

**मूलम् - एकत्वादिव्यवहारहेतुः संख्या, सा नवद्रव्यवृत्तिः । एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्राऽनित्यमेव ।**

**दीपिका - संख्यां लक्षयति - एकेति ।**

**सरलार्थः** - एकत्वादिव्यवहारहेतुत्वं संख्यायाः लक्षणम् । एकत्वादिप्रकारको यो व्यवहारः तस्य हेतुः संख्या इत्यर्थः।

**मूलम् - मानव्यवहाराऽसाधारणं कारणं परिमाणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम् - अणु, महत्, दीर्घं, ह्रस्वं चेति॥**

**दीपिका - परिमाणं लक्षयति - मानेति । परिमाणं विभजते तच्चेति । भावप्रधानो निर्देशः, अणुत्वम्, महत्त्वम्, दीर्घत्वं ह्रस्वत्वं चेत्यर्थः ।**

**सरलार्थः** - परिमाणं लक्ष्यम् । मानं - परिमितिः, इदं महद् इदम् अणु इत्यादिव्यवहारस्तस्याऽसाधारणकारणं परिमाणम् इत्यर्थः ।

- अणु, महद् इत्यादिपरिमाणविशिष्टगुणिबोधकशब्दैः परिमाणस्य यद् विभजनं कृतं तद् असङ्गतम् इत्याशङ्क्य आह - भावप्रधाननिर्देशः ।

भाव्यते - अवच्छिद्यते विशेष्यता अनेन इति भावः । अवच्छेदकधर्म इत्यर्थः । सः प्रधानं - विशेष्यं यस्य स - भावप्रधानः । निर्दिश्यते - बोध्यते अनेन इति निर्देशः । तथा च तादृशावच्छेदकधर्मविशेष्यकबोधजनकशब्दः - भावप्रधाननिर्देश इति फलितम् ।

**मूलम् - पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।**

**दीपिका - पृथक्त्वं लक्षयति - पृथगिति । इदम् अत्मात् पृथक् इति व्यवहारकारणमित्यर्थः ।**

**सरलार्थः** - पृथक्त्वं लक्ष्यम् । इदमस्मात् पृथगिति यो व्यवहारः तस्य असाधारणं कारणमित्यर्थः ।

**मूलम् - संयुक्तव्यवहारहेतुः संयोग । सर्वद्रव्यवृत्तिः ।**

**दीपिका - संयोगं लक्षयति - संयुक्तेति । इमौ संयुक्तौ इति व्यवहारहेतुः । संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणाय - असाधारणेति देयम् । संयोगो द्विविधः - कर्मजः, संयोगजश्च । आद्यो हस्तक्रियया हस्तपुस्तकसंयोगः । द्वितीयो - हस्तपुस्तकसंयोगात् - कायपुस्तकसंयोगः । अव्याप्यवृत्तिः संयोगः । स्वात्यन्ताभाव समानाधिकरणत्वम् - अव्याप्यवृत्तित्वम् ।**

**सरलार्थः** - संयोगो लक्ष्यः । इमौ संयुक्तौ इति यो व्यवहारस्तस्य - असाधारणहेतुत्वमिति लक्षणार्थः । दिक्कालादीनां कार्यमात्रं प्रति साधारणहेतुत्वेन असाधारणपदमुपादेयम् । संयोगस्य द्वैविध्यं स्पष्टम् । तथा च संयोगः अव्याप्यवृत्तिः भवति- क्वचिद् भवति क्वचिद् न भवति यथा भूतले प्रसारितः दण्डः मध्ये मध्ये असंयुक्तः, संयुक्तश्चापि दृश्यते । स्वं - संयोगः तस्य अत्यन्ताभावेन सह समानाम् - एकम् - अधिकरणं यस्य तत्त्वम् अव्याप्यवृत्तित्वम् इत्यर्थः ।

**मूलम् - संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ॥**

**दीपिका - विभागं लक्षयति - संयोगेति । कालादावतिव्याप्तिवारणाय गुण इति । रूपादावतिव्याप्तिवारणाय - संयोगनाशक इति । विभागोऽपि द्विविधः कर्मजो विभागजश्च । आद्यो - हस्तक्रियया हस्तपुस्तकसंयोगः । द्वितीयो - हस्तपुस्तकविभागात् कायपुस्तकविभागः ।**

**सरलार्थः** - विभागो लक्ष्यः । संयोगनाशाऽसाधारणकारणत्वे अति गुणत्वं लक्षणम् । कालक्रियादीनां संयोगनाशकत्वात् तत्रातिव्याप्तिवारणाय गुण इति । अन्यत् सर्वं स्पष्टम् ।

५. परत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दलक्षणानि

**मूलम् - पराऽपरव्यवहाराऽसाधारणकारणे परत्वाऽपरत्वे । पृथिव्यादिचतुष्टयमनोवृत्तिनी । ते द्विविधे - दिक्कृते कालकृते च । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतम् अपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतम् अपरत्वम ।**

**दीपिका - परत्वापरत्वयोर्लक्षणमाह - परापरेति । परव्यवहाराऽसाधारणकारणं परत्वम् । अपरव्यवहाराऽसाधारणकारणम् अपरत्वमित्यर्थः । परत्वाऽपरत्वे विभजते - ते द्विविधे इति । दिक्कृतयोरुदाहरणमाह दूरस्थ इति । कालकृते उदाहरति - ज्येष्ठ इति ।**

**सरलार्थः** - 'अयं परः' इत्याकारकव्यवहारस्य असाधारणकारणं परत्वम् । 'अयं अपरः' इत्याकारव्यवहारस्य असाधारणकारणं अपरत्वम् । परत्वाऽपरत्वे अनित्ये एव, पृथिवीजलतेजोवायुषु दिक्कृतं कालकृतं च तद् वर्त्तते, मनसि तु दिक्कृतमात्रं, न तु कालकृतं मनसो नित्यत्वात् ।

**मूलम् - आद्यपतनाऽसमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति ।**

**दीपिका - गुरुत्वं लक्षयति - आद्येति । द्वितीयादिपतनस्य वेगाऽसमवायिकारणत्वात् वेगेऽतिव्याप्तिवारणव्य - आद्येति ।**

**सरलार्थः** - आद्यपतनाऽसमवायिकारणत्वं गुरुत्वस्य लक्षणम् । द्वितीयादिपतनक्रियां प्रति वेगः असमवायिकारणं भवति अतः वेगे अतिव्याप्तिस्स्याद् तद्वारणाय - आद्येति पदमुपात्तम् ।

**मूलम् - आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम् । पृथिवीजलतेजोवृत्ति । तद् द्विविधम्- सांसिद्धिकं नैमित्तिकं चेति। सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां धृतादौ अग्निसंयोगजं द्रवत्त्वम् । तेजसि सुवर्णादौ ॥**

**दीपिका - द्रवत्वं लक्षयति - स्यन्दनेति । स्यन्दनं प्रस्रवणम् । तेजः संयोगजं नैमित्तिकम्, तद्भिन्नं सांसिद्धिकम् । पृथिव्यां नैमित्तिकम् उदाहरति घृतादाविति । तेजसि तदाह - सुवर्णादाविति ।**

**सरलार्थः** - स्यन्दनम् - स्रवणरूपा क्रिया । आद्यस्यन्दनाऽसमवायिकारणत्वं द्रवत्वस्य लक्षणम् । द्वितीयस्यन्दनं प्रति कारणीभूते वेगे अतिव्याप्तिवारणाय आद्येति पदम् । द्विप्रकारकं द्रवत्वम् - घृतादिपृथिव्याम् अग्निसंयोगेन जायमानं द्रवत्वं नैमित्तिकम् । स्वयं सिद्धं यत् द्रवत्वं तद् सांसिद्धिकं यथा जले ।

**मूलम् - चूर्णादिपिण्डीभावहेतुः गुणः स्नेहः । जलमात्रवृत्तिः ॥**

**दीपिका - स्नेहं लक्षयति - चूर्णेति । कालादौ अतिव्याप्तिवारणाय - गुण इति रूपादौ अतिव्याप्तिवारणाय - चूर्णादिपिण्डीभावेति ।**

**सरलार्थः** - चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम् । कालादीनां साधारणकारणत्वात् गुणपदाभावेऽतिव्याप्तिस्स्यात् ततो गुण इति । 'गुणः स्नेहः' इत्येव लक्षणञ्चेत् रूपादयोऽपि गुणाः, तत्रातिव्याप्तिवारणाय चूर्णादिपिण्डीभावेति । चूर्णम् - पिष्टम्, पिण्डीभावो नाम - चूर्णादेर्धारणाऽऽकर्षणादिसम्पादकः संयोगः, तत्र स्नेह स्यैवासाधारणकारणत्वम् ।

**मूलम् - श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । द्विविधः - ध्वन्यात्मको वर्णात्मकश्चेति । तत्र ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।**

**दीपिका - शब्दं लक्षयति - श्रोत्रेति । शब्दत्वेऽतिव्याप्तिवारणाय - गुण इति । रूपादौ अतिव्याप्तिवारणाय श्रोत्रेति। शब्दस्त्रिविधः - संयोगजो, विभागजः, शब्दजश्चेति । तत्र - आद्यो - भेरीदण्डसंयोगजन्यः । द्वितीयो - वंशे - पाट्यमाने दलद्वयविभागजन्यः चटचटाशब्दः । भेर्यादिदेशमारभ्य श्रोत्रपर्यन्त द्वितीयादिशब्दाः शब्दजाः ।**

**सरलार्थः** - श्रोत्रग्राह्यत्वे सति गुणत्वं शब्दस्य लक्षणम् । यो गुणो यदिन्द्रियग्राह्यः इत्यादिनियमात् श्रोत्रग्राह्यत्वं केवलं शब्दत्वेऽपि स्याद् अतः गुणपदम् । रूपादयोऽपि गुणास्तत्रातिव्याप्तिवारणाय श्रोत्रेति । शब्दस्याऽऽधारः आकाशम् । शब्दस्य च त्रैविध्यं स्पष्टयति - आद्यः संयोगजः - अर्थात् संयोगेन जायमानः शब्दः यथा - मृदङ्गताडनार्थदण्डोपादानं, तस्य यः संयोगः तेन जायमानः शब्दः संयोगजः । द्वितीयः काष्ठे वंशे वा त्रोट्यमाने सति दलद्वयविभागजन्यः चटचटाशब्दः ।

तृतीयश्च मृदङ्गादिस्थानाद् आरभ्य अस्माकं कर्णप्रदेशं यावत् ये शब्दाः आगच्छन्ति ते शब्दजाः शब्दाः ।

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

| | |
|---|---|
| (१) चक्षुषा एव गृह्यते ............. नेतरेणेन्द्रियेण । | (रूपम्, स्वरूपम्, रसः) |
| (२) जले ................ एव रसो भवति । | (खट्वः, अमलः, मधुरः) |
| (३) घ्राणग्राह्यो ............. गुणोऽस्ति । | (स्पर्शः, गन्धः, रसः) |
| (४) पृथिवीवाय्वोः ................ स्पर्शो भवति । | (शीतः, उष्णः, अनुष्णाशीतः) |
| (५) ............ प्रत्यक्षत्वप्रयोजको धर्मः । | (उद्भूतत्वम्, अनुद्भूतत्वम्, किमयिन) |
| (६) एकत्वादिव्यवहारस्य ............. कारणमस्ति । | (पृथक्त्वम्, संख्या, द्वित्वादिकम्) |
| (७) संयोगः .............. अस्ति । | (अव्याप्यवृत्तिः, व्याप्यवृत्तिः, व्याप्यावृत्तिः) |
| (८) द्वितीयपतनं प्रति वेगः ............. अस्ति । | (समवायी, असमवायी, निमित्तम्) |
| (९) सर्वद्रव्यवृत्तिः .............. अस्ति । | (विभागः, क्रिया, गुरुत्वम्) |
| (१०) शब्दः ............... भवति । | (द्विविधः, त्रिविधः, चतुर्विधः) |

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) रूपलक्षणे मात्रस्य कोऽर्थः ?

(२) रसः कतिविधः भवति ?

(३) कस्य संसर्गाद् वायौ गन्धप्रतीतिस्स्यात् ?

(४) स्पर्शलक्षणं लिखत ।

(५) पाकजं नाम किम् ?

(६) संख्यायाः पर्यायः कः ?

(७) परिमितिः कस्य पर्यायशब्दः ?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) संयोगनाशकविषये लिखत ।

(२) पृथक्त्वविभागयोर्मध्ये को भेदः ?

(३) भावप्रधाननिर्देश इत्यस्य व्युत्पत्तिं लिखत ।

(४) व्याप्यवृत्तित्वं न्नाम किम् ?

(५) असाधारणकारणम् अर्थात् किम् ?

**४. टिप्पणीः लिखत ।**

(१) शब्दस्य त्रैविध्यम् ।

(२) द्रवत्वस्य नैमित्तिकत्वम् ।

(३) पिण्डीभावस्य हेतुः ।

**५. निबन्धात्मकमुत्तरं लिखत ।**

(१) पाकजप्रक्रियां निबध्नातु ।

(२) यो गुणो यदिन्द्रियग्राह्य नियमं ज्ञापयत ।

(३) व्याप्याव्याप्यवृत्तित्वे स्पष्टयत ।

•

| ६ | बुद्धिनिरूपणात् कारणनिरूपणं यावत् |
|---|---|

# ६ बुद्धिनिरूपणात् कारणनिरूपणं यावत्

## १. बुद्धिलक्षणम्

**मूलम् - सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा - स्मृतिः अनुभवश्च ।**

**दीपिका - बुद्धेर्लक्षणमाह - सर्वेति । कालादौ अतिव्याप्तिवारणाय गुण इति । रूपादौ - अतिव्याप्तिवारणाय - सर्वव्यवहार इति । जानामीत्यनुव्यवसायगम्य ज्ञानत्वं लक्षणमित्यर्थः ।**

**सरलार्थः** - सर्वव्यवहाराऽसाधारणहेतुत्वे सति गुणत्वं बुद्धेर्लक्षणम् । व्यवहारः - शब्दप्रयोगः । गुणपदाभावे कालादौ अतिव्याप्तिस्स्यात् तद्वारणाय गुणपदम् । केवलगुणपदोपादाने रूपादावतिव्याप्तिस्स्यात् तन्निवृत्तये सर्वव्यवहारेति । दीपिकाकारो लाघवाल्लक्षणान्तरं लिखति यत् - जानामि इति अनुव्यवसायगम्य ज्ञानत्वमेव लक्षणमित्यर्थः । सा बुद्धि र्द्विविधा स्मृतिः अनुभवश्च ।

**मूलम् - संस्कारमात्रजन्यं ज्ञानं स्मृतिः ।**

**दीपिका - स्मृति र्लक्षणमाह - संस्कारेति । भावनाख्यः संस्कारः । संस्कारध्वंसेऽतिव्याप्तिवारणाय - ज्ञानमिति । घटादिप्रत्यक्षे अतिव्याप्तिवारणाय - संस्कारजन्यमिति । प्रत्यभिज्ञायामतिव्याप्तिवारणाय - मात्रेति ।**

**सरलार्थः** - संस्कारमात्रजन्यत्वे सति ज्ञानत्वं - स्मृतेर्लक्षणम् । संस्कारः इत्युक्ते भावनाख्यसंस्कारः ज्ञातव्यः । प्रतियोगितासम्बन्धेन - ध्वंसं प्रति तादात्म्येन प्रतियोगिनः कारणत्वात् - संस्कारध्वंसे - अतिव्याप्तेर्वारणाय ज्ञानपदोपादानम्। ज्ञानत्वमात्रोपादाने घटादिप्रत्यक्षे अतिव्याप्तिस्स्यात्तद्वारणाय संस्कारजन्यमिति । मात्रपदानुपादाने सति प्रत्यभिज्ञायास्संकारजन्यत्वात् ज्ञानत्वाच्च तत्राऽतिव्याप्तिः अतस्तद्वारणाय मात्रमुपात्तम् । प्रत्यभिज्ञा न संस्कारमात्रजन्या अपि तु इन्द्रियार्थसन्निकर्षजन्यापीति ।

## २. यथार्थाऽयथार्थानुभवलक्षणे

**मूलम् - तद्भिन्नं ज्ञानम् अनुभवः । स द्विविधः - यथार्थोऽयथार्थश्चेति ।**

**दीपिका - अनुभवं लक्षयति - तद्भिन्नमिति । स्मृतिभिन्नं ज्ञानमनुभवं इति । अनुभव विभजते - स द्विविध इति।**

**सरलार्थः** - स्मृतिभिन्नत्वे सति ज्ञानत्वम् अनुभवस्य लक्षणम् । तस्य च द्वैविध्यं (1) यथार्थानुभवः - प्रमा (2) अयथार्थानुभवः - अप्रमा ।

**यथार्थानुभवः ।**

**मूलम् - तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा अयं घट इति ज्ञानम् । सैव प्रमेत्युच्चते ।**

**दीपिका - यथार्थानुभवं लक्षयति । तद्वतीति । ननु घटे घटत्वम् इति प्रमायाम् अव्याप्तिः । घटत्वे घटाभावाद् इति चेत् न, यत्र यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभवः इति अर्थात् घटत्वेऽपि घटसम्बन्धोऽस्ति इति नाव्याप्तिः । स एवेति। यथार्थानुभव एव शास्त्रे प्रमा इत्युच्यते इत्यर्थः ।**

**सरलार्थः** - तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं यथार्थानुभवस्य लक्षणम् । ननु तद्वदित्यस्य - तदधिकरणम् - इत्यर्थकतया घटे घटत्वम् इति प्रमात्मके ज्ञानेऽव्याप्तिः । घटस्य आधेयतासम्बन्धेन घटत्वे अन्वयः । अतो घटः प्रकारः, घटत्वं विशेष्यम् । आधेयतासम्बन्धस्य वृत्यनियामकतया तेन सम्बन्धेन घटात्मकप्रकारस्याधिकरणाऽप्रसिद्धिः इति अतः आशंकते दीपिकायम् - ननु घटे घटत्वमिति । इत्थञ्च तद्वदित्यस्य तत्संबन्धित्वमयो विघेयः।

**अयथार्थानुभवः**

**मूलम् - तदभाववति तत्प्रकारोऽनुभवोऽयथार्थः ।**

**दीपिका - अयथार्थानुभवं निरूपयति - तदभाववतीति । ननु 'इदं संयोगि' इति प्रमायाम् अतिव्याप्तिः इति चेन्न । यदवच्छेदेन यत्सम्बन्धाभावः, तदवच्छेदेन तत्सम्बन्धज्ञानस्य विवक्षिततत्वात् । संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् संयोगावच्छेदेन संयोगसम्बन्धस्य सत्वात् नातिव्याप्तिः ।**

**सरलार्थः** - तदभाववद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं अयथार्थानुभवलक्षणम् । अयं भावः - संयोगोऽव्याप्यवृत्तिः पदार्थः, वानरादेः संयोगो वृक्षे शाखावच्छेदेन वर्त्तते, मूलावच्छेदेन तु नास्ति, अतो मूलावच्छेदेन संयोगाभावयद्वृक्षनिष्ठविशेष्यतानिरूपिता या शाखावच्छेदेन संयोगनिष्ठा प्रकारता तन्निरूपकानुभवत्वस्य 'इदं संयोगीति' ज्ञाने सत्वात्, मूलावच्छेदेन वृक्षः संयोगाभाववान् इति प्रत्ययात् उत्तरयति - नेति । यदवच्छेदेन - मूलावच्छेदेन वृक्षे, यत्सम्बन्धाभावः - येन सम्बन्धेन यस्य - अभावः - समवायेन संयोगस्याभावो वर्तते इति । तादृशाभाववति वृक्षे तदवच्छेदेन - मूलावच्छेदन, तत्सम्बन्धज्ञानस्य - तत्सम्बन्धेन तत्प्रकारकज्ञानस्य समवायेन संयोगप्रकारकानुभवस्येति यावत् नातिव्याप्तिं दर्शयति- संयोगावच्छेदेन - इति।

**मूलम् - यथार्थानुभवश्चतुर्विधः । प्रत्यक्षाऽनुमित्युपमितिशाब्दभेदात् । तत्करणमपि चतुर्विधम् - प्रत्यक्षानुमानोपमानशब्दभेदात् । असाधारणं कारणं करणम् ।**

**३. कारणलक्षणम्**

**मूलम् - कार्यनियतपूर्ववृत्तिः कारणम् ।**

**दीपिका - 'पूर्ववृत्तिकारणम्' इत्युक्ते रासभादावतिव्याप्तिः स्यादतः - नियतेति, तावन्मात्रे कृते कार्येऽतिव्याप्तिः अतः पूर्ववृत्तीति । ननु तन्तुरूपमपि पटं प्रति कारणं स्यादिति चेत् । न, अनन्यथासिद्धत्वे सति इति विशेषणात् । अनन्यथासिद्धत्वम्- अन्यथासिद्धिविरहः । अन्यथासिद्धिः त्रिविधा - येन ( 1 ) सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तेन तदन्यथासिद्धम्, यथा तन्तुना तन्तुरुपं तन्तुत्वञ्च पटं प्रति । ( 2 ) अन्यं प्रति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धत्वम्, यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते एव पटं प्रति आकाशस्य । ( 3 ) अन्यत्र क्लृप्तनियतपूर्ववर्त्तिनि एव कार्यसम्भवे तत्समूहभूतत्वम् अन्यथासिद्धम्, यथा पाकजस्थले गन्धं प्रति रूपप्रागभावस्य एवं च अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम् ।**

**सरलार्थः** - कार्यनियतपूर्ववृत्तित्वं कारणलक्षणम् । नियतत्वं नाम व्यापकत्वम् । कार्याधिकरणवृत्यत्यन्ताभावाऽ- प्रतियोगित्वम् । यत् किञ्चित् घटं प्रति मृदाद्यानयनद्वारा रासभस्य कारणतासम्भवेऽपि घटत्वावच्छिन्नं प्रति कारणत्वं नास्ति तस्माद्रासभो न नियतपूर्ववृत्तिः । तथा च लक्षणे अन्यथासिद्धशून्यत्वस्य विशेषणात् तन्तुरूपादावपि नातिव्याप्तिः । क्लृप्तकारणबहिर्भूतत्वम् - अन्यथासिद्धत्वमिति । ततः अन्यथासिद्धशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणमितिस्पष्टम्। अन्यत् सर्वं स्पष्टमिति ।

**४. कारणत्रयनिरूपणम्**

**मूलम् - कारणं त्रिविधम् - समवाय्यसमवायिनिमित्तभेदात् ।**

**दीपिका - कारणं विभजते - कारणमिति ।**

**( १ ) समवायिकारणम्**

**मूलम् - यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः ॥**

**दीपिका – समवायिकारणलक्षणमाह – यत्समवेतमिति । यस्मिन् समवेतमित्यर्थः ।**

**सरलार्थः** – कारणस्य त्रैविध्यंप्रदर्श्य तत्राद्यसमवायिकारणस्य लक्षणमाह – यस्मिन् समवायसम्बन्धेन कार्यस्योत्पत्तिः भवति तद् समवायिकारणम् । यथा पटः – वस्त्रम्, समवायेन तन्तुषु उत्पद्यते, पटरूपञ्च पटे । प्रायोऽवयवाः अवयवीनां समवायिकारणंभवति ॥

**( 2 ) असमवायिकारणम्**

**मूलम् – कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम् असवायिकारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरुपं पटरूपस्य ।**

**दीपिका – असमवायिकारणलक्षणमाह – कार्येणेति । कार्येणेत्युदाहरति – तन्तुसंयोग इति । कार्येण पटेन सह एकस्मिन् तन्तौ समवेतत्वात् तन्तुसंयोगः पटस्य – असमवायिकारणम् । कारणेन सह इत्येतदुदाहरति – तन्तुरूपमिति – कारणेन पटेन सहैकस्मिन् तन्तौ समवेतत्वात् तन्तुरुपं पटस्य अस्यासमवायिकारणमित्यर्थः ।**

**सरलार्थः** – अस्यासमवायिकारणस्य लक्षणमाह – एकं यथा – कार्येण सहैकस्मिन्नर्थे – समवेतं सत् यत् कारणं तद् असमवायि कारणम् । यथा – तन्तुसंयोगः पटस्य । तथाहि पटः समवायेन तन्तुषु वर्तते, तत्र च समवायेन तन्तूनां संयोगोऽपि वर्तते, अतः कार्येण – पटेन सहैकस्मिन् तन्त्वात्मकेऽधिकरणे – वर्तमाने सति यत् कारणं – तन्त्ववयवसंयोगः सः पटं प्रत्यसमवायिकारणम् । द्वितीयं लक्षणं यथा – कारणेन सहैकस्मिन्नित्यादि । तन्तुरुपं पटरुपस्य । तथा हि – कार्यं पटरुपं समवायेन पटे वर्तते, कारणं पटः समवायेन तन्तुषु वर्तते तत्र समवायेन तन्तूनां रूपं वर्त्तते, ततस्तन्तुरुपम् असमवायिकारणम्।

**( ३ ) निमित्तकारणम्**

**मूलम्** – तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य ।

**दीपिका** – निमित्तकारणं लक्षयति – तदुभयेति । समवाय्यसमवायिभिन्नकारणं निमित्तकारणमित्यर्थः ।

**सरलार्थः** – समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति यत् कारणं तद् निमित्तकारणम् । कार्यमात्रंप्रति यस्य पदार्थस्य किञ्चिदपि प्रयोजनंभवति तदेव निमित्तपदेन व्यवह्रीयते ।

**स्वाध्यायः**

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) सर्वव्यवहारे हेतुः .............. अस्ति । (बुद्धिः, शुद्धिः, सद्व्यवहारः)

(२) ............. संस्कारजन्यं ज्ञानमुच्यते । (भावना, संस्कारः, स्मृतिः)

(३) स्मृतिभिन्नं ज्ञानम् .............. अस्ति । (त्रिविधम्, द्विविधम्, चतुर्विधम्)

(४) अयं घटः इति ज्ञानम् .............. अस्ति । (प्रमा, अप्रमा, प्रमाप्रमा)

(५) ............ अन्यथासिद्धिः । (द्विविधा, कतिविधा, त्रिविधा)

(६) अनियतपूर्ववृत्ति ............... वर्त्तते । (रासभः, उष्ट्रः कुलालः)

(७) ................. समवायेन तन्तुषु उत्पद्यते । (पटः, घटः, मठः)

(८) पटस्यासमवायिकारणम् ................. अस्ति । (तन्तुसंयोगः, संयोगः, विभागः)

(९) संस्कारसन्निकर्षाभ्याम् ................... जन्यते । (प्रत्यभिज्ञा, स्मृतिः, विस्मृतिः)

(१०) कार्यस्य पूर्व ............... भवति । (कारणम्, कारणाभावः, कार्यकारणे)

२. **एकवाक्येन उत्तराणि लिखत ।**

(१) व्यवहारः अर्थात् किम्?

(२) स्मृतिभिन्नं ज्ञानं किम्?

(३) शास्त्रे यथार्थानुभवः किम् उच्यते?

(४) प्रमाप्रमामध्ये कीयान् भेदः?

(५) कारणस्य त्रैविध्यं किम्?

(६) समवायिकारणस्य किं लक्षणम्?

(७) अन्यथासिद्धिः किम् अस्ति?

३. **द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) स्मृतौ मात्रपदस्य प्रयोजनं किम्?

(२) अनुभवस्मृतिमध्ये को भेदः?

(३) अप्रमायाः लक्षणार्थं लिखत ।

(४) असमवायिकारणस्य लक्षणं लिखत ।

(५) समवायिकारणोदाहरणं लिखत ।

४. **टिप्पणीः लिखत ।**

(१) 'घटे घटत्वम्' स्पष्टयत ।

(२) 'इदं संयोगि' वर्णयत ।

(३) कारणचर्चां कुरुत ।

५. **निबन्धात्मकमुत्तरं लिखत ।**

(१) यथार्थानुभवः - सपदकृत्यः लेख्यः ।

(२) 'यदवच्छेदेन यत्सम्बन्धाभावः' इत्यादि स्पष्टयत ।

(३) सभेदबुद्धिं वर्णयत ।

•

# ७ प्रत्यक्षप्रमाणनिरूपणम्

**१. प्रत्यक्षलक्षणम्**

**मूलम् - तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ।**

**दीपिका - प्रत्यक्षलक्षणमाह - तत्रेति । प्रमाणचतुष्टयमध्ये इत्यर्थः ।**

**सरलार्थः** - प्रत्यक्षज्ञानस्य करणं प्रत्यक्षम् । प्रत्यक्षप्रमात्मकज्ञानस्य करणमिन्द्रियमित्यर्थः । लक्षणे ज्ञानपदं प्रत्यक्षपदस्य प्रमितिपरत्वस्फुटीकरणायेति बोध्यम् ।

**२. निर्विकल्पक लक्षणम्**

**मूलम् - इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । तद् द्विविधम् - निर्विकल्पकं सविकल्पकं चेति । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् ।**

**दीपिका - निर्विकल्पकस्य लक्षणमाह - निष्प्रकारकम् इति । विशेषणविशेष्यसम्बन्धानवगाहि ज्ञानम् इत्यर्थः । ननु निर्विकल्पके किं प्रमाणमिति चेत् न, गौरितिविशिष्टज्ञानम्, विशेषणज्ञानजन्यं, विशिष्टज्ञानत्वात्-दण्डीति ज्ञानवत् इत्यनुमानस्य प्रमाणत्वात् । विशेषणज्ञानस्यापि सविकल्पकत्वे - अनवस्थाप्रसङ्गात् निर्विकल्पकत्वसिद्धिः ।**

**सरलार्थः** - निष्प्रकारकत्वे सति ज्ञानत्वम्, निर्विकल्पकस्य लक्षणम् । यस्मिन् - कस्मिन्नपि ज्ञाने विशेषणम्, विशेष्यः, तयोश्च समबन्धो भवति, तद् - ज्ञानं त्रयाणामपि अवगाहनं कारयति किन्तु निर्विकल्पं ज्ञानं त्रयाणाम् अनवगाहि अथ च तुरीय विषयावगाही भवति इति भावः । तत्र गौरित्यादिना प्रमाणं इत्याशङ्क्य समाधते - विशेषणज्ञानस्यापीति । तद्यथा - विशेषणज्ञानमपि यदि सविकल्पकं तदा तत्रापि विशेषणज्ञानमपेक्षितं अनवस्थाभयाद् विशिष्टज्ञानकारणीभूतं विशेषणज्ञानं निर्विकल्पकं स्वीकार्यम् इति ।

**३. सविकल्पकलक्षणम्**

**मूलम् - सप्रकारकं ज्ञानं सविकल्पकम् यथा 'डित्थोऽयं' ब्राह्मणोऽयं श्यामोऽयमिति ।**

**दीपिका - सविकल्पकं लक्षयति - सप्रकारकमिति । नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहि ज्ञानम् इत्यर्थः । सविकल्पकमुदाहरति - यथेति ॥**

**सरलार्थः** - सप्रकारकत्वे सति ज्ञानत्वम् सविकल्पकस्य लक्षणम् ॥ 'घट' इत्यत्र नाम = अभिधानम्, तच्च विशेष्यं इत्यर्थः । घटत्वं जातिः सा समवायेन घटे वर्त्तते । अतः नामजात्यादिकं यद् विशेषणं तन्निष्ठा विशेषणताख्यविषयता तादृश विषयताशालिज्ञानवत्त्वम् इत्यर्थः ।

**४. षड्विधः सन्निकर्षः**

**मूलम् - प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः - संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ।**

**दीपिका - इन्द्रियार्थसन्निकर्षं विभजते - प्रत्यक्षेति ।**

**सरलार्थः** - सन्निकर्षः प्रत्यक्षज्ञानकरणे हेतुर्भवति विषयेन्द्रिययोः साक्षात्परम्परया वा सम्बन्धः संन्निकर्षः। अत्र सन्निकर्षविभागः दर्शितः ।

**मूलम् - ( १ ) चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।**

**दीपिका – संयोगसन्निकर्षमुदाहरति – चक्षुषेति । द्रव्यप्रत्यक्षे सर्वत्र संयोगसन्निकर्षः । आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यते ।**

**सरलार्थः** – वयं यदा कदापि द्रव्यस्य रूपसहितस्य नेत्रद्वारा ज्ञानं कुर्मः तदा संयोग इति नामकः सन्निकर्षः तत्र हेतुर्भवति । आत्मा मनसेति प्रत्यक्षज्ञानोत्पत्तेः क्रमं दर्शयति ।

**मूलम् – ( २ ) घटरूपप्रत्यक्षजनने संयुक्तसमवायःसन्निकर्षः । चक्षुः संयुक्ते घटे रूपस्य समवायात् ।**

**दीपिका – संयुक्तसमवायमुदाहरति – घटरुपेति । तत्र युक्तिमाह – चक्षुःसंयुक्त इति ।**

**सरलार्थः** – घटगतरूपस्य यदा प्रत्यक्षं करणीयं भवति तदा एषः सन्निकर्षः हेतुः । यतो हि चक्षुषा संयुक्तः घटः तत्र रूपं समवेतम् अस्ति ।

**मूलम् – ( ३ ) रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायःसन्निकर्षः । चक्षुः संयुक्ते घटे रूपं समवेतम्, तत्र रुपत्वस्य समवायात् ।**

**दीपिका – संयुक्तसमवेतसमवायमुदाहरति – रूपत्वेति ।**

**सरलार्थः** – रूपे स्थितरूपत्वसामान्यप्रत्यक्षे एषः हेतुः । रूपे रूपत्वस्य समवेतत्वात् ।

**मूलम् – ( ४ ) श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवर्त्त्याकाशस्यश्रोत्रत्वात्-शब्दस्याकाशगुणत्वात्, गुणगुणिनोश्च समवायात् ।**

**दीपिका – समवायमुदाहरति-श्रोत्रेणेति । तदुपपादयति – कर्णेति । ननु दूरस्थशब्दस्य कथं श्रोत्रेण सम्बन्ध इति चेत्, न, वीचीतरंगन्यायेन कदम्बमुकुलन्यायेन वा शब्दाच्छव्दानामुत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श्रोत्रसमबन्धात् प्रत्यक्षत्वसम्भवात्।**

**सरलार्थः** – शब्दप्रत्यक्षे एषः सन्निकर्षः । नन्विति – शब्दस्य दूरस्थस्य श्रोत्रसम्बन्धः यथा – जलमध्ये पाषाणादिनिक्षेपात् एको वीचीनां तरङ्गः उत्पद्यते, ततः द्वितीयः, तृतीयः, चतुर्थः... एवं शब्दा अपि परितः उत्पद्यन्ते इति भावः। कदम्बमुकुले प्रथमं परितो दलानाम् एकं चक्रं भवति ततो द्वितीयं ततस्तृतीयं क्रमशो जायते । तद्वत् प्रथमं भेरीदण्डसंयोगेन एकः शब्दः ततोऽन्ये शब्दाः ततः दशसु – दिक्षु शब्दा उत्पद्यन्त इति भावः ।

**मूलम् – ( ५ ) शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रसमवेते शब्दे – शब्दत्वस्य समवायात् ।**

**दीपिका – समवेतसमवायमुदाहरति – शब्दत्वेति ।**

**सरलार्थः** – शब्दे स्थितस्य शब्दत्वस्य प्रत्यक्षे एषः सन्निकर्षः हेतुभूतः ।

**मूलम् – ( ६ ) अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः । घटाभाववद् भूतलम् । इत्यत्र चक्षुः संयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।**

**दीपिका – विशेषणविशेष्यभावमुदाहरति – अभावेति । तदुपपादयति – घटाभाववदिति । भूतलं विशेष्यम् । घटाभावो विशेषणम् । भूतले घटो नास्तीत्यत्र घटाभावस्य विशेष्यत्वं द्रष्टव्यम् । एतेन अनुपलब्धेः प्रमाणान्तरत्वं निरस्तम् । यद्यत्र घटोऽभविष्यत् तदा भूतलमिवाद्रक्ष्यत् दर्शनाभावान्नास्ति इति तर्कितप्रतियोगिसत्वे विरोध्यनुपलब्धेः सहकृतेनेन्द्रियेणैव अभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणाऽन्तरत्वासम्भवात् । अधिकरणज्ञानार्थम् अपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तावनुपलब्धेः करणत्वस्यायुक्तत्वात् । विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः सम्बन्धः ।**

**सरलार्थः** - अधुना अभावप्रत्यक्षे कः सन्निकर्षः इति जिज्ञासायामुच्यते - घटाभाववद् भूतलम् अत्र भूतलं विशेष्यम् घटाभावो विशेषणम् । चक्षुर्यदा भूतलसंयुक्तं भवति तत्र घटाभावो विशेषणत्वेन वर्तते ततस्तस्य विशेषणतासम्बन्धेन प्रत्यक्षम् । भूतले घटोनास्ति अत्र, घटाभावः विशेष्यम्, भूतलञ्च विशेषणम् ततो विशेष्यता सम्बन्धेन घटाभावस्य प्रत्यक्षम् । तथा च तत्तदधिकरणे चक्षुः संयोगे सति एव तत्र घटाभावप्रत्यक्षं घटानुपलब्धिसहकृतेन चक्षुषा एव भवतीति - घटाद्यनुपलब्धेः नातिरिक्तप्रमाणत्वमिति दृष्ट्या-आह-तर्कितेति । ननु - अभावप्रत्यक्षे इन्द्रियादेः योग्यानुपलब्धिसहकृतस्य करणत्वापेक्षया लाघवेन योग्यानुपलब्धेः एव कारणत्वमस्तु इति आशङ्कां निवारयति - मूले - अधिकरणेति । किञ्च नैयायिकानाम् अभावप्रत्यक्षेऽतिरिक्त सम्बन्धकल्पनायां गौरवमिति चेत् ! न, विशेषण-विशेष्यभावः तत्स्वरूप एव अतो न सम्बन्धगौरवम् ।

**मूलम् - एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम् । तत्करणमिन्द्रियम्, तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।**

**दीपिका - प्रत्यक्षज्ञानमुपसंहरन् तस्य करणमाह - एवमिति । असाधारणकारणत्वात् इन्द्रियं प्रत्यक्षज्ञानकरणमित्यर्थः। प्रत्यक्षमुपसंहरति - तस्मादिति ।**

**सरलार्थः** - सन्निकर्षषट्कद्वारा यत् ज्ञानम् उत्पद्यते तत् प्रत्यक्षम् तस्य करणम् इन्द्रियम्, असाधारणकारणत्वात् व्यापारजनकत्वाच्च इन्द्रियं प्रत्यक्षज्ञानकरणम् इत्यर्थः । तस्मात् इन्द्रियमेव प्रत्यक्षप्रमाणम् - इति सिद्धम् ।

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) इन्द्रियार्थसन्निकर्षजन्यं .............. प्रत्यक्षम् । (ज्ञानम्, सविकल्पकम्, घ्वंसः)

(२) निर्विकल्पकज्ञानं ................. भवति । (सप्रकारकम्, निष्प्रकारकम्, उभयात्मकम्)

(३) सप्रकारकस्य .............. उदाहरणम् । (ब्राह्मणोऽयम्, घटघटत्वे घटघटत्वसमवायाश्च, क्रियेयम्)

(४) नामजात्यादिकम् .............. भवति । (सविकल्पके, निर्विकल्पके, कुत्रापि न)

(५) सन्निकर्ष ............... भवति । (षड्विधः, द्विविधः, चतुर्विधः)

(६) रूपप्रत्यक्षजनने ................. सन्निकर्षः । (संयोगः, संयुक्तसमवायः, समवायः)

(७) शब्दसाक्षात्कारे ................ सन्निकर्षः । (संयुक्तसमवायः, समवायः, संयोगः)

(८) आकाशस्य गुण .............. अस्ति । (स्वच्छता, शब्दः, नीलः)

(९) घटाभाववद् भूतलम् अत्र घटाभावः ............... अस्ति । (विशेष्यम्, विशेषणम्, किमपि न)

(१०) विशेषणविशेष्यभावसन्निकर्षः ................ उपयुक्तः । (अभावप्रत्यक्षे, भावप्रत्यक्षे, अनुमितौ)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) शब्दत्वसाक्षात्कारे कः सन्निकर्षः ?

(२) इन्द्रियं कस्य करणम् ?

(३) घटप्रत्यक्षे कः सन्निकर्षः ?

(४) रूपत्वसामान्यस्य प्रत्यक्षे कः सन्निकर्षः ?

(५) प्रत्यक्षज्ञानहेतुः कः ?

(६) जलमध्ये पाषाणनिक्षेपात् किं जायते ?

(७) कदम्बमुकुलः अर्थात् किम् ?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) अनुपलब्धेः प्रमाणान्तरत्वं कथं निरस्तम्?

(२) अभावप्रत्यक्षेऽतिरिक्तसम्बन्धकल्पनायां गौरवम् किम्?

(३) वीचीतरङ्गन्यायः कुत्र उपयुज्यते?

(४) सर्वत्र द्रव्यप्रत्यक्षे कः सन्निकर्षः कथं च?

(५) निष्प्रकारकत्वन्नाम किम्?

**४. टिप्पणीः लिखत ।**

(१) सन्निकर्षाः ।

(२) निर्विकल्पके प्रमाणम् ।

(३) विशेषण विशेष्यभावः सन्निकर्ष ।

**५. निबन्धात्मकमुत्तरं लिखत ।**

(१) प्रत्यक्षज्ञानोत्पत्तिक्रमं लिखत ।

(२) दूरस्थशब्दस्य कथं श्रोत्रसम्बन्धः ।

(३) अनुपलब्धेः चर्चां विशदयत ।

•

# ८ अनुमानप्रमाणे विपक्षलक्षणपर्यन्तम्

**प्रस्तावना**

नैयायिकमते प्रमाणानि चत्वारि । तानि प्रत्यक्षानुमानोपमानशब्दाः । तत्र प्रत्यक्षप्रमाणविषये पूर्वस्मिन् पाठे प्रतिपादितम् । द्वितीयं प्रमाणम् अनुमानम् । सम्प्रति अनुमानप्रमाणविषये पठामः । तत्र किं नाम अनुमानमिति जिज्ञासायाम्, अनुमितिकरणम् अनुमानमिति तर्कसङ्ग्रहे, अनुमानं लक्षयति – अनुमितिकरणमिति । अर्थात् अनुमितेः करणमेव अनुमानम् इति । करणं नाम साधनम् । पुनः शङ्का भवति एषा अनुमितिः का ? इति ।

**१. अनुमितिलक्षणम्**

**मूलम्ः – परामर्शजन्यं ज्ञानम् अनुमितिः ।**

**दीपिका – अनुमितेर्लक्षणमाह – परामर्शेति । ननु संशयोत्तरप्रत्यक्षे अतिव्याप्तिः । स्थाणुपुरुषसंशयानन्तरं 'पुरुषत्वव्याप्यकरादिमानयम्' इति परामर्शे सति 'पुरुष एव' इति प्रत्यक्षजननात् । न च तत्र अनुमितिरेवेति वाच्यम् । 'पुरुषं साक्षात्करोमि' इत्यनुव्यवसायविरोधादिति चेत् ! न, पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्, सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता । साध्यसिद्धिरनुमितिप्रतिबन्धिका । सिद्धिसत्त्वेऽपि 'अनुमिनुयाम्' इतीच्छायामनुमितिदर्शनात् सिषाधयिषोत्तेजिका । ततश्च उत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत्, सिषाधयिषाविरहसहकृतसिद्ध्यभावस्यापि अनुमितिकरणत्वम् ।**

**सरलार्थः** – दीपिकायां परामर्शेति । अर्थात् परामर्शेन जन्यं यत् ज्ञानं तत् अनुमितिरिति । तत्र प्रत्यक्षादौ अतिव्याप्तिवारणाय परमर्शेति पदम् । परामर्शध्वंसवाराणाय ज्ञानमिति। तथापि परामर्शजन्ये परामर्शप्रत्यक्षे अतिव्याप्तिं दर्शयति ननु इत्यादिना । तत्र अनुमितिरेवेति नैव वक्तव्यमिति कथयति न चेति । अनुव्यवसायविरोधादिति चेत् नेति । पूर्वं प्रत्यक्षज्ञानं व्यवसायः, प्रत्यक्षज्ञानस्य ज्ञानम् अनुव्यवसायः, तस्य विरोधादिति । पक्षतासहकृतादिति अर्थात् न केवलं परामर्शजन्यं ज्ञानम् अनुमितिः अपि च पक्षतासहकृतपरामर्शजन्यं ज्ञानमेवानुमितिरिति ।

तथा च व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं स परामर्श इत्यर्थः । सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता पर्वतो वह्निमान् धूमात् इत्यत्र सिषाधयिषा साधयितुमिच्छा-वह्निमनुमिनुयामितीच्छा पर्वते वह्न्यनुमितिर्मे जायताम् इतीच्छा वा । सिद्धिः- पर्वतो वह्निमानिति । तथा च पर्वते सिषाधयिषा यदि नास्ति सिद्धिश्च वर्तते, तदा सिषाधयिषाविरहविशिष्टसिद्धिः अनुमितिप्रतिबन्धिका भवति । प्रतिबन्धकस्य अभाव एव सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव पक्षता इत्यर्थः । एवञ्च संशयोत्तरप्रत्यक्षे पुरुषत्वव्याप्यकरादिमानयम् इति परामर्शजन्यत्वन्तु विद्यते परन्तु सिषाधयिषाविरहिविशिष्टसिद्धयभावविशिष्ट तादृशपरामर्शजन्यत्वं नास्तीति नातिव्याप्तिः।

**२. परामर्शव्याप्तिपक्षधर्मतालक्षणानि**

**परामर्शलक्षणम्**

**मूलम् – व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमानि ति ज्ञानमनुमितिः ।**

**दीपिका – परामर्शं लक्षयति व्याप्तीति । व्याप्तिविषयकं यत् पक्षधर्मताज्ञानं स परामर्श इत्यर्थः । परामर्शमभिनीय दर्शयति यथेति । अनुमितिमभिनीय दर्शयति तज्जन्यमिति परामर्शजन्यमिति ।**

**सरलार्थः** - यस्मिन्नेकस्मिन्नेव हेतौ व्याप्तेः पक्षधर्मतायाश्च निश्चयः स परामर्श इति।अभिनयः - अभिमतशब्दोच्चारणम् । अन्यत् सर्वं सरलम् ।

**व्याप्तिलक्षणम्**

**मूलम् - 'यत्र यत्र धूमस्तत्र तत्राग्निरि'ति साहचर्यनियमो व्याप्तिः ॥**

**दीपिका - 'यत्र धूमः तत्राग्नि'इति व्याप्तेरभिनयः । 'साहचर्यनियमः' इति लक्षणम् । साहचर्यं सामानाधिकरण्यम्, तस्य नियमः हेतुसमानाधिकरणाऽत्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः ।**

**सरलार्थः** - सह चरतीति सहचरः, तस्य भावः साहचर्यम् । धूमेन सह वह्निः चरतीति घूमज्ञानं वहिनं ज्ञापयति । यथा अरण्ये कश्चनपुरुषः लक्ष्मणम् अपश्यत्, तदनु रामम् अनुमीयते । समानम् अधिकरणं ययोः द्वयोः हेतुसाध्ययोः (धूमवह्न्योः) एकस्मिन्नधिकरणे (पर्वते) वृत्तित्वं सामानाधिकरण्यम् । तस्य नियमः हेतुरिति ।

**पक्षतालक्षणम्**

**मूलम् - व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ॥**

**दीपिका - पक्षधर्मतास्वरूपमाह-व्याप्यस्येति ।**

**सरलार्थः** - व्याप्यो नाम व्याप्त्याश्रयः, तस्य पर्वतादिषु विद्यमानत्वमेव पक्षधर्मता इत्यर्थः ।

**३. स्वार्थपरार्थानुमाने पञ्चावयवाश्च**

**अनुमानम्**
↓
↓ स्वार्थानुमानम् ↓ परार्थानुमानम्

**मूलम् - अनुमानं द्विविधम् स्वार्थं परार्थञ्च ॥**

**दीपिका - अनुमानं विभजते - अनुमानमिति । तद्वैविध्यं दर्शयति- स्वार्थमिति ।**

**सरलार्थः** - स्वार्थानुमानम्, परार्थानुमानञ्चेति अनुमानं द्विप्रकारकमित्यर्थः ।

**स्वार्थानुमानम्**

**मूलम् - स्वार्थं स्वानुमितिहेतुः । तथा हि**

**- स्वयमेव भूयोदर्शनेन 'यत्र यत्र धूमः तत्र तत्र अग्निर'ति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः,**

**- तद्गते च अग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति, 'यत्र यत्र धूम तत्र तत्राग्निः' इति, तदनन्तरं 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् 'पर्वतो वह्निमानि'ति ज्ञानमनुमितिरुत्पद्यते । तदेतत् स्वार्थानुमानम् ॥**

**दीपिका - तत्रेति । उभयोर्मध्ये इत्यर्थः । स्वार्थानुमितिं दर्शयति - स्वयमेवेति । भूयोदर्शनेनेति । ननु पार्थिवत्वलौहलेख्यत्वादौ शतशः सहचारदर्शनेऽपि मण्यादौ व्यभिचारोपलब्धेर्भूयोदर्शनेन कथं व्याप्तिग्रह इति चेत् न, व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात् । व्यभिचारज्ञानं द्विविधम्, निश्चयः शङ्का च ॥**

**तद्विरहः क्वचित्तर्कात् । क्वचित् स्वतः सिद्ध एव । धूमाग्न्योः व्याप्तिग्रहे कार्यकारणभावभङ्गप्रसङ्गलक्षणस्तर्को व्यभिचारशङ्कानिवर्तकः । ननु सकलवह्निधूमयोरसन्निकर्षात्कथं व्याप्तिग्रह इति चेत् ! न, वह्नित्वधूमत्वरूपसामान्यप्रत्यासत्त्या सकलवह्निधूमज्ञानसम्भवात् । तस्मादिति । लिङ्गपरामर्शादित्यर्थः ॥**

**सरलार्थः** - यत्र यत्र पार्थिवत्वं तत्र तत्र लौहलेख्यत्वं इति पार्थिवत्व लौहलेख्यत्वयोः भूयः सहचारदर्शनेऽपि तयोः धर्मयोः व्याप्तिर्न भवति, हीरकादौ हेतोः व्यभिचारदर्शनात्, सहचारदर्शन न व्याप्तिग्रहजनकमिति चेत्, समादधाति न इति। व्यभिचारज्ञानाभावसहितं यत् हेतुसाध्ययोः सहचारदर्शनं तदेव व्याप्तिज्ञानजनकं न केवलं सहचारज्ञानमित्यर्थः । निश्चयशङ्काभेदेन व्यभिचारज्ञानं द्विविधम् । तत्र क्वचित् शंकाविरहः तर्कादिति 'धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादितर्कात्' इत्यर्थः । 'क्वचित् स्वतः सिद्ध एव' इत्युक्ते तर्काऽतिरिक्तकारणाऽभावादेव निवर्तते इत्यर्थः । तत्र शङ्का- एकत्र वह्निधूमयोः सहचारदर्शनेन अपरेषां असन्निकर्षेण च कथं व्याप्तिग्रहः ? इति ।

तत्र समाधानम् - वह्नित्वेन सकलवह्नीनां धूमत्वेन निखिलधूमानां च सामान्यलक्षणात्मकाऽलौकिकसन्निकर्षात् निखिलधूमेषु व्याप्तिग्रहः सम्भवतीत्यर्थः । तस्मात् लिङ्गपरामर्शात् 'पर्वतो वह्निमान्' इति स्वार्थानुमितिरुपत्पद्यते इत्यर्थः।

**परार्थानुमानम्**

**मूलम् - यत्तु स्वयं धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम् ।**

**यथा - १. पर्वतो वह्निमान् ।**

**२. धूमवत्त्वात् ।**

**३. यो यो धूमवान् स स विह्निमान्, यथा महानसम् ।**

**४. तथा च अयम् ।**

**५. तस्मात्तथा । इति**

**अनेन प्रतिपादिताल्लिङ्गात् परोप्यग्निं प्रतिपद्यते ॥**

**दीपिका - परार्थानुमानमाह - यत्त्विति । यच्छब्दस्य 'तत्परार्थानुमानम्' इति तच्छब्देनान्वयः । पञ्चावयववाक्यम् उदाहरति - यथेति ।**

**सरलार्थः** - अनुमाता स्वयं धूमादग्निं अनुमाय परस्य अनुमेयप्रतिपत्त्यर्थं पञ्चावयवयुक्तवाक्यस्य प्रयोगं करोति। यथा - पर्वते वह्निरस्ति इति प्रतिज्ञां करोति । कस्मात् इतिजिज्ञासायां 'धूमवत्त्वात्' इति समादधाति । धूमसत्त्वे वह्निसत्त्वम् इत्यत्र किं प्रमाणम् इति चेत्, यथा महानसे भूयो भूयः, यदा यदा धूम उत्पद्यते स्म तदा तदा वह्निः भवत्येव तथा इति उत्तरयति। तथैव अयं पर्वतोऽपि धूमवान् वर्तते । तस्मात् पर्वतोऽपि वह्निमान् भवतीति प्रयुक्त पञ्चावयववाक्यद्वारा परोऽपि मध्यस्थोऽपि अग्निं प्रतिपत्तुमर्हति इत्यर्थः ।

**पञ्चावयवाः**

**पञ्चावयवाः**

↓

| ↓ | ↓ | ↓ | ↓ | ↓ |
|---|---|---|---|---|
| प्रतिज्ञा | हेतुः | उदाहरणम् | उपनयः | निगमनम् |
| ↓ | ↓ | ↓ | ↓ | ↓ |
| पर्वतो वह्निमान् | धूमवत्त्वात् | महानसम् | तथाचायम् | तस्मात्तथेति |

**मूलम्** – प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः ।

१. 'पर्वतो वह्निमान्' इति – प्रतिज्ञा ।

२. 'धूमवत्त्वात्' इति – हेतुः ।

३. 'यो यो धूमवान् स स वह्निमान्' इति उदाहरणम् ।

४. 'तथा चायम्' इति उपनयः ।

५. 'तस्मात्तथा' इति निगमनम् ।

**दीपिका – अवयवस्वरूपमाह – प्रतिज्ञेति । उदाहृतवाक्येषु प्रतिज्ञादिविभागमाह – पर्वतो वह्निमानिति। साध्यवत्तया पक्षवचनं – प्रतिज्ञा । पञ्चम्यन्तं लिङ्गप्रतिपादकवचनं – हेतुः । व्याप्तिप्रतिपादकं वचनम् – उदाहरणम् । व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनयः । हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं – निगमनम् । पक्षज्ञानं प्रतिज्ञा – प्रयोजनम् । लिङ्गज्ञानं – हेतुप्रयोजनम् । व्याप्तिज्ञानम् – उदाहरणप्रयोजनम् । पक्षधर्मज्ञानम् – उपनयप्रयोजनम् । अबाधितत्वादिकं – निगमनप्रयोजनम् ।**

**सरलार्थः** – प्रतिज्ञाद्यन्यतमत्वम् अवयवत्वमिति ।

– साध्यविशिष्टपक्षबोधकं वचनमेव प्रतिज्ञा ।

– पञ्चमयन्तं तृतीयान्तं वा लिङ्गवचनमेव हेतुः ।

– व्याप्तिप्रतिपादकदृष्टान्तवचनमेव उदाहरणम् ।

– उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमेव उपनयः ।

– पक्षे साध्यस्य बाधरहितत्वप्रतिपादकवचनमेव निगमनम् इति स्मर्तव्यम् ।

**मूलम् – स्वार्थनुमिति – परार्थानुमित्योः लिङ्गपरामर्श एव करणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ॥**

**दीपिका – अनुमितिकरणमाह – स्वार्थेति । ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेव अनुमिति संभवे विशिष्टपरामर्शः किमर्थमङ्गीकर्तव्यमिति चेत् ! न, 'वह्न्याप्यधूमवानयम्' इति शाब्दपरामर्शस्थले परामर्शस्य आवश्यकता लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात् । लिङ्गं न करणम् । अतीतानागतादौ व्यभिचारात् । 'व्यापारवत्कारणं करणम्' इति मते परामर्शद्वारा व्याप्तिज्ञानं करणम् । तज्जन्यत्वे सति तज्जन्यजनको व्यापारः । अनुमानमुपसंहरित – तस्मादिति ॥**

**सरलार्थः** – प्राभाकराणां मते पक्षधर्मता–व्याप्तिस्मरणादिना एव लाघवेन अनुमितिसम्भवात् विशिष्टपरामर्शः किमर्थमङ्गीकर्तव्यमिति तेषाम् आक्षेपः । तत्र समाधानम् 'वह्निव्याप्यधूमवानयम्' इति शाब्दादिपरामर्शस्थले पक्षधर्मता–व्याप्तिज्ञानद्वयं विनाऽपि नैयायिकैरिव मीमांसकैरपि अनुमितिस्वीकारात्, तत्र परामर्शस्य आवश्यकतया लाघवात् सर्वत्र परामर्शस्यैव कारणत्वं स्वीकर्तव्यमित्यर्थः ।

तत्र प्राचीनाः व्याप्यत्वेन ज्ञायमानं लिङ्गम् अनुमितिकरणमिति वदन्ति, तन्नसमीचीनमिति कथयति लिङ्गं न करणमिति। यतो हि तादृशे लिङ्गे अतीत अनागतधूमयोः व्यतिरेकव्यभिचारादिति । उदा – 'इयं यज्ञशाला – वह्निमती आसीत्, अतीतधूमात्', एवम् 'इयं यज्ञशाला – वह्निमती भविष्यति, अनागतधूमात्' इत्यादिस्थलेषु अनुमितिः अनुभवसिद्धत्वात् तत्र तस्मिन् क्षणे (अव्यवहितपूर्वं) भूतभविष्यद्धूमादेरसत्त्वात् तादृशानुमितिरेव भवितुं नार्हतीत्यर्थः ।

'व्यापारवत्कारणं करणमि'ति स्वीकर्तृणां मते परामर्शद्वारा एव व्याप्तिज्ञानं करणं भवतीत्यर्थः । तच्च व्यापारः तज्जन्यत्वे सति तज्जन्यजनकस्वरूपः, व्याप्तिज्ञानजन्यत्वे सति व्याप्तिज्ञानजन्यानुमितेः जनकत्वात् परामर्शो व्यापार इत्यर्थः । तस्मात् अनुमानं लिङ्गपरामर्शोऽनुमानमित्यर्थः ॥

**४. लिङ्गस्य त्रैविध्यम्**

**मूलम् - लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि, यथा - वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा- महाह्रद इति व्यतिरेकव्याप्तिः ॥**

**लिङ्गम्**

↓

| ↓ | ↓ | ↓ |
|---|---|---|
| **अन्वयव्यतिरेकि** | **केवलान्वयि** | **केवलव्यतिरेकि** |

**दीपिका - लिङ्गं विभजते - लिङ्गमिति । अन्वयव्यतिरेकिं लक्षयति - अन्वयेनेति । हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः, तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः ॥**

**सरलार्थः** - त्रिप्रकारकं लिङ्गं मूलोक्तं स्पष्टम् । अन्वयव्यतिरेकि नाम अन्वयव्याप्त्या व्यतिरेकव्याप्त्या च विशिष्टं या यत्तदन्वयव्यतिरेकि । अन्वयव्यतिरेकिणोः लक्षणद्वयमपि स्पष्टम् । उदाहरणद्वमपि यथामूलं स्पष्टम् ।

**मूलम् - अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा 'घटोऽभिधेयः, प्रमेयत्वात्, पटवदि'ति । अत्र प्रमेयत्व-अभिधेयत्वयोः व्यतिरेकव्याप्तिर्नास्ति । सर्वस्याऽपि प्रमेयत्वादभिधेयत्वाच्च ॥**

**दीपिका - केवलान्वयिनो लक्षणमाह - अन्वयेनेति । केवलान्वयिसाध्यकं लिङ्गं केवलान्वयि । अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् । केवलान्वयि उदाहरति - 'घटोऽभिधेयः, प्रमेयत्वात्' इति । ईश्वरप्रमाविषयत्वं सर्वपदाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः ।**

**सरलार्थः** - केवलान्वयिलिङ्गं नाम सर्वत्र अन्वयिसाध्यकं लिङ्गमेव । ईश्वरस्य सर्वज्ञत्वात् तस्य ज्ञानस्य सर्वविषयक-प्रमाविषयकत्वात् सर्वत्र प्रमा विषयत्वस्य प्रमेयत्वस्य एवं सर्वत्राभिधेयत्व साध्यस्य च सत्वात् व्यतिरेको नास्तीत्यर्थः ॥

**मूलम् - व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा - पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात् । यदितरेभ्यो न भिद्यते न तङ्गन्धवत्, यथा जलम्, न चेयं तथा, तस्मान्न तथेति, अत्र यद्गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात् ॥**

**दीपिका - केवलव्यतिरेकिणो लक्षणमाह - व्यतिरेकेति । केवलव्यतिरेकि उदाहरति पृथिवीति । नन्वितरभेदः प्रसिद्धो ? न वा ? आद्ये - यत्र प्रसिद्धस्तत्र हेतुसत्त्वे अन्वयित्वम्, असत्त्वे असाधारण्यम् । द्वितीये - साध्यज्ञानाभावात् कथं तद्विशिष्टानुमितिः ? विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात् । प्रतियोगिज्ञानाभावाद्व्यतिरेक-व्याप्तिज्ञानमपि न स्यादिति चेत् ! न, जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्यते । त्रयोदशत्वावच्छिन्नसाध्यस्यैकाधिकरणवृत्तित्वाभावान्नान्वयित्वासाधारण्ये । प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमितिः । साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकव्याप्तिनिरूपणञ्च यदितरेति ॥**

**सरलार्थः** - केवलव्यतिरेकि नाम सर्वत्र व्यतिरेकमात्रव्याप्तिकं लिङ्गमेव । यथा पृथिवीति स्थलमुदाहरणम् । तत्र प्रश्नः इतरभेदः प्रसिद्धो न वा ? इति । यदि प्रसिद्धः तर्हि हेतुसत्त्वे अन्वयः, हेत्वभावे असाधारण्यदोषश्च भवति । इतरभेदस्य विशेषणरुपस्य ज्ञानाभावाद् विशिष्टज्ञानस्वरूपा साध्यविशिष्टपक्षविषयणी अनुमितिः पूर्वोक्त न्यायेन भवितुं नार्हति इति चेत् ! समादधाति - पृथिवी इतरेभ्यो भिद्यते इत्यत्र पृथिवीतः इतराणि जलादित्रयोदशानाम् अन्योन्याभावानां तेषु प्रत्येकं परस्परं

प्रसिद्धानां सामानाधिकरण्यं पृथिव्यां साध्यते । तथा च यन्न तादृश सामानाघिकरण्याश्रयाश्रयं साध्यते तन्न गन्धवत्, यथा जलम्, इयं पृथिवी न तथा = गन्धाभाववती न इत्यर्थः । तस्मात् न तथा अर्थात् पृथिवी जलादीत्रयोदशान्योन्याभावाभाववती न परन्तु पृथिवी जलादि त्रयोदशान्योन्याभावाभाववतीत्यर्थः इत्यर्थः । ननु अत्र किमर्थं अन्वयदृष्टान्तस्य अभावात् पृथिवीमात्रस्य पक्षत्वाच्च केवलव्यतिरेकीत्यर्थः ।

**५. पक्षसपक्षविपक्षलक्षणानि**

**मूलम् - सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः ।**

**दीपिका - पक्षलक्षणममाह - सन्दिग्धेति । ननु श्रवणानन्तरभाविमननस्थले अव्याप्तिः । तत्र वेदवाक्यैरात्मनो निश्चितत्वेन सन्देहाभावात् । किञ्च प्रत्यक्षेऽपि वह्नौ यत्रेच्छयानुमितिः तत्राव्याप्तिरिति चेत् ! न, उक्त पक्षताश्रयत्वस्य पक्षलक्षणत्वात् ।**

**सरलार्थः** - 'यस्मिन् साध्यः सन्दिग्धो भवति स पक्षः' इति पक्षस्य लक्षणकथने यत्र विना संशयं 'द्यावाभूमिं जनयन्' इत्यादिवेदवाक्यश्रवणानन्तरं स्वयमेव परमात्मनि जगतः कर्तृत्वं निश्चिनोति तत्र पक्षतालक्षणम् अव्याप्तं भवति, तथा प्रत्यक्षेऽपि सिषाघविषया वह्नेः यत्र अनुमितिः तत्रापि संशयस्य अभावात् अव्याप्तिः इति चेत् ! उत्तरयति, 'सिषाधयिषाविरहविशिष्ट-सिद्ध्यभाव' रुप पक्षताश्रयत्वस्य पक्षतालक्षणत्वेन न दोष इति ।

**मूलम् - निश्चितसाध्यवान् सपक्षः । यथा तत्रैव महानसम् ॥**

**दीपिका - सपक्षलक्षणमाह - निश्चितेति ॥**

**सरलार्थः** - यत्र पक्षे साध्यः निश्चितः सः सपक्षः । यथा महानसम् । महानसे वह्नेः निश्चितत्वात् सः सपक्ष इत्यर्थः ॥

**मूलम् - निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव महाह्रदः ॥**

**दीपिका - विपक्षलक्षणमाह - निश्चितेति ॥**

**सरलार्थः** - यत्र पक्षे साध्याभावः निश्चितः सः विरुद्धः पक्ष इत्यर्थः । यथा महाह्रदः । जलाशये वह्नेरभावः निश्चितः। तस्मात् सः विपक्ष इत्यर्थः ॥

**स्वाध्यायः**

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) व्याप्तिविशिष्टपक्षधर्मताज्ञानम् - ..................... । (परामर्शः, व्याप्तिः, पक्षता)

(२) परामर्शजन्यं ज्ञानम् ................. अस्ति । (अनुमानम्, अनुमितिः, व्याप्तिः)

(३) अनुमानस्य भेदाः ................. सन्ति । (२, ३, ४)

(४) प्रतिज्ञायाः प्रयोजनम् ............... अस्ति । (व्याप्तिज्ञानम्, पक्षज्ञानम्, पक्षधर्मज्ञानम्)

(५) न्यायदर्शने प्रमाणानां संख्या ................ अस्ति । (२, ३, ४)

(६) लिङ्ग संख्या ............. वर्तते । (३, ४, ५)

(७) पञ्चावयववाक्ये अवयवानां सङ्ख्याऽस्ति ............... । (३, ४, ५)

(८) अन्वयमात्रव्याप्तिकं लिङ्गम् ............... अस्ति । (अन्वयव्यतिरेकि, केवलव्यतिरेकि, केवलान्वयि)

(९) निश्चितसाध्याभाववान् ............... अस्ति । (विपक्षः, सपक्षः, पक्षः)

(१०) तज्जन्यत्वे सति तज्जन्यजनको ................ वर्तते । (व्याप्तिः, व्यापारः, पक्षः)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) अन्वयव्याप्तिलक्षणं किम् ?

(२) तस्मात्तथेति किम् ?

(३) स्वार्थानुमानं किम् ?

(४) कः परामर्शः ?

(५) अनुमानलक्षणं किम् ?

(६) कः पक्षः ?

(७) प्रतिज्ञा नाम का ?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) परार्थानुमानं कीदृशम् ?

(२) के पञ्चावयवाः ?

(३) का नाम व्याप्तिः ?

(४) का नाम पक्षधर्मता ?

(५) अन्वयव्यतिरेकि लक्षणं किम् ?

**४. टिप्पणीः लिखत ।**

(१) पक्ष-सपक्ष-विपक्षलक्षणानि ।

(२) व्याप्तिस्वरूपम् ।

(३) परामर्शस्वरूपम् ।

**५. सविस्तरम् उत्तरं लिखत ।**

(१) स्वार्थानुमितिपरार्थानुमित्योः स्वरूपं भेदपुरस्सरं लिखत ।

(२) लिङ्गभेदान् लक्षणोदाहरणैः विशदीकुरुत ।

(३) अनुमितेः लक्षणं दीपिकानुसारं व्याख्यात ।

•

# ९ | हेत्वाभासनिरूपणात् अनुमानप्रमाणान्तो भागः

**प्रस्तावना**

प्रत्यक्षानुमानोपमानशब्दप्रमाणेषु अन्यतमे अनुमानप्रमाणे लिङ्गनिरूपणानन्तरं हेत्वाभासनिरूपणं विहितं वर्तते । हेतुवदाभासन्ते प्रकाशन्त इति हेत्वाभासा: दुष्टहेतव इत्यर्थ: । तेषां लक्षणस्वरूपभेदान् उदाहरणसहितम्, अधुना विचारयाम: ।

**हेत्वाभाससामान्यलक्षणम्**

**मूलम् - सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिता: पञ्च हेत्वाभासा: ।**

**दीपिका - एवं सद्धेतून् निरूप्य असद्धेतून् निरूपयितुं विभजते - सव्यभिचारेति । अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम् ।**

**सरलार्थ:** - पूर्वपाठे सद्धेतून् - व्याप्त्यादिविशिष्टहेतून् केवलान्वयिकेवलव्यतिरेक्यादीन् निरूप्य प्रसङ्गात् असद्धेतून् निरूपयितुमारभते सव्यभिचारेति । ते दोषा: पञ्चप्रकारा: । सव्यभिचार:, विरोध:, सत्प्रतिपक्ष:, असिद्धि: बाधश्चेति । एतै: दोषै: विशिष्टा: हेतव: दुष्टहेतव इत्यर्थ: । दोषसामान्यलक्षणकथने सति दोषवत्त्वरूपदुष्टलक्षणस्य सुतरां लाभ इति दोषलक्षणं दर्शयति अनुमितीति । हेतौ दोषज्ञाने सति अनुमितिप्रतिबन्ध: वा व्याप्तिज्ञानस्य प्रतिबन्ध: जायते । तथा च अस्य लक्षणस्य बाधस्थले समन्वय: - 'वह्निरनुष्ण:- द्रव्यत्वादि'त्यत्र अनुमिति: वह्निरनुष्णेत्यनुमिति: । अनुमिते: प्रतिबन्धकं यत् यथार्थज्ञानं उष्णत्ववद्वह्निरिति स्पार्शनप्रत्यक्षं गृहीतम् । तत्वस्य तद्विषयत्वस्य स्वरूपसम्बन्धेन उष्णत्ववद्वह्निरूपहेत्वाभासे सत्त्वात् लक्षणसमन्वय: ॥

**व्यभिचारस्य त्रैविध्यम्**

**सव्यभिचार:**

↓

| ↓ | ↓ | ↓ |
|---|---|---|
| साधारण: | असाधारण: | अनुपसंहारि |

**मूलम् - सव्यभिचारोऽनैकान्तिक: । स त्रिविध: - साधारण-असाधारण-अनुपसंहारि-भेदात् ।**

**साधारण: - तत्र साध्याभाववद्वृत्ति: साधारणोऽनैकान्तिक: । यथा - 'पर्वतो वह्निमान् प्रमेयत्वादि'ति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।**

**दीपिका - सव्यभिचारं विभजते - स त्रिविध इति । साधारणं लक्षयति तत्रेति । उदाहरति यथेति ॥**

**सरलार्थ:** - एक: अन्त: एकान्त:, स एव ऐकान्त: । स्वार्थे ठक्, साध्यनिरूपितहेतुमानित्यर्थ: । न एकान्तिक इत्यनैकान्तिक: । स: त्रिप्रकारक:, साधारण अनैकान्तिक:, असाधारण-अनैकान्तिक:, अनुपसंहारिभेदात् । साध्यस्य अभाववति वृत्ति: यस्य स: साधारणो अनैकान्तिक इत्यर्थ: ।

**मूलम् - सर्वसपक्षविपक्षव्यावृत्त: पक्षमात्रवृत्तिरसाधारण: यथा 'शब्दो नित्य:, शब्दत्वादि'ति । शब्दत्वं हि सर्वेभ्यो नित्येभ्यो अनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति ॥**

**दीपिका - असाधारणं लक्षयति - सर्वेति ॥**

**सरलार्थः** – सर्वेभ्यः सपक्षेभ्यः विपक्षेभ्यश्च व्यावृत्तः सन् केवलपक्षे वृत्तिः यः सः असाधारणः । यथा शब्दो नित्यः शब्दत्वादित्यत्र शब्दत्वं नित्येभ्यः आकाशादिभ्यः, अनित्येभ्यः कार्यरूपपृथिव्यादिभ्यश्च व्यावृत्तः केवलशब्दे विद्यमानत्वात् अयं असाधारण इत्यर्थः ॥

**मूलम् – अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा – सर्वम् अनित्यम् प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति ॥**

**दीपिका – अनुपसंहारिणो लक्षणमाह – अन्वयेति ।**

**सरलार्थः** – यस्य अन्वयदृष्टान्तव्यतिरेकदृष्टान्तौ न स्तः स अनुपसंहारी । यथा सर्वम् अनित्यं प्रमेयत्वादित्यत्र सर्वस्यापि पक्षत्वात् तद्भिन्नस्य सर्वभिन्नस्य पदार्थस्य अप्रसिघ्घत्वात् दृष्टान्तस्य अभावात् अयम् अनुपसंहारीत्यर्थः ॥

**विरुद्धसत्प्रतिपक्षलक्षणे**

**विरुद्धः**

**मूलम् – साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा — 'शब्दो नित्यः कृतकत्वात्' इति । कृतकत्वं हि नित्यत्वाऽभावेनाऽनित्यत्वेन व्याप्तम् ॥**

**दीपिका – विरुद्धं लक्षयति साध्येति ॥**

**सरलार्थः** – साध्याभाववति हेतोः नियमेन विद्यमानत्वमेव विरोधः । यथा शब्दो नित्यः कृतकत्वादित्यत्र पक्षः — शब्दः, साध्यं – नित्यत्वम्, हेतुः – कृतकत्वम्, साध्याभाववति नित्यत्वाभाववति अनित्ये हेतोः कृतकत्वस्य व्याप्तत्वात् अयं विरुद्धहेतुरित्यर्थः ॥

**सत्प्रतिपक्षः**

**मूलम् – यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः । यथा 'शब्दो नित्यः, श्रावणत्वात्, शब्दत्ववत् ।' शब्दो अनित्यः, कार्यत्वात् घटवदिति ॥**

**दीपिका – सत्प्रतिपक्षं लक्षयति यस्येति ॥**

**सरलार्थः** – यस्य हेतोः साध्यस्य अभावसाधको प्रतिपक्षो हेतुः सः सत्प्रतिपक्ष इत्युच्यते । अयमेव 'प्रकरणसम' इत्युच्यते । उदाहरणे शब्दो नित्यः श्रावणत्वादित्यत्र साध्यः नित्यत्वम्, साध्याभावः अनित्यत्वम्, अनित्यत्वस्य साधकं प्रतिपक्षो हेतुः कार्यत्वरूपं वर्तते इति श्रावणत्वरूपहेतुः सत्प्रतिपक्षितो भवतीत्यर्थः । विरुद्धसत्प्रतिपक्षयोः विशेषस्तु विरुद्धहेत्वाभासे हेतुरेकैव भवति, सत्प्रतिपक्षे हेतोर्द्वित्वेन ज्ञातव्यः ॥

**असिद्धस्य प्रकारत्रयम्**

**असिद्धः**

↓

↓ ↓ ↓

आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धः

**आश्रयासिद्धः**

**मूलम् – असिद्धः त्रिविधः, आश्रयासिद्धः, स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति । आश्रयासिद्धो यथा – गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजाऽरविन्दवदिति । अत्र गगनारविन्दमाश्रयः, स च नास्त्येव ॥**

**दीपिका – आश्रयासिद्धमुदाहरति गगनेति ॥**

**सरलार्थः** – त्रिप्रकारकाऽसिद्धिमध्ये आश्रयासिद्धिमुदाहरति गगनारविन्देति । आश्रयासिद्धिर्नाम पक्षे पक्षतावच्छेदकाभावः। अत्र पक्षे अरविन्दे गगनवृत्तित्वं नास्तीति पक्षे पक्षतावच्छेदकाभाव एव दोष इत्यर्थः ॥

**स्वरूपासिद्धः**

**मूलम् – स्वरूपासिद्धो यथा – शब्दोऽनित्यः चाक्षुषत्वात्, रूपवदिति । अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात् ॥**

**दीपिका – स्वरूपासिद्धमुदाहरति – शब्द इति ॥**

**सरलार्थः** – स्वरूपासिद्धो नाम पक्षे हेत्वभावः । शब्दो अनित्यः चाक्षुषत्वादित्यत्र पक्षः शब्दः, शब्दे हेतुः चाक्षुषत्वं चक्षुरिन्द्रिजन्यप्रत्यक्षविषयत्वं नास्ति, शब्दस्य श्रावणत्वात् श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वात् चाक्षुषत्वरूपहेतुः स्वरूपासिद्ध इत्यर्थः ॥

**व्याप्यत्वासिद्धः**

**मूलम् – सोपाधिको हेतुर्व्याप्यत्वाऽसिद्धः । साध्यव्यापकत्वे सति साधनाऽव्यापकत्वमुपाधिः । साध्यसमानाधिकरणाऽत्यन्ताऽभावाऽप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठाऽत्यन्ताऽभावप्रतियोगित्वं साधनाऽव्यापकत्वम् । यथा 'पर्वतो धूमवान् वह्निमत्वादि'त्यत्र आर्द्रेन्धनसंयोग उपाधिः । तथा हि 'यत्र धूमस्तत्राऽऽर्द्रेन्धनसंयोगः' इति साध्यव्यापकत्वम् । 'यत्र वह्निस्तत्राऽऽर्द्रेन्धनसंयोगो नास्ति' अयोगोलके आर्द्रेन्धनसंयोगोऽभावादिति साधनाऽव्यापकत्वम् । एवं साध्यव्यापकत्वे सति साधनाऽव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वाऽसिद्धम् ॥**

**दीपिका – व्याप्यत्वासिद्धस्य लक्षणमाह – सोपाधिक इति । उपाधेर्लक्षणमाह – साध्येति । उपाधिश्चतुर्विधः – केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकः, उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति । आद्यः आर्द्रेन्धनसंयोगः । द्वितीयो यथा – 'वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वात्' इत्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वम् । तृतीयो यथा – 'प्रागभावो विनाशी जन्यत्वात्' इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम् ॥ चतुर्थस्तु 'प्रागभावो विनाशी प्रमेयतवात्' इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम्॥**

**सरलार्थः** – उपाधिसहितो हेतुः व्याप्यत्वासिद्ध इत्यर्थः । स च उपाधिः साध्यव्यापकत्वे सति साधनाऽव्यापकत्वरूपः। साध्येन सह समानम् अधिकरणं यस्य सः साध्यसमानाधिकरणम् तादृशात्यन्ताभावस्य अप्रतियोगित्वं साध्यव्यापकत्वम् । साधनम् अस्य अस्तीति साधनवत्, तन्निष्ठो योऽत्यन्ताभावः तत्प्रतियोगित्वं साधनाऽव्यापकत्वमित्यर्थः । उपाधेः चातुर्विध्यं दीपिकायां स्पष्टं प्रतिपादितम् । तत्र प्रथमः केवलसाध्यव्यापकः आर्द्रेन्धनसंयोग उपाधिः । द्वितीयः – वायुः प्रत्यक्ष प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र बहिर्द्रव्यत्वविशिष्टप्रत्यक्षत्वं पृथिवीजलतेजस्सु वर्तते, तत्र उद्भूतरूपवत्त्वमस्तीति साध्यवापकत्वम्, प्रत्यक्षस्पर्शाश्रयत्वरूपो हेतुर्वायौ वर्तते, तत्र उद्भूतरूपवत्त्वं नास्तीति साधनाऽव्यापकत्वम्, अतः उद्भूतरूपवत्त्वम् उपाधिः । तृतीयः – प्रागभावो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्न–अनित्यत्वव्यापकं भावत्वम् ुपाधिः। चतुर्थः – प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्यत्वविशिष्टविनाशित्वव्यापकं भावत्वमुपाधिरिति सारः॥

**बाधलक्षणम्**

**मूलम् – यस्य साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः सः बाधितः । यथा – 'वह्निरनुष्णो द्रव्यत्वादि'ति । अत्राऽनुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम् ॥**

**दीपिका - बाधितस्य लक्षणमाह - यस्येति । अत्र बाधस्य ग्राह्याभावनिश्चयत्वेन, सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबन्धकत्वम् । इतरेषां परामर्शप्रतिबन्धकत्वम् । तत्रापि साधारणस्याव्यभिचाराभाववत्तया, विरुद्धस्य सामानाधिकरण्याभाववत्तया, व्याप्यत्त्वासिद्धस्य विशिष्टव्याप्त्यभाववत्तया, असाधारणानुपसंहारिणोर्व्याप्तिसंशयाधायकत्वेन व्याप्तिज्ञानप्रतिबन्धकत्वम् । आश्रयासिद्धस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिबन्धकत्वम् । उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः । सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धे अन्तर्भवतीति प्राञ्चः । निग्रहस्थानान्तरमिति नवीनाः ॥**

**सरलार्थः** - यस्य हेतोः साध्याभावः प्रत्यक्षादिप्रमाणान्तरेण पक्षे निश्चितः सः बाधित इत्यर्थः । यथा वह्निरनुष्णः द्रव्यत्वादित्यत्र साध्यः अनुष्णत्वं, तस्य अभावः स्पार्शनप्रत्यक्षेण पक्षे वह्नौ निश्चितत्वात् अस्य बाधितत्वम् ।

दोषज्ञानानां केन केन कं प्रति प्रतिबन्धकतेति दर्शयति दीपिकायां यथा - बाधस्य ग्राह्याभावनिश्चयत्वेन प्रतिबन्धकत्वम् । सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबन्धकत्वम् । व्यभिचार-विरोधाऽसिद्धानां मध्ये कस्यचित् साक्षात्, कस्यचित् च व्याप्तिज्ञानप्रतिबन्धद्वारा परामर्शप्रतिबन्धकत्वम् । व्यभिचारादिष्वपि साधारणस्य अव्यभिचाराभाववत्तया प्रतिबन्धकत्वम् । विरुद्धस्य सामानाधिकरण्याभाववत्तया प्रतिबन्धकत्वम् । व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभाववत्तया प्रतिबन्धकत्वम् । असाधारणानुपसंहारिणोः व्याप्तिसंशयाधायकत्वेन व्याप्तिज्ञानप्रतिबन्धकत्वम्। आश्रयासिद्धिस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिबन्धकत्वम् । उपाधिः तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः । सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धौ अन्तर्भवतीति प्राचीनाः, वादिना प्रतिवादिप्रयोगे सिद्धसाधनदोषोद्भावने सति प्रतिवादी निगृहीतो भवतीत्यतः निग्रहस्थानविशेष इति नवीनानामभिप्राय इत्यर्थः ।

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः .............. अस्ति । (साधारणः, असाधारणः, अनैकान्तिकः)

(२) शब्दो नित्यः कृतकत्वादित्यत्र हेतुः ............... वर्तते । (कृतकत्वात्, कृतकत्वम्, अकृतकत्वम्)

(३) असिद्ध भेदाः ............... सन्ति । (२, ३, ४)

(४) यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः ............... वर्तते । (सत्प्रतिपक्षः, अनैकान्तिकः, विरुद्धः)

(५) हेत्वाभासानां सङ्ख्या .................. अस्ति । (३, ४, ५)

(६) सव्यभिचारस्य भेदाः ............... सन्ति । (३, ४, ५)

(७) बाधज्ञानम् ............... प्रतिबन्धकमस्ति - (व्याप्तिज्ञानस्य, पक्षधर्मताज्ञानस्य, अनुमितेः)

(८) उपाधेः भेदाः ................ सन्ति । (४, ५, ७)

(९) साध्यव्यापकत्वे सति साधनाऽव्यापकत्वम् ............... अस्ति । (व्यापारः, उपाधिः, विरुद्धः)

(१०) हेतुवदाभासन्त इति । (व्यभिचारः, हेत्वाभासाः, गुणाः)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) हेत्वाभाससामान्यलक्षणं किम्?

(२) साधारणोऽनैकान्तिकः कः?

(३) अनुपसंहारिणः लक्षणं किम्?

(४) विरुद्धस्य लक्षणं किम्?

(५) किं नाम साध्यव्यापकत्वम्?

(६) साधनाऽव्यापकत्वं किम्?

(७) बाधलक्षणं किम्?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) उपाधेर्लक्षणं किम्?

(२) सत्प्रतिपक्षस्य उदाहरणमेकं लिखत ।

(३) आश्रयासिद्धेः उदाहरणं लिखत ।

(४) अनुपसंहारिणः उदाहरणं लिखत ।

(५) सव्यभिचारः कतिविधः ? के च ते?

**४. टिप्पणीः लिखत ।**

(१) सत्प्रतिपक्षः ।

(२) बाधितः ।

(३) असाधारणः ।

**५. सविस्तरम् उत्तरं लिखत ।**

(१) सव्यभिचारहेत्वाभासं यथादीपिकां विशदीकुरुत ।

(२) असिद्धिहेत्वाभासस्वरूपं प्रतिपादयत ।

(३) हेत्वाभाससामान्यलक्षणं व्याख्यात ।

•

# १० उपमानं शब्दप्रमाणञ्च

**प्रस्तावना**

प्रमाणचतुष्टये अवसरसङ्गतिमभिप्रेत्य अनुमानप्रमाणानन्तरं उपमानप्रमाणं निरूपयति ।

**उपमितिक्रमः**

**मूलम् - उपमितिकरणम् उपमानम् । संज्ञा-संज्ञि-समबन्धज्ञानम् उपमितिः, तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणम् अवान्तरव्यापारः । तथा हि - कश्चिद्गवयशब्दवाच्यमजानन् कुतश्चिदारण्यकपुरुषात् 'गोसदृशो गवय' इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति, तदनन्तरं 'अयं गवयशब्दवाच्य' इत्युपमितिरुत्पद्यते॥**

**दीपिका - उपमानं लक्षयति - उपमितीति ॥**

**सरलार्थः** - उपमानम् नाम उपमितेः करणम् । उपमितिर्नाम संज्ञा - पदम्, संज्ञी - अर्थः तयोः पदपदार्थयोः सम्बन्धज्ञानमेव उपमितिः । तत्करणं सादृश्यज्ञानम् । तत्र व्यापारः अतिदेशवाक्यार्थस्मरणम् । उपमितिः फलम् । अन्यत् सर्वं सरलम् ॥

**शब्दलक्षणम्**

**मूलम् - आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः, यथा 'गामानय शुक्लां दण्डेने'ति ॥ शक्तं पदम् । 'अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः' ॥**

**दीपिका - शब्दं लक्षयति - आप्तेति । वाक्यं लक्षयति - वाक्यमिति ॥ पदलक्षणमाह - शक्तमिति । अर्थस्मृत्यनुकूलपदार्थसमबन्धः शक्तिः । सा च पदार्थान्तरमिति मीमांसकाः, तन्निरासार्थमाह - अस्मादिति । डित्थादीनामिव घटादीनामपि सङ्केत एव शक्तिः, न तु पदार्थान्तरमित्यर्थः ॥**

**गवादिशब्दानां जातावेव शक्तिः । विशेषणतया जातेः प्रथममुपस्थितत्वात्, व्यक्तिलाभस्त्वाक्षेपादिति केचित् तन्न, गामानयेत्यादौ वृद्धव्यवहारेण सर्वत्रानयनादेर्व्यक्तावेव सम्भवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात् ॥ शक्तिग्रहश्च वृद्धव्यवहारेण ॥**

**तथा हि व्युत्पित्सुर्बालो 'गामानय' इत्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य 'अश्वमानय गां बधान' इति वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अश्वपदस्य अश्वत्वविशिष्टे शक्तिः, इति व्युत्पद्यते ॥**

**ननु सर्वत्र कार्यपरत्वाद्व्यवहारस्य कार्यवाक्ये एव व्युत्पत्तिः, न सिद्धे इति चेत् ! न, 'काञ्च्यां त्रिभुवनतिलको भूपतिः' इत्यादौ सिद्धेऽपि व्यवहारात् । 'विकसितपद्मे मधूनि पिबति मधुकरः' इत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेऽपि मधुकरादिव्युत्पत्तिदर्शनाच्च ॥**

**लक्षणाऽपि शब्दवृत्तिः । शक्यसमबन्धो लक्षणा 'गङ्गायां घोष' इत्यत्र गङ्गापदवाच्यप्रवाहसम्बन्धादेव तीरोपस्थितौ तीरेऽपि शक्तिर्न कल्प्यते । सैन्धवादौ लवणाश्वयोः परस्परसम्बन्धाभावात् नानाशक्तिकल्पनम् ।**

**लक्षणा त्रिविधा - जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षमा चेति । यत्र वाच्यार्थस्यान्वयाभावः तत्र जहल्लक्षणा, यथा 'मञ्चाः क्रोशन्ति' । यत्र वाच्यार्थस्याप्यन्वयः तत्र अजहदिति, यथा - 'छत्रिणो गच्छन्ति' । यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहदिति, यथा 'तत्त्वमसीति' । गौण्यपि लक्षणैव, लक्ष्यमाणगुणसम्बन्धरूपा । यथा 'अग्निर्माणवक' इति । व्यञ्जनापि शक्तिलक्षणमन्तर्भूता शब्दशक्तिमूला अर्थशक्तिमूला च अनुमानादिना अन्यथासिद्धा। तात्पर्यानुपपत्तिर्लक्षणाबीजम् । तत्प्रतीतीच्छया उच्चरितत्वरूपतात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः, नानार्थानुरोधात् । प्रकरणादिकं तात्पर्यग्राहकम् ।**

**'द्वार'मित्यादौ 'पिधेही'ति शब्दाध्याहारः । ननु अर्थज्ञानार्थत्वात् शब्दस्यार्थमविज्ञाय शब्दाध्याहारासम्भवादर्थाध्याहार एव युक्त इति चेत्, न, पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञाने हेतुत्वात् । अन्यथा 'घटः कर्मत्वमानयनं कृतिः' इत्यत्रापि शाब्दज्ञानप्रसङ्गात् ॥**

**पङ्कजादिपदेषु योगरूढिः । अवयवशक्तिर्योगः, समुदायशक्ती रूढिः, नियतपद्मत्वज्ञानार्थं समुदायशक्तिः, अन्यथा कुमुदेऽपि प्रयोगप्रसङ्गः । 'इतरान्विते शक्तिः' इति प्राभाकराः । 'अन्वयस्य वाक्यार्थतया भानसम्भवादन्वयांशेऽपि शक्तिर्न कल्पनीया' इति गौतमीयाः ॥**

**सरलार्थः** - आप्तेन कथितं वाक्यं शब्दः । सः यथार्थवक्ता भवति । किं नाम वाक्यमिति चेत्, पदसमूह एव वाक्यम्। पदं च शक्तिविशिष्टम् । सा च शक्तिः पदपदार्थयोः समबन्ध रूपा । शक्तिः पदार्थान्तरमिति मीमांसकाः ईश्वरानङ्गीकारात्, ईश्वरेच्छाया अपि असम्भवादिति । तन्निरासार्थं कथयति, 'अस्मात्पदादयमर्थो बोद्धव्यः', अर्थात् एतत्पदजन्यबोधविषयतावानयमर्थो भवतु इति पदप्रकारकार्थविशेष्यक-ईश्वरेच्छा शक्तिरिति नैयायिकाः । डित्थास्य काष्ठमयकरिविशेषे यथा सङ्केतः तथा घटादिपदानामपि कम्बुग्रीवादिमति सङ्केत एव शक्तिः न तु पदार्थान्तरमित्यर्थः ।

तत्र गवादिपदानां जातावेव शक्तिः न तु व्यक्तौ, जातेः प्रथममुपस्थितत्वात् लाधवाच्चेति । तर्हि तत्र गवादिव्यक्तिबोधः कथमिति चेत्, अर्थापत्तिप्रमाणादेवेति केचिन्मीमांसकाः कथयन्ति । तन्न इत्यादिना दूषयन् प्रतिपादयन्ति नैयायिकाः - गौर्जाता, गामानयेत्यादौ समभिव्याहृतान्वयस्य जातौ बाधात्, गोत्वविशिष्टव्यक्तौ अन्वयाच्च जातिविशिष्टव्यक्तावेव शक्तिरिति । अन्यत् सरलम् ।

यथा शक्तिः पदपदार्थयोः सम्बन्धात्मिका वृत्तिः तथा लक्षणापि पदपदार्थयोः सम्बन्धात्मिका वृत्तिरस्ति । 'गङ्गायां घोष' इत्यत्र गङ्गापदार्थः - भगीरथ-रथखातावच्छिन्नजलप्रवाहः, तस्य समीपवर्ति तीरे गङ्गापदस्य लक्षणा इत्यर्थः । गङ्गातीरवृत्तितावान् घोष इति बोधः ॥

तत्र प्रश्नः तुल्ययुक्त्या सैन्धवादिपदानाम् एकत्र लवणे शक्तिः, अन्यत्र अश्वादिषु लक्षणा स्वीकर्तव्या, तेन नानार्थवाचकत्वानुपपत्तिरिति चेत् ! उत्तरयति, लवणार्थऽश्वार्थयोः परस्परसम्बन्धस्य अकल्पनात्, न कुत्रापि अर्थे सैन्धवपदस्य लक्षणा, अपि च नानार्थे नानाशक्तिरित्यर्थः ॥ अन्यत् सरलम् ॥ तत्र गौणी अपि लक्षणायामेव अन्तर्भवतीत्यर्थः। व्यञ्जनासम्पादनीयार्थस्य अनुमानेनैव लाभादर्थशक्तिमूलापि व्यञ्जना अन्यथासिद्धा इति । लक्षणायाः बीजं किमिति चेत्, तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति । अर्थात् तीरादिरूपार्थप्रतीति-इच्छया उच्चरितत्वं तीरतात्पर्यम्, तद्ज्ञानं वाक्यार्थज्ञाने हेतुरित्यर्थः, नानार्थस्थले तात्पर्यज्ञानं विना एकैकार्थबोधस्य असम्भवात् तात्पर्यज्ञानम् अवश्यं कारणमित्यर्थः ॥ प्रकरणादिकमपि तात्पर्यग्राहकमेव ।

'द्वारमि'त्यादौ 'पिधेही'ति अर्थाध्याहारो भवतीति प्राभाकराः । तथा सति पदज्ञानं विनैव शाब्दबोधापत्तिः स्यात्, अस्माकं मते तु पदाभावात् पदजन्या पदार्थोपस्थितिर्नास्ति, अतः न शाब्दबोधः किन्तु प्रत्यक्षमेव । अतः 'द्वारमि'त्युक्तौ 'पिधेही'ति शब्दाध्याहार एवेत्यर्थः ॥

तत्र शब्दस्य अर्थज्ञानफलकत्वात् प्रथमं अर्थं विना शब्दानुसन्धानस्य असम्भावात् प्रथमम् अर्थाध्याहार एव युक्त इति चेत्, उत्तरयति, अर्थबोधार्थं प्रथमं शब्दोऽपेक्षितः, शब्दं विना अर्थबोघो न भवतीत्यतः पदजन्यपदार्थोपस्थितिरेव शाब्दबोधे हेतुरित्यर्थः । अन्यथा 'घटः कर्मत्वम् आनयनं कृतिः' इत्यत्रापि शाब्दबोधः स्यादित्यर्थः । पदं चतुर्विधम् - यौगिकं रूढं योगरूढं यौगिकरूढं चेति । तत्र अवयवशक्त्या अर्थः बुध्यते तद्योगः, समुदायशक्त्या अर्थः बुध्यते रूढम्, अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद् योगरूढम् यथा पङ्कजादिपदम् । तत्र नियतपद्मत्वज्ञानार्थं समुदायशक्तिः कथिता । अन्यथा कुमुदेऽपि प्रयोगप्रसङ्गः स्यात् ।

तत्र इतरान्विते पदार्थद्वयसंसर्गे शक्तिं प्राभाकराः स्वीकुर्वन्ति । पदार्थद्वयसंसर्गस्य पदसमभिव्याहारबलादेव शाब्दबोधे भानात् तादृशान्वयांशे शक्तिकल्पनं निर्युक्तिकमिति नैयायिकाः ॥

**वाक्यार्थज्ञाने हेतवः**

**मूलम् – आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः । पदस्य पदान्तरव्यतिरेकप्रयुक्ताऽन्वयाऽननुभावकत्वमाकाङ्क्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनोच्चारणं सन्निधिः । तथा च आकाङ्क्षादिरहितं वाक्यमप्रमाणम् । यथा 'गौरश्वः पुरुषो हस्ती'ति न प्रमाणम् आकाङ्क्षाविरहात् । 'वह्निना सिञ्चती'ति न प्रमाणम्, योग्यता विरहात् । प्रहरे प्रहरेऽसहोच्चारितानि 'गामानये' त्यादिपदानि न प्रमाणम्, सान्निध्याभावात् ॥**

**दीपिका – आकाङ्क्षेति । आकाङ्क्षादिज्ञानमित्यर्थः । अन्यथा आकाङ्क्षादिभ्रमाच्छाब्दभ्रमो न स्यात् । आकाङ्क्षां लक्षयति पदस्येति । योग्यता लक्षणमाह अर्थेति । सन्निधिलक्षणमाह – पदानामिति । अविलम्बेन पदार्थोपस्थितिः सन्निधिः । उच्चारणं तु तदुपयोगितया उक्तम् । 'गौः अश्वः' इति । 'घटः कर्मत्व' मित्यप्यनाकाङ्क्षोदाहरणं द्रष्टव्यम् ॥**

**सरलार्थः** – आकाङ्क्षादिज्ञानं वाक्यार्थज्ञाने कारणमित्यर्थः । अन्यथा आकाङ्क्षादीनां आकाङ्क्षाज्ञानरूपार्थाऽकरणे आकाङ्क्षादिभ्रमात् शाब्दभ्रमो न स्यादित्यर्थः । तत्र का नाम आकाङ्क्षेति जिज्ञासायाम् उक्तमस्ति पदस्येति । यत्पदस्य यत्पदाभावप्रयुक्तम् अन्वयबोधाऽजनकत्वं तत्पदसमभिव्याहृत-तत्पदवत्वम् आकाङ्क्षेत्यर्थः । यथा 'घटमि'त्यत्र 'घट'पदस्य 'अम्'पदाऽभावप्रयुक्तमन्वयबोधाऽसमर्थत्वमस्ति अतः घटपदसमभिव्याहृताऽम्-पदत्वम् तत्र आकाङ्क्षेत्यर्थः । योग्यता – एकपदार्थाऽनुयोगिकाऽपरपदार्थप्रतियोगिकसम्बन्धो योग्यतेत्यर्थः । नवीनानां मते तु अर्थस्य बाधाभावो योग्यतेति । सन्निधिः – अविलमबेन पदार्थोपस्थितिः सन्निधिरित्यर्थः । अन्यत् सर्वं सरलम् ॥

**वाक्यस्य द्वैविध्यम्**

**मूलम – वाक्यं द्विविधम् – वैदिकं लौकिकं च । वैदिकमीश्वरोक्तं सर्वमेव प्रमाणम् । लौकिकं तु आप्तोक्तं प्रमाणम्, अन्यदप्रमाण्म् ॥ वाक्यार्थज्ञानं शाब्दज्ञानम्, तत्करणं शब्दः ॥**

**दीपिका – वाक्यं विभजते – वाक्यमिति । वैदिके विशेषमाह – वैदिकमीश्वरोक्तत्वादिति । ननु वेदस्यानादित्वात् कथमीश्वरोक्तत्वमिति चेत् । न, वेदः – पौरुषेयः, वाक्यसमूहत्वात्, भारतादिवत्, इत्यनुमानेन पौरुषेयत्वसिद्धेः । न च स्मर्यमाणकर्तृकत्वमुपाधिः, गौतमादिभिः 'शिष्य'परम्परया वेदेऽपि सकर्तृत्वस्मरणेन साधनव्यापकत्वात् । 'तस्मात् तपस्तेपानात् त्रयो वेदा अजायन्त' इति श्रुतेः । ननु वर्णा नित्याः 'स एवायं गकारः' इति प्रत्यभिज्ञाबलात् । तथा च कथं वेदस्यानित्यत्वमिति चेत् ! न, 'उत्पन्नो गकारो नष्टो गकारः' इत्यादिप्रतीत्या वर्णानामनित्यत्वात् 'सोऽयं गकार' इति प्रत्यभिज्ञायाः 'सेयं दीपज्वाला' इतिवत् साजात्यालम्बनत्वात् । वर्णानां नित्यत्वेऽप्यानुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च । तस्मादीश्वरोक्तो वेदः । मन्वादिस्मृतीनामाचाराणां च वेदमूलकतया प्रामाण्यम् । स्मृतिमूलवाक्यानामिदानीमनध्ययनात् तन्मूलभूता काचित् शाखोच्छिन्नेति कल्प्यते ।**

**ननु पाठ्यमानवेदवाक्योत्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वादिति नित्यानुमेयो वेदो मूलमिति चेत् ! न, तथापि वर्णानुपूर्वीज्ञानाभावेन बोधकत्वादसमभवात् ॥ ननु एतानि पदानि स्मारितार्थसंसर्गवन्ति, आकाङ्क्षादिमत्पदकदमबकत्वात्, 'गामानय दण्डेनेति' मद्वाक्यवत् इत्यनुमानादेव संसर्गज्ञानसंभवात् शब्दो न प्रमाणान्तरमिति चेत् ! न, अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य 'शब्दात्प्रत्येमि' इत्यनुव्यवसायसाक्षिकस्य सर्वसम्मतत्वात्॥**

**ननु अर्थापत्तिरपि प्रमाणान्तरमस्ति 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति दृष्टे, श्रुते, वा पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्थापत्या कल्प्यते इति चेत् ! न, देवदत्तो रात्रौ भुङ्क्ते, 'दिवा अभुञ्जानत्वे सति पीनत्वात्', इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् ॥ 'शते पञ्चाशदि'ति सम्भवोऽप्यनुमानमेव ॥ 'इह वटे यक्षस्तिष्ठति' इत्यैतिह्यमपि अज्ञातमूलवक्तृकः शब्द एव ॥ 'चेष्टा' अपि शब्दानुमानद्वारा व्यवहारहेतुरिति न प्रमाणान्तरम् । तस्मात् प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणानि ॥**

**सरलार्थः** – द्विप्रकारके वाक्ये वैदिकवाक्यं लक्षयति वैदिकन्त्वीति, ईश्वरोक्तत्वात् सर्वमेव वाक्यं प्रमाणम् इति। प्रश्नः वेदस्य अनित्यत्वात् ईश्वरोक्तत्वं कथं समभवतीति चेत् ! उत्तरम् अनुमानेन व्यवस्थापयति, 'वेदः – पौरुषेयः – वाक्यसमूहत्वात्, भारतादिवदि'त्यनेन पौरुषेयत्वसिद्धिः सम्भवतीत्यर्थः । पौरुषेयत्वम् इत्युक्ते अत्र सजातीयोच्चारणाऽनपेक्ष-भ्रमादिशून्यपुरुषोच्चारणजन्यत्वम् ।

'वेदः पौरुषेय' इत्याद्यनुमानं यत्र यत्र भारतादौ पौरुषेयत्वं तत्र तत्र स्मर्यमाणकर्तृकत्वमस्तीति साध्यव्यापकत्वम्, यत्र यत्र च वेदे वाक्यसमूहत्वं तत्र तत्र न स्मर्यमाणकर्तृकत्वमस्तीति साधनाऽव्यापकत्वात्, अस्य स्थलस्य स्मर्यमाणकर्तृकत्वमुपाधिना ग्रस्तत्वात् कथं साध्यसाधकं भवेदिति मीमांसकस्य आशङ्का । तं दोषं वारयति, न चात्र स्मर्यमाणकर्तृकत्वेपाधिरस्ति, साधनाऽव्यापकत्वस्य विरहादिति । अर्थात् गौतमादिमहर्षिभिः स्वशिष्यान् प्रति 'वेदकर्त्ता- ईश्वर'इत्युपदेशात् सकर्तृकत्वसिद्धौ स्मर्यमाणकर्तृकत्वमुपाधिरेव नास्तीत्यर्थः । तत्र श्रुतिप्रमाणमपि 'तस्मात् तपस्तेपानादि'त्यादिना दर्शितत्वात् वेदा अनित्या एवेत्यर्थः । तत्र पुनः शब्दनित्यत्ववादी मीमांसकः शङ्कते – वर्णाः नित्याः खलु, यतो हि 'स एवायं गकारः' इति प्रत्यभिज्ञाबलात्, तर्हि कथं वेदानामनित्यत्वम् ? इति । तर्हि उत्तरयति – तादृश 'स एवायं गकारः' इति प्रतीतिबलादेव शब्दानां ध्वंस-प्रागभावप्रतियोगित्वं च सिद्ध्यतीत्यर्थः । एवं 'सेयं दीपज्वाला' इत्यत्र दीपस्य कलिका ज्योतिः । तत्र सजातीयसहस्रज्वालानां उत्पन्नविनष्टानामपि साजात्यालम्बनात् प्रत्यभिज्ञा भवति, तथा गकारादावपि गत्वादिजातिमादाय प्रत्यभिज्ञा भवतीत्यर्थः ।

पुनस्तत्र मीमांसकैः वर्णाः नित्याः तर्हि कथं परम्परया वर्णसमूहस्य वाक्यस्य अनित्यत्वं भवतीति शङ्का कृता । तत्र समाधानं, वर्णानां नित्यत्वेऽपि आनुपूर्वीविशिष्टवाक्यस्य अनित्यत्वादिति । तत्र आनुपूर्वी नाम 'रामः' इत्यत्र 'रकाराव्यवहितोत्तर-आकाराव्यवहितोत्तर-मकाराव्यवहितोत्तर-अकाराव्यवहितोत्तर-विसर्गरूपा' तद्विशिष्टानां वाक्यानाम् अनित्यत्वमेवेत्यर्थः । तस्मादीश्वरोक्तो वेदः अनित्य एवेति सिद्धम् । तथा वेदमूलकत्वादेव मन्वादिस्मृतीनां मन्वादिस्मृतिप्रतिपाद्याचारविशेषाणां च प्रामाण्यमित्यर्थः । केषांचित स्मृतिमूलवाक्यानाम् अपाठनात् पाठतः नष्टत्वात् वा परिभ्रष्टेत्यनुमीयतेत्यर्थः ।

मीमांसकः शङ्कते – पाठ्यमानवेदवाक्याणां परिभ्रंशः कल्पयितुं न शक्यते, तथा विप्रकीर्णवादः = विशकलिततया विद्यमानानां स्मृतिमूलत्वकल्पनावादोप्ययुक्तः, तस्मात् 'स्मृतिमूलं स्मृतिमूलं वेदः - नित्यः, नित्यशब्दात्मकत्वादि'त्येवं नित्यो वेदः अनुमेयः, तथा च सति न उक्ताः आपत्तय इति चेत् । उतरयति – तथापि वर्णानुपूर्व्याः ज्ञानाभावेन वेदस्य अनित्यत्वं स्थास्यत्येव, अस्माकं तु वेदस्याऽनित्यत्वं निराबाधमित्यभिप्रायः ।

शब्दप्रमाणं न अनुमानादतिरिक्तामिति वैशेषिकाः, ते शङ्कन्ते – पदवृत्त्या पदार्थानां स्मरणे सति तदुत्तरं तात्पर्यज्ञानविषयीभूतो यः तादृशस्मारितार्थानां परस्पर अन्वयात्मकः संसर्गः, तद्विषयिणी या नैयायिकाभिमतशाब्दबोधात्मिका प्रमा सा अनुमित्यात्मिकैव न अन्या, तादृशप्रमार्थं शब्दात्मकप्रमाणान्तरं न कल्पनीयमिति । उत्तरयति – अनुमित्यपेक्षया विलक्षणस्य शाब्दज्ञानस्य 'शब्दात्प्रत्येमि' इत्यनुव्यवसायात्मकप्रतीतेः सर्वसम्मतत्वात् शब्दप्रमाणजन्यैवेति शाब्दबोध प्रमाणसिघ्दः ।

मीमांसकभाट्टाः वेदान्तिनश्च अर्थापत्तेः प्रमाणान्तरत्वं शङ्कन्ते – 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति दृष्टे श्रुते वा पीनत्वस्य रात्रिभोजनं विना अनुपपत्त्या, रात्रिभोजनम् अर्थापत्तिप्रमाणेन आक्षिप्यते इति । उत्तरयति – पीनत्वं तावत् व्यतिरेकानुमानेनैव गतार्थत्वात् अर्थापतिः न प्रमाणान्तमिति । दर्शितं दीपिकायां स्पष्टम् । तत्र पौराणिकाः सम्भवैतिह्ययोरपि अतिरिक्तप्रमाणत्वं वदन्ति तन्मतमपि दूषयति शते पञ्चाशदिति अर्थात् शतम्- पञ्चाशद्घटितम्, शतत्वादित्यनुमानेन सम्भवस्य सिद्धिर्भवतीति भावः । एवं ऐतिह्यम् अर्थात् अनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यम् अपि न प्रमाणान्तरम्, यतो हि यदि अज्ञातकर्तृकः शब्दः तर्हि अप्रामाण्यमेव, यदि च आप्तप्रवक्तृकः शब्दः तदा शब्दप्रमाणे एव अन्तर्भवतीति भावः ।

चेष्टापि प्रमाणान्तरमिति आलङ्कारिकाः वदन्ति, तन्मतं दूषयति – चेष्टापि शब्दद्वारा अनुमानद्वारा वा व्यवहारं प्रति कारणं भवति, न तु स्वतन्त्रतया, अतः तस्यापि शब्दप्रमाणे वा अनुमानप्रमाणे अन्तर्भावः भवतीत्यर्थः । तस्मात् प्रमाणानि प्रत्यक्षानुमानोपमानशब्दाः चत्वार्येवेति सिद्धमित्यर्थः ॥

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) संज्ञा-संज्ञिसम्बन्धज्ञानम् .............. अस्ति । (उपमानम्, उपमितिः, अनुमितिः)

(२) 'अस्मात्पदादयमर्थो बोद्धव्यः' इति ................. अस्ति । (ईश्वरङ्केतः, आप्तवचनम्, व्यापारः)

(३) अतिदेशवाक्यार्थस्मरणम् .............. वर्तते । (उपमानम्, अवान्तरव्यापारः, सादृश्यज्ञानम्)

(४) शक्तिः पदार्थान्तरमिति .............. स्वीकुर्वन्ति । (वैशेषिकाः, नैयायिकाः, मीमांसकाः)

(५) लक्षणायाः भेदाः .................. सन्ति । (२, ३, ४)

(६) वाक्यार्थज्ञानहेतूनां ............... सङ्खयास्ति । (३, ४, ५)

(७) चेष्टाऽपि प्रमाणान्तरमिति ............... स्वीकुर्वन्ति । (वेदान्तिन:, मीमांसका:, आलङ्कारिका:)

(८) .............. अविलम्बेन पदार्थोपस्थितिरस्ति । (अर्थापत्ति:, योग्यता, सन्निधि:)

(९) अवयवशक्ति: .............. अस्ति । (रूढ:, योग:, योगरूढ:)

(१०) 'तत्त्वमसी'ति उदाहरणम् .............. वर्तते । (जहदजहल्लक्षणाया:, जहल्लक्षणाया:, अजहल्लक्षणाया:)

२. **एकवाक्येन उत्तराणि लिखत ।**

(१) नैयायिकमते वेद: पौरुषेयो अपौरुषेयो वा?

(२) लक्षणाया: बीजं किम्?

(३) वेदनित्यत्ववादिन: के?

(४) वाक्यं किम्?

(५) जातिशक्तिवादिन: के?

(६) पदं कतिविधम्?

(७) वैशेषिकमते शब्द: प्रमाणान्तरं न वा?

३. **द्वि-त्रि वाक्यै: उत्तराणि लिखत ।**

(१) का नाम योग्यता? उदाहरणं किम्?

(२) आकाङ्क्षा का?

(३) वैदिकवाक्यं कीदृशम्?

(४) नव प्रमाणानि कानि?

(५) किं नाम पदम्? तस्य भेदा: के?

४. **टिप्पणी: लिखत ।**

(१) लक्षणा ।

(२) शक्ति: ।

(३) उपमानम् ।

५. **सविस्तरम् उत्तरं लिखत ।**

(१) वेदस्य नित्यत्वाऽनित्यत्वे स्पष्टं प्रतिपादयन्तु ।

(२) चत्वार्येव प्रमाणानीति सयुक्तिकं दीपिकासहितं व्याख्यात ।

(३) वृद्धव्यवहारेण शक्तिग्रहं यथादीपिकां विशदीकुरुत ।

•

# ११ संशयलक्षणादारभ्य कर्मनिरूपणान्तम्

**संशयविपर्ययतर्कलक्षणानि**

**मूलम्  अयथार्थाऽनुभवस्त्रिविधः संशय-विपर्यय-तर्कभेदात् । एकस्मिन् धर्मिणि, विरूद्धनाना धर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा 'स्थाणुर्वा-पुरूषो वे ' ति।**

**दीपिका अयथार्थानुभवं विभजते-अयथार्थेति । स्वप्नस्य मानसविपर्ययरूपत्वान्न त्रैविध्यविरोधः । संशयलक्षणमाह-एकस्मिन्निति। 'घटपटौ' इति समूहालम्बनेऽतिव्याप्तिवारणाय-एकेति । 'घटो द्रव्यम्' इत्यात्रातिव्याप्तिवारणाय विरुद्धेति । 'पटत्वविरुद्धघटत्ववान्' इत्यादावतिव्याप्तिवारणाय नानेति ॥**

**सरलार्थः** - अयथार्थानुभवस्य त्रैविध्यम् अयोग्यमस्ति । यतो हि क्वचित् अनुभूतपदार्थस्मरणात् अनुभूतपदार्थविषयकं स्वाप्नज्ञानं जायते, क्वचिच्च अननुभूतसर्पादिविषयकं स्वाप्नज्ञानं जायते, अतः तस्य असदर्थविषयकस्वाप्नज्ञानस्य चतुर्थस्य सर्वानुभवसिद्धत्वात् स्वपनेपि संशयादिवत् पृथक् ज्ञानमिति । तदयुक्तम् । मिद्धानामनाडीविशेषावच्छिन्नमनः संयोगः स्वप्नः, तदसमवायिकारणं ज्ञानं स्वाप्नज्ञानम् । तस्य मानसं यद्विपर्ययज्ञानं भ्रमज्ञानं तदात्मकत्वादित्यर्थः । अतः स्वाप्नज्ञानं विपर्ययात्मक भ्रमज्ञानमेव ।

विरुद्धाश्च ये नानाधर्माश्च विरुद्धनानाधर्माः । ते प्रकारा यत्र, तत् विरुद्धनानाधर्मप्रकारकम् । एकस्मिन् इति धर्मिविशेषणम् । धर्मिणि इत्यत्र सप्तम्या विशेष्यत्वमर्थः । प्रकृत्यर्थस्य आधेयतासमबन्धेन अन्वयः । विरुद्धत्वं परस्परासमानाधिकरणत्वम् । ततश्च विरुद्धनानाधर्मप्रकारकं नाम परस्परासमानाधिकरणनानाधर्मनिष्ठप्रकारतानिरूपकम् इत्यर्थः । ततश्च एकधर्मिनिष्ठविशेष्यतानिरूपकम्, परस्परविरुद्धनानाधर्मनिष्ठप्रकारतानिरूपकं च ज्ञानं संशय इत्यर्थः ॥

एकस्मिन्नेव पुरोवर्तिनि पदार्थे विरुद्धाः नानाधर्माः स्थाणुत्वपुरुषत्वादयः तेषां वैशिष्ट्यं तदवगाहिज्ञानमेव संशयः । ततश्च एकधर्मावच्छिन्नाविशेष्यतानिरूपकत्वे सति, परस्परविरुद्धानेकधर्मावच्छिन्नप्रकारताशालित्वे सति ज्ञानत्वं संशयलक्षणम् । ज्ञानत्वमात्रोक्तौ विपर्ययादौ प्रमायाञ्च अतिव्याप्तिः, तेषामपि ज्ञानत्वात् । अतो नानाधर्मप्रकारत्वं विशेषणं प्रदत्तम् । शुक्तौ इदं रजतम् इति विपर्यये रजतत्वमात्रप्रकारकत्वात् नानाधर्मप्रकारकत्वाभावात् नातिव्याप्तिः ।

एवमपि घटपटवत् भूतलम् इति समूहालम्बनज्ञाने एकस्मिन्धर्मिणि नानाधर्मप्रकारकत्वात् अतिव्याप्तिः । अतो एकपदप्रयुक्तम् । समूहालम्बनज्ञाने तु एकत्वाभावात् नातिव्याप्तिः । घटो द्रव्यम्' इति ज्ञानस्य एकस्मिन्धर्मिणि घटे घटत्वद्रव्यत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वाददतिव्याप्तिः, अतो विरुद्धपदं प्रयुक्तम् । विरुद्धोपादाने तु घटत्वद्रव्यत्वे न विरुद्धे न व्यधिकरणे, अतो न अतिव्याप्तिः ।

पटत्वविरुद्धघटत्ववान् इति ज्ञाने घटे विरुद्धधर्मस्य विद्यमानत्वात् अतिव्याप्तिः । अतो नानात्वं प्रयुक्तम् । घटे विरुद्धधर्मज्ञानस्य वर्तमानत्वेपि नानाधर्मस्याभावात् न दोषः ।

**मूलम् : मिथ्याज्ञानं विपर्ययः । यथा शुक्तौ 'इदं रजतम्' इति।**

**दीपिका : विपर्ययलक्षणमाह-मिथ्येति । तदभाववति तत्प्रकारकनिश्चय इत्यर्थः ॥**

**सरलार्थः** - मिथ्याज्ञानं विपर्ययः । अयमेव भ्रमशब्देनापि व्यपदिश्यते । मिथ्याज्ञानं च तदभाववति तत्प्रकारकनिश्चयः। ज्ञानान्तरेण बाधयोग्यो यो विषयः तद्-विषयक-निश्चयात्मकं ज्ञानं विपर्यय इत्यर्थः । निश्चयज्ञानं च तदभावाप्रकारकं तत्प्रकारकं ज्ञानम् । तथा च शुक्तौ इदं रजतम् इति यज् ज्ञानम् तत्र यद्यपि शुक्तौ रजतत्वं नास्ति, तथापि तत्र रजतत्वम् अस्तीति गृहीत्वा

इदं रजतम् इति एककोटिकं निश्चयज्ञानं जायते । तदेव विपर्ययज्ञानमस्ति । तथा च शुक्तौ इदं रजतम् इति विपर्ययज्ञाने शुक्तिः विशेष्यम्, रजतत्वं प्रकारः, समवायः संसर्गः । तदभाववति इत्यत्र तच्छशब्देन प्रकाररूपं रजतत्वं बुध्यते । तथा च रजतत्वाभावाधिकरणे शुक्तिशकले विशेष्ये रजतत्वप्रकारकत्वम् इदं रजतमिति ज्ञानं विपर्ययनामकम् अयथार्थज्ञानम् ।

**मूलम् : व्याख्याऽऽरोपेण व्यापकाऽऽरोपस्तर्कः। यथाः 'यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादिति'।**

**दीपिका :तर्कं लक्षयति-व्याप्येति । यद्यपि तर्को विपर्ययेऽन्तर्भवति तथापि प्रमाणानुग्राहकत्वाद् भेदेन कीर्तनम् ।**

**सरलार्थः** - व्याप्यारोपेण व्यापकस्यारोपणं तर्कः । पर्वतो वह्निमान् धूमात् - इति प्रयुक्ते, कश्चित् पृच्छति धूमस्य सत्वमात्रेण, वह्निसत्वं कथं निश्चीयते इति । एवं प्रश्नस्याप्रयोजकशङ्केति संज्ञा । हेतुरस्तु साध्यं मास्तु इति शङ्कैव प्रयोजकशङ्का । हेतोः सत्वं साध्यस्य सत्वे न प्रयोजकम्, यदि साध्यं विनापि हेतुः स्यात्पक्षे इति शङ्कायाः आशयः । तस्योत्तरं वक्ति-यदि साध्यं न स्यात्, तर्हि हेतुरपि न स्यात् इति । प्रकृते यदि वह्निर्न स्यात् तर्हि धूमोपि न स्यात् इति अयमेव तर्क इत्युच्यते । जगति कुत्रापि वह्यभावेपि धूमो दृष्टः किम्? अतो वह्न्यभावे धूमोपि न स्यादेव । धूमो यतो दृश्यते, तर्हि वह्निरपि स्यादेव, इति प्रदर्शनेन प्रकृतहेतोः अप्रयोजकत्वशङ्का निवर्तते । अतः अप्रयोजकत्वशङ्कानिवारकः तर्क इत्युच्यते । पर्वते वह्नेः सत्वात्, यदि वह्निर्नस्यात् इति कल्पयित्वा वक्तव्यम् । तादृशकल्पनात्मकं ज्ञानमेव आरोपः इत्युच्यते । एवं धूमोऽपि न स्यात् इत्यारोप एव । धूमस्य सत्वेन तथा वक्तुमशक्यत्वात् । तदारोपसूचनार्थमेव यदि स्यात् त्युच्यते । अत्र वह्न्यभावो व्याप्यः, धूमाभावो व्यापकः । आक्षेप्ता पृच्छति - धूमोस्तु इति । अतस्तस्य पर्वते धूमाभावो न इष्टः । प्रतिवक्ता वदति, यदि पर्वते धूमस्स्यात् चेत् तर्हि तत्र वह्निरेव स्यात्, न तु वह्न्यभाव ति । अत्र वह्न्यभाव वाक्षेप्तुरिष्टः । तत उच्यते, यदि वह्न्यभावस्स्यात् तर्हि धूमाभाव एव स्यात्, न तु धूमः इति । अतो यदि व्याप्यः वह्न्यभावः स्यात्, तर्हि व्यापको धूमाभाव एव स्यात् । यत्र वह्न्यभावः तत्र धूमाभावः इति व्याप्तेः सत्वात् । अतश्च यदि धूमः स्यात्, तर्हि वर्हिरप्यावश्यक इति प्रदर्शनमेव तर्कस्य कार्यमिति ।

**दीपिका, स्मृतिं विभजते-स्मृतिरिति ॥ संस्कारमात्र जन्यं ज्ञानं स्मृत्तिः।**

**सरलार्थः** - स्मृतिः द्विप्रकारिका-यथार्था, अयथार्था च । तद्वति तत्प्रकारिका यथार्था, तदभाववति तत्प्रकारिका अयथार्था । प्रमा ज्ञानेन उत्पन्ना स्मृतिः यथार्था, अप्रमा ज्ञानेन उत्पन्ना स्मृतिः अयाथार्था । तथा च स्मृतेः याथार्थ्यम् अयाथार्थ्यं च तज्जनकानुभवस्य याथार्थ्येन अयाथार्थ्येन च ज्ञेयम् ।

**सुखतः संस्कारलक्षणान्तम्**

**मूलम् : स्मृतिरपि दिविधा यथार्था, अयथार्थेति। प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था। अनुकूलतयावेदनीयं सुखम्।**

**दीपिकाः सुखं लक्षयति-सर्वेषामिति । 'सुख्यहम्' इत्याद्यनुव्यवसायगम्यं सुखत्वादिकमेव लक्षणम् । यथाश्रुतं तु स्वरूपकथनमिति द्रष्टव्यम् ॥**

**सरलार्थः** - अनुकुलवेदनीयत्वे सति गुणत्वं सुखस्य लक्षणम् । लक्षणस्यास्य रूपरसादवतिव्याप्तिस्यात् अतो अहं सुखी- इत्यादि अनुभवसिद्धसुखत्वजातिमत्वं सुखस्य लक्षणं कृतम् । सर्वेषामनुकूलतया वेदनीयमिति तु स्वरूपकथनमस्ति ।

एवमेव दुःखलक्षणमपि ज्ञेयम् । प्रतिकुलवेदनीयत्वे सति गुणत्वं सुखस्य लक्षणम् । लक्षणस्यास्य रुपरसादवतिव्याप्तिस्यात् अतो अहं दुःखी - इत्यादि अनुभवसिद्धदुःखत्वजातिमत्वं दुःखस्य लक्षणम् कृतम् । सर्वेषाम् प्रतिकूलतया वेदनीयमिति तु स्वरूपकथनमस्ति ।

अपेक्षिततत्वप्रकारकज्ञानजन्यः, आत्मनः प्रयत्नं प्रति हेतुरिच्छा । जानाति, इच्छति, यतते इति क्रमः । क्रोधो द्वेषः। प्रतिकूलतत्वज्ञानजन्य आत्मगुणो द्वेषः । एवं प्रयत्नोपि आत्मगुणः, प्रवृत्तिहेतुः । लोके प्रवृत्तेः क्रियात्वात्, आत्मनि विभौ क्रियाया असंभवात्, शरीरादिप्रवृत्तिहेतुभूतो गुणविशेषः प्रयत्नः । बुद्धीच्छाद्वेषप्रयत्नसंस्काराः सविषयका गुणाः । आत्मगतो गुणविशेषः धर्मः । एवमधर्मोपि । विहितकर्मजन्यो धर्मः, निषिद्धकर्मजन्यस्तु अधर्मः ।

**मूलम् : संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्यमनोवृत्ति। अनुभवजन्या स्मृतिहेतुः भावना। स्मृतिहेतुभावनाऽऽत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथुवीवृत्तिः।**

**दीपिका : संस्कारं विभजते-संस्कार इति । संस्कारत्वजातिमान्संस्कारः ।**

**वेगस्याश्रयमाह-वेग इति । वेगत्वजातिमान्वेगः ।**

**भावनां लक्षयति - अनुभवेति । आत्मादावतिव्याप्तिवारणाय-अनुभवेति । अनुभवध्वंसेऽतिव्याप्तिवारणाय-स्मृतीति । स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तम् ॥**

**स्थितिस्थापकं लक्षयति-अन्यथेति । संख्यादयोऽष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः। अन्ये रूपादयो विशेषगुणाः । द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिद्रव्यकर्मावृत्तिजातिमत्वं विशेषगुणत्वम् ॥**

**सरलार्थः** - संस्कारत्वजातिमत्वं संस्कारः । वेगत्वजातिमत्वं वेगस्य लक्षणम् । द्वितीयादिपतने वेगस्यापि कारणत्वं प्रदर्शितम् । अतश्च गुरुत्वादिभिन्नत्वे सति द्वितीयादिपतनासमवायिकारणत्वं वेगस्य लक्षणं ज्ञेयम् ।

अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाया लक्षणम् । अनुभवजन्यत्वमात्रोक्तौ अनुभवध्वंसे अतिव्याप्तिः, अनुभवध्वंसस्य अनुभवजन्यत्वात् । तद्वारणाय स्मृतिहेतुत्वं देयम् । तत्र स्मृतिहेतुत्वाभावात् न दोषः । स्मृतिहेतुत्वमात्रोक्तौ आत्मादावतिव्याप्तिः । अतः अनुभवजन्यत्वमुक्तम् । स्मृतिं प्रति संस्कारस्य कारणत्वमपि नवीनैः स्वीकृतम् ।

अन्यथाकृतस्य पुनस्तादवस्थ्यापादकः स्थितिस्थापकः । पूर्वं यथा स्थितं, तथैव पूर्वावस्थाप्रापकः । वृक्षादिशाखासु इदं द्रष्टुं शक्यम् ।

संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-गुरुत्वादि अष्टौ, नैमित्तिकद्रवत्व-वेग-स्थितिस्थापकाः सामान्यगुणाः ।

अन्ये सामान्यगुणभिन्नाः रूप-रस-गन्ध-स्पर्श-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्म-भावनाख्यसंस्कार-शब्द-स्नेह-सांसिद्धिकद्रवत्वादयः विशेषगुणाः ।

द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमत्वं विशेषगुणत्वम् । पृथिवीत्वजलत्वाद्यात्मकं यत् द्रव्यविभाजकोपाधिद्वयं प्रत्येकं तत्समानाधिकरणा द्वित्व पृथक्त्व-संयोगादयः तद्वृत्तिजातिमद्गुणत्वमित्यर्थः । तदवृत्तिजातिरूपत्वरसत्वशब्दत्वादयः तादशजातिमत्वं विशेषगुणानां लक्षणम् ।

**सभेदकर्मलक्षणम्**

**मूलम्: चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेश संयोगहेतुरपक्षेपणम् । शरीरसन्निकृष्ट-संयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् ।**

**दीपिकाः कर्मणो लक्षणमाह- चलनेति । उत्क्षेपणादीनां कार्यभेदमाह-उर्ध्वेति । शरीरेति । वक्रत्वसम्पादकं कर्म आकुञ्चनम् । ऋजुतासम्पादकं प्रसारणमित्यर्थः ।**

**सरलार्थः** – चलति इति प्रतीतिसिद्धक्रियात्वरूपजातिमत्वं कर्मणो लक्षणम् इत्यर्थः । चलने जाते सति, पूर्वदेशाद्वस्तुनो विभागः । तेन पूर्वसंयोगनाशः । तत उत्तरदेशसंयोगोत्पत्तिः क्रमो अवर्जनीयः । अतः सर्वाः क्रिया क्षणचतुष्टयमात्रावस्थायिन्यः ॥

संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । संयोगसमवायिकारणे द्रव्ये अतिव्याप्तिवारणाय असमवायीति पदं प्रयुक्तम् । हस्तेन पुस्तकस्पर्शेन यत् हस्तचालनं तत् हस्तपुस्तकयोः संयोगे असमवायिकारणम् इति तस्य कर्मत्वम् । हस्तपुस्तकयोः संयोगस्य तु देहपुस्तकयोः संयोगे असमवायिकारणत्वेपि स्वस्य संयोगरूपत्वात् न तस्य कर्मत्वम् । अतः संयोगे अतिव्याप्तिवारणाय संयोगभिन्नत्वमुक्तम् ।

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि । तत्र उर्ध्वदेशसंयोगासमवायिकारणत्वम् उत्क्षेपणम् । यया क्रियया स्वाश्रयं द्रव्यम् ऊर्ध्वं गच्छति सा क्रिया उत्क्षेपणम् । अधोदेशसंयोगासमवायिकारणम् अपक्षेपणम् । यया क्रियया स्वाश्रयं द्रव्यम् अधो गच्छति सा क्रिया अपक्षेपणम् । शरीरसन्निकृष्टसंयोगासमवायिकारणत्वम् आकुञ्चनम् । यया क्रियया अधिकदेशविस्तृतं द्रव्यम् अवयवापचयव्यतिरेकेण अल्पदेशे समाविष्टं भवति, सा क्रिया आकुञ्चनम् । वक्रतासमपादनं कर्म आकुञ्चनम् । शरीरविप्रकृष्टसंयोगासमवायिकारणत्वं प्रसारणनम् । यया क्रियया अल्पदेशविस्तृतं द्रव्यम् अवयववृद्धिव्यतिरेकेण अधिकदेशविस्तृतं भवति सा क्रिया प्रसारणम् । ऋजुतासमपादकं कर्म प्रसारणम् । अनियतदेशसंयोगासमवायिकारणत्वं गमनम् ।

## स्वाध्यायः

**१. योग्यविकल्पं चित्त्वा रिक्तस्थानं पूरयत ।**

(१) अयथार्थानुभवः ............. भवति । (द्विविधः, त्रिविधः, पञ्चविधः)

(२) तदभाववति तत्प्रकारकः अनुभवः ............. अस्ति । (तर्कः, विपर्ययः, संशयः)

(३) ............ कर्माणि सन्ति । (पञ्च, सप्त, नव)

(४) सामान्यगुणः ................. अस्ति । (रूपम्, शब्दः, संयोगः)

(५) वक्रतासम्पादनं कर्म ................ अस्ति । (उत्क्षेपणम्, आकुञ्चनम्, प्रसारणम्)

(६) द्वितीयादिपतनासमवायिकारणम् ............... भवति । (गुरुत्वम्, वेगः, भावना)

(७) स्मृतिः ............. वर्तते । (एकविधाः, द्विविधा, पञ्चधा)

(८) अयथार्थज्ञानेन उत्पन्ना स्मृतिः .............. । (यथार्था, अयथार्था, उभया)

(९) ऋजुतासमपादकं कर्म ................ अस्ति । (उत्क्षेपणम्, आकुञ्चनम्, प्रसारणम्)

(१०) विहितकर्मजन्यः .............. भवति । (धर्मः, अधर्मः, संस्कारः)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) संशयस्य लक्षणं लिखत ।

(२) सुखस्य स्वरूपं लिखत ।

(३) स्मृतेः प्रकारद्वयं लिखत ।

(४) सामान्यगुणाः के?

(५) पञ्च कर्माणि कानि ?

(६) प्रसारणस्य लक्षणं लिखत ।

(७) वेगस्य स्वरूपं प्रतिपादयत ।

३. **द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) भावनायाः स्वरूपं लिखत ।

(२) विशेषगुणस्य लक्षणं विलिखय विशेषणगुणान् लिखत ।

(३) सदलकृत्यं दुःखस्य लक्षणं प्रतिपादयत ।

(४) सोदाहरणं विपर्ययस्य लक्षणं विशदयत ।

(५) स्थितिस्थापकस्य लक्षणं लिखत ।

४. **टिप्पणीः लिखत ।**

(१) अप्रयोजकशङ्का ।

(२) कर्माणि ।

(३) स्मृतिः ।

५. **निबन्धात्मकमुत्तरम् लिखत ।**

(१) सोदाहरणं तर्कस्य लक्षणं विवेचयत ।

(२) समन्वयपुरस्सरं कर्मणः पञ्चप्रकारत्वं प्रतिपादयत ।

(३) संस्कारस्य त्रैविध्यं विशदयत ।

•

# १२ सामान्यनिरूपणात् अवशिष्टोभागः

**सामान्यविशेषणलक्षणे**

**मूलम् – नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । तद् द्विविधम् – परापरभेदात् । परं सत्ता, अपरं द्रव्यत्वादि ।**

**दीपिका – सामान्यं लक्षयति – नित्यमिति । संयोगादावतिव्याप्तिवारणाय नित्यमिति । परमाणुपरिमाणादावतिव्याप्तिवारणाय-अनेकेति । अनुगतत्वं समवेतत्वम् । घटाद्यत्यन्ताभावो घटाद्यनुगतोऽप्यसमवेत इति नाभावादावतिव्याप्तिः ।**

**सरलार्थः** – समानानां भावः स्वाभावःअनागन्तुको धर्मः सामान्यम् इति सामान्यपदनिर्वचनम् । परस्परविलक्षणत्वे सति एकधर्मवत्तां स्वाभाविकः अनागन्तुकः साधारणोऽनुगतो वा धर्मः सामान्यम् इत्यर्थः । अनेकेषु वस्तुषु अनुगतव्यवहारसिद्धिरेव सामान्यस्वीकारे प्रयोजनम् । तथाहि अनेकेषु घटेषु, मनुष्येषु, पशुषु, वृक्षेषु च घटः, मनुष्यः, पशुः, वृक्षः इत्यादिशब्दानां प्रयोगो व्यवहारो वा दृश्यते । एवं विविधवैलक्षण्यविशिष्टानां वस्तूनाम् एकेन शब्देन उल्लेख एव अनुगतव्यवहारः । अयम् अनुगतव्यवहारश्च अनुगतप्रतीतिं विना नोत्पद्यते । अनुगतप्रतीतिश्च अनुगतविषयं विना न सिध्यतीति अनुगतव्यवहारसाधिकायाः अनुगतप्रतीतेः विषयरूपः कश्चन धर्मः स्वीकरणीयः । तदेव सामान्यम् । यथा–घटत्वम्, मनुष्यत्वम्, पशुत्वम् इत्यादिकम् ।

तथा च – नित्यत्वे सति अनेकसमवेतत्वम् । अनेकसमवेतत्वमात्रोपादाने संयोगे अतिव्याप्तिः समभवति । संयोगगुणस्य अनेकसमवेतत्वात् । तद्वारणाय नित्यत्वपदमुपात्तम् । संयोगे अनेकसमवेतत्वस्य सत्वेपि नित्यत्वस्याभावात् नातिव्याप्तिः । नित्यत्वे सति समवेतत्वस्य मात्रोपादाने परमाणुपरिमाणादौ अतिव्याप्तिः सम्भवति । परमाणुपरिमाणादौ अनेकत्वाभावो वर्तते । तद्वारणाय अनेकत्वेति पदमुपात्तम् । परमाणुपरिमाणादौ नित्यत्वे सति समवेतत्वस्य सत्वेपि अनेकसमवेतत्वस्याभावात् नातिव्याप्तिः । समवेतत्वं नाम समवायसमबन्धेन वर्तमानत्वम्, तच्चाभावे नास्ति । घटात्यन्ताभावस्य नित्यत्वं नैयायिकैः अभ्युपगतम्, आकाशवायुजलाद्यनुगत्वेन तस्य अनेकवृत्तित्वं च । तथापि तस्य तत्तादाश्रयेषु अनेकासमवेतत्वात् न तत्र सामान्यलक्षणस्य अतिव्याप्तिः ।

**मूलम् – नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।**

**दीपिका – विशेषं लक्षयति – नित्येति ।**

**सरलार्थः** – विशेषः स्वतन्त्रः पदार्थ इति वैशेषिकाः मन्यन्ते । विशेषपदार्थस्वीकारेणैव कणादप्रवर्तितं दर्शनं वैशिषिक-संज्ञाभिधेयं भवतीति प्रसिद्धम् । विशेषा नाम नित्यद्रव्याणां परस्पर-व्यावर्तकाः परस्पर भेदसाधका वा । पार्थिव-जलीय-तैजस-वायवीय-परमाणवः आकाश-काल-दिग्-आत्म-मनांसि च नित्यद्रव्याणि । तेषु प्रत्येकं पृथक् पृथक् वर्तमानाः, तेषां परस्परभेदसाधकाश्च विशेषा इत्यर्थः ।

**समवायलक्षणम्**

**मूलम् – नित्यसमबन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा – अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति ।**

**दीपिका – समवायं लक्षयति-नित्येति । संयोगेऽतिव्याप्तिवारणाय-नित्येति । आकाशादावतिव्याप्तिवारणाय-समबन्ध इति । अयुतसिद्धलक्षणमाह-ययोरिति । 'नीलो घट': इति विशिष्टप्रतीतिः – विशेषणविशेष्यसमबन्धविषया विशिष्टप्रत्ययत्वात् – दण्डीतिप्रत्ययवदिति समवायसिद्धिः । अवयवावयविनाविति । द्रव्यसमवायिकारणमवयवः तज्जन्यं द्रव्यमवयवि ।**

**सरलार्थः** - समवायो नाम कश्चित् पदार्थो विद्यते इति सांख्यैः, पातञ्जलैः रामानुजीयैः, भाट्टैः अद्वैतवेदान्तिभिश्च नाङ्गीक्रियते । न्याय-वैशेषिकनये तु समवायनामको द्रव्यगुणकर्मसामान्यविशेषेभ्यो विलक्षणः कश्चिद् भावपदार्थः स्वीक्रियते । स च न्यायदर्शनप्रणेतुः गौतमस्यापि सम्मतः । अयं च पदार्थः सम्बन्धरूपः, अत एव उभयवृत्तिश्च । स च उत्पत्तिविनाशरहितो नित्यो वा ।

नित्यत्वे सति सम्बन्धत्वं समवायत्वम् । नित्यत्वञ्च प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् । सम्बन्धत्वमात्रोक्तौ संयोगे अतिव्याप्तिः स्यात्, तस्यापि सम्बन्धत्वात् । तथा च संयोगस्य सम्बन्धत्वेपि नित्यत्वस्याभावात् नातिव्याप्तिः । नित्यत्वस्य मात्रोक्तत्वात् आकाशादौ परमाणुषु चातिव्याप्तिः सम्भवति, तेषाम् अपि नित्यत्वात् । सम्बन्धशब्दग्रहणे तु न तत्रातिव्याप्तिः, आकाशादीनां परमाणुनां च नित्यत्वेऽपि सम्बन्धत्वाभावात् ।

अयं समवायः अयुतसिद्धवृत्तिः । अयुतसिद्धानां पदार्थानां मध्ये एव समवायो वर्तते । युतसिद्धः पृथक्सिद्धः, अयुतसिद्धः अपृथक्सिद्धः । ययोर्द्वयोः पृथगवस्थानं सम्बन्धहीनतादशायाम् अवस्थानं वा न सम्भवति तौ अयुतसिद्धौ इति ।

तथा च उक्तं तर्कसंग्रहे- ययोर्द्वयोर्मध्ये एकम् अविनश्यत् अनाश्रितमेव अवतिष्ठते तौ अयुतसिद्धौ । ययोः द्वयोः भावपदार्थरूपयोः सम्बन्धिनोः मध्ये एकं यावत्कालं न विनश्यति तावत्कालम् अन्यतराश्रितं सद् अपरेण सम्बन्धं सद् एव तिष्ठति, विद्यमानदशायाम् एकम् अपरेण असम्बद्धं सत् न तिष्ठति, तौ अयुतसिद्धौ इत्यर्थः । तत्र आधेयाः समवायप्रतियोगिनः, आधारास्तु समवायानुयोगिन इति बोध्यम् । यथा-तन्तुपटौ । तन्तुपटयोः मध्ये पटः तन्त्वाश्रितः सन् एव अवतिष्ठते, अतः तौ अयुतसिद्धौ । तत्र अनुयोगिरूपः तन्तुः आधारः, प्रतियोगिरूपः पटः आधेयः । एवम् अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये च अयुतसिद्धपदार्थौ । तयोः सम्बन्धः समवायः । तत्र अवयवानाम्, गुणिनः, क्रियावतः, जातिमतः, नित्यद्रव्यस्य च आश्रयत्वम् आधारत्वं वा । अवयविनः, गुणस्यः, क्रियायाः, जातेः, विशेषस्य च आश्रयित्वम्, आधेयत्वम् आधारित्वं वा । तदुक्तं च **प्रशस्तपादाचार्येण- अयुतसिद्धानाम् आधार्य्याधारभूतानां यः सम्बन्धः इह प्रत्ययहेतुः स समवायः** । अपृथक् सिद्धानाम् आधेयाधारभूतानां यः सम्बन्धः इह कपाले अयं घटः इत्यादिव्यवहारहेतुः सः समवाय इत्यर्थः ।

**समवायसद्भावे प्रमाणम्**

ननु समवायस्य अस्तित्वे किं प्रमाणम् ? उच्यते, समवायः, प्रत्यक्षसिद्धः । घटघटरूपे अयुतसिद्धौ इति तयोः सम्बन्धः समवायः । तत्र घट-घटरूपे यथा प्रत्यक्षेण गृह्येते, तथा तयोः समवायोपि प्रत्यक्षेणैव गृह्यते । तस्य प्रत्यक्षं च विशेषणतासम्बन्धेन भवतीति आशयः । तथा च उक्तम्- प्रत्यक्षं समवायस्य विशेषणतया भवेत् । स च समवायः सर्वेन्द्रियग्राह्यः । तथाहि रूप-रस-गन्ध-स्पर्श-शब्दाः यथाक्रमेण चक्षुः रसना-घ्राण-त्वक्-श्रोत्ररूपैः इन्द्रियैः गृह्यन्ते, सुखदुःखज्ञानेच्छादिकं च मनसा गृह्यते । एते गुणाः स्वस्वाधिकरणे समवायसमबन्धेन वर्तन्ते । तत्र चक्षुःत्वङ्मनोभिः स्वग्राह्यगुणानाम् अधिकरणानि अपि गृह्यन्ते इति तत्र तत्र गुणद्रव्ययोः समबन्धरूपः समवायोपि गृह्यते । घ्राण-रसना-श्रोत्राणि तु यद्यपि स्वगुणानाम् अधिकरणानि ग्रहीतुं न शक्नुवन्ति तथापि स्वग्राह्यगुणानां सामान्यानि गृह्णन्तीति तत्रस्थः समवायोपि घ्राणादीन्द्रियग्राह्यो भवतीति समवायस्य सर्वेन्द्रियग्राह्यत्वं सिद्धम् । समवायस्य अनुयोगिषु प्रतियोगिषु तु अनेके अतीन्द्रिया पदार्थाः सन्ति । तेषाम् अप्रत्यक्षेण तन्निष्ठस्य समवायस्यापि अप्रत्यक्षम् इति । अतः समवायस्य अप्रत्यक्षत्वात् अनुमानेनैव तस्य अस्तित्वं सम्बन्धरूपं सिध्यति ।

**समवायसाधकमनुमानम्** यथा- गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसमबन्धविषया विशिष्टबुद्धित्वात् दण्डीपुरुष इतिवत् । दण्डी पुरुषः इति विशिष्टबुद्धौ यथा दण्डः विशेषणरूपेण, पुरुषः विशेष्यरूपेण भासते, तथा दण्डपुरुषयोः सम्बन्धोपि भासते । अतो दण्डी पुरुष इति प्रतीतौ विशिष्टबुद्धित्वम् अस्तीति व्याप्तिः सिध्यति । एवं च नीलो घट इति गुणविशिष्टबुद्धौ, गतिमान् देवदत्त इति क्रियाविशिष्टबुद्धौ, पटत्ववान् पट इति जातिविशिष्टबुद्धौ च घटादि विशेष्यतया, नीलादि विशेषणतया, तत्तत्द्समबन्धश्च संसर्गतया भासन्ते । यथा दण्डपुरुषयोः समबन्धात् अस्य सम्बन्धस्य अयमेव भेदो यत् दण्डपुरुषौ पृथक्सिद्धौ नीलपदार्थौ तु न पृथक्सिद्धौ इति । अपृथक्सिद्धयोः पदार्थयोः अयं समबन्ध एव समवायः । न चायं समबन्धः संयोगो भवितुमर्हति । संयोगसामान्यं प्रति द्रव्यस्य समवायिकारणत्वात् द्रव्याणां मध्ये एव संयोगो भवितुम् अर्हति, न तु द्रव्यगुणयोः, द्रव्यक्रिययोः,

द्रव्यसामान्ययोर्वा । तथाहि सम्बन्धस्य द्विष्ठत्वात् संयोगस्य संयोगिद्वये वृत्तित्वं वाच्यम् । प्रकृतस्थले संयोगसमबन्धे स्वीकृते गुणादीनाम् अपि संयोगित्वात् संयोगस्य गुणादौ वृत्तित्वं स्वीकरणीयं भवेत् । संयोगस्य तु गुणत्वेन गुणादौ संयोगसत्ताया अभावात् नात्र संयोगः स्वीकरणीयः । नाप्यत्र तादात्म्यं सम्बन्धः । तादात्मयं नाम अभेदः । अत्र तु समबन्धिनोः भिन्नत्वात् तादात्म्यसमबन्धो न स्वीकार्यः । नाप्यत्र स्वरूपसम्बन्धो ग्रहणीयः, स्वरूपसम्बन्धस्य क्वचित् प्रतियोगिरूपता, क्वचिद् अनुयोगिरूपता इति प्रतियोग्यनुयोगिनाम् आनन्त्येन प्रतियोग्यनुयोग्यात्मकानाम् अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् । अतो लाघवात् संयोगतादात्मयस्वरूपादिभ्यो भिन्न एव समवायः स्वीकरणीय इति नैयायिकानां सिद्धान्तः ।

**अभावस्य चातुर्विध्यम्**

**मूलम् - अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य ।**

**दीपिका - प्रागभावं लक्षयति-अनादिरिति । आकाशादावतिव्याप्तिवारणाय-सान्त इति । घटादौ अतिव्याप्तिवारणाय-अनादिरिति । प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहारहेतुः प्रागभावः ।**

**सरलार्थः** - अभावो नाम अस्मदादिभिः प्रतीयमानो द्रव्यादिषट् पदार्थेभ्यो भिन्नः कश्चन पदार्थ इति । स तु न स्वतन्त्रः पदार्थः, अपि तु भावपरतन्त्रो भावज्ञानपरतन्त्रो वा ।

वस्तुन उत्पत्तेः प्राक् समवायिकारणे प्रतीयमानो योऽभावः स प्रागभावः । अनादित्वे सति सान्तत्वं प्रागभावत्वम् । यस्य आदिर्नास्ति अन्तस्तु अस्ति स प्रागभाव इत्यर्थः । अनादित्वमात्रोक्तौ आकाशादावतिव्याप्तिः । आकाशस्य अनादित्वात् । अतः सान्तत्वपदमुपात्तम् । सान्तत्वपदमात्रोक्तौ घटादावतिव्याप्तिः । घटस्य अनित्यत्वात् अन्तत्वं जायते । अतः अनादित्वम् उपात्तम् । भविष्यतीति प्रतीतिसिद्धोऽभावः प्रागभावः इत्युच्यते । प्राक् अभावः इति व्युत्पत्त्या प्रागभाव इति संज्ञा । भविष्यति इति कथनेन इदानीं नास्ति इत्यप्यर्थात् सिध्यति । तत्र नञ विषयीभूतोऽभावः प्रागभावः ।

**मूलम् - सादिरनन्तः प्रध्वंसः । उत्पत्तयनन्तरं कार्यस्य ।**

**दीपिका - प्रध्वंसं लक्षयति - सादिरिति । घटादौ अतिव्याप्तिवारणाय-अनन्त इति । आकाशादौ अतिव्याप्तिवारणाय-सादिरिति । प्रतियोगिजन्यः प्रतियोगसमवायिकारणवृत्तिः ध्वस्त इति व्यवहारहेतुवध्वसंः ।**

**सरलार्थः** - कस्यापि पदार्थस्य उत्पत्त्यनन्तरं समवायिकारणे तस्य योऽभावः अनुभूयते स ध्वंसाभावः । यथा कपालसंयोगाद् घटोत्पत्तिः भवति । घटोत्पत्त्यनन्तरं च मुद्गराभिधातादिवशात् घटसमवायिकारणरूपे कपाले यो घटाभावो अनुभूयते स ध्वंसाभावः । तथा च ध्वंसाभावोऽपि समवायिकारणवृत्तिः । स चाभावः सादिः अनन्तश्चः । सादित्वे सति अनन्तत्वं ध्वंसाभावत्वम् । सादित्वमात्रोक्तौ घटादावतिव्याप्तिः । तस्य च सादित्वात् । अतः अनन्तत्वम्, घटादेस्सान्तत्वात् नातिव्याप्तिः । अनन्तत्वमात्रोक्तौ आकाशादावतिव्याप्तिः । आकाशस्य अनन्तत्वात् । अतः सादित्वमुक्तम् । आकाशस्य सादित्वाभावात् नातिव्याप्तिः । एतत्प्रदर्शयति - घटादेः उत्पत्तेः अनन्तरं कदाचित् जायमानः अभावः - घटो ध्वस्तः - नष्टः इति प्रतीतिसिद्धः अभावः प्रध्वंसाभावः । घटो ध्वस्तः - इति प्रतीत्या तदानीं नास्तित्वं प्रतीयते । तत्र नञो विषयोऽभावः प्रध्वंसाभावः ।

**मूलम् - त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा भूतले घटो नास्तीति ।**

**दीपिका - अत्यन्ताभावं लक्षयति-त्रैकालिकेति । अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गावच्छिनेति । ध्वंसप्रागभायोरतिव्याप्तिवारणाय-त्रैकालिकेति ।**

**सरलार्थः** - नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम् । यस्य संसर्गाभावस्य उत्पत्तिर्नास्ति विनाशोपि नास्ति सोऽत्यन्ताभावः । भूतभविष्यद्वर्तमानरूपे त्रिकाले वर्तमानो यः संसर्गाभावः सोऽत्यन्ताभाव इत्यर्थः । प्रतियोगिसमवायिकारणव्यतिरिक्तकाले एव अत्यान्ताभावः सम्भवति । भूतले घटो नास्ति इत्युक्ते भूतले घटनिषेधः घटस्यसंबन्धनिषेध एव न तु घटस्यैव निषेधः, अन्यत्र घटस्य सत्वात् । अत अत्यन्ताभावः सम्बन्धावच्छिन्नप्रतियोगिताकः । प्रागभावप्रध्वंसाभावौ तु न संसर्गावच्छिन्नप्रतियोगिताकौ, तयोस्संबन्धाभारात् । अत्यन्ताभावव्यवहारस्य त्रैकालिकत्वात् स एव त्रैकालिकः, नित्यः । घटो नास्ति इति व्यवहारस्तु त्रैकालिकः ।

नित्यत्वे सति अभावत्वम् अत्यन्ताभावस्य लक्षणं अस्ति चेत् अन्योन्याभावे अतिव्याप्तिः स्यात् । घटपटयोः अभेदस्य अन्योन्याभावरूपस्य नित्यत्वात्, न हि घटः पटो भवेत्, न वा पटो घटः कदाचित् भवेत् । अन्ततः आत्मानां हि परस्सपरं भेदो नित्यः । नित्यत्वे सति संसर्गावच्छिन्नप्रतियोगिताकत्वलक्षण स्वीकारे पुनः अन्योन्याभावे दोषः स्यात्, तस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगित्वात् । ध्वंसप्रागभावे दोषवारणाय त्रैकालिकत्वमुक्तम् । अतः त्रैकालिकसंसर्गावच्छिन्न-प्रतियोगिताकत्वम् अत्यन्ताभावत्वम् ।

**मूलम् - तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । यथा - घटः पटो नेति ।**

**दीपिका - अन्योन्याभावं लक्षयति-तादात्म्येति । प्रतियोगितावच्छेदकारोप्यसंसर्गभेदात् एकप्रतियोगिकयोरप्यत्यन्ताभावः न्योन्याभावयोर्बहुत्वम् । केवलदेवदत्ताभावात् दण्डयभाव इति प्रतीत्या विशिष्टाभावः। 'एकसत्वेऽपि द्वौ न स्त' इति प्रतीत्या द्वित्वावच्छिन्नाभावः, संयोगसम्बन्धेन च घटवति समवायसम्बन्धेन घटाभावः, तत्तद्धटाभावाद्धटत्वावच्छिन्नप्रतियोगिताक-सामान्याभावश्चातिरिक्तः । एवमन्योन्याभावोऽपि । घटत्वेन पटो नास्तीति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावो नाङ्गीक्रियते । पटत्वेन घटो नास्तीति तस्यार्थः । अतिरिक्तत्वे स केवलान्वयी । सामयिकाभावोऽप्यत्यन्ताभाव एव समयविशेषे प्रतीयमानः । घटाभाववति घटानयने अत्यन्ताभावस्य अन्यत्र गमनाभावेऽपि अप्रतीतेर्घटापसरणे सति प्रतीतेर्भूतले घटसंयोगप्रागभावध्वंस-योर्घटात्यन्ताभावप्रतीतिनियामकत्वं कल्प्यते । घटवति तत्संयोगप्रागभावध्वंसयोरसत्वादत्यन्ताभावस्याप्रतीतिः । घटापसरणे च संयोगध्वंससत्वात्प्रतीतिरिति । केवलाधिकरणादेव नास्तीतिव्यवहारोपपत्तौ अभावो न पदार्थान्तरमिति गुरवः, तन्न । अभावानङ्गीकारे कैवल्यस्य निर्वक्तुमशक्यत्वात् । अभावाभावो भाव एव, नातिरिक्तः, अनवस्थाप्रसङ्गात् । ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रतियोग्येवेति प्राञ्चः । अभावाभावस्त्वतिरिक्त एव । तृतीयाभावस्य प्रथमाभावरूपत्वात् नानवस्थेति नवीना॥**

**सरलार्थः** - तादात्मयसम्बन्धावच्छिन्ना प्रतियोगिता यस्य सः एतादृशोऽभाव इत्यर्थः । तादात्म्यसमबन्धेन घटः स्वस्मिन्नेव वर्तते न तु कपाले भूतले अन्यत्र वा, तथा च तादात्म्यसम्बन्धेन घटादेरभाव एव अन्योन्याभाव इति स च प्रतियोगितावच्छेदकीभूतघटत्वादिमद्धटादिकं विहायाऽन्यत्र वर्तते इति । प्रागभावध्वंसवारणाय लक्षणे तादात्म्येति पदम् उपात्तम् । अत्यन्ताभाववारणाय तादात्म्यत्वं समबन्धांशे निवेशितम् । घटः पटो न इत्यस्य पटप्रतियोगिकभेदवान् घटः इत्यर्थः। यथा- एकप्रतियोगिकौ ध्वंसप्रागभावौ भिनौ तथा एकप्रतियोगिकस्य अत्यन्ताभावस्य अन्योन्योन्याभावस्य च प्रयोजकभेदात् बहुविधत्वमिति प्राचीनमतम् । प्रतियोगितावच्छेदकधर्मसंसर्गनानात्वम् अत्यन्ताभावबहुत्वप्रयोजकम्, प्रतियोगितावच्छेदक नानात्वम् अन्योन्याभावनानात्वप्रयोजकमिति भावः । केवलविशिष्याऽभावो विशेषणविशेष्यविशेष्याऽभावादिरिक्तः । यथा - दण्डविशिष्टदेवदत्ताऽभावो अतिरिक्तः । तथा च भूतले घटसत्वेऽपि घटपटौ न स्तिः इति प्रतीत्या घटपटोभयत्वावच्छिन्नाभावः, केवलघटाऽभावादतिरिक्तः इत्यर्थः । उभयाभावस्य केवलाभावानतिरिक्तत्वे केवलघटवति घटपटोभयं नास्तीतिप्रतीतिर्न स्यात् । संयोगेन घटवति भूतले समवायेन घटाभावः संयोगावच्छिन्नघटाभावाद्भिन्न इत्यर्थः । पटत्त्व-घटत्व-धर्मद्वयाऽवच्छिन्नप्रतियोगाकाभावात् घटत्वामात्रा-वच्छिन्नप्रतियोगिकाभावो भिन्नः, यथा- नीलघटाभाववति तद्भिन्नघटत्वस्य संभवात्, अन्यथा यत्किञ्चत्घटवति घटो नास्तीति प्रत्ययापत्तिः, घटाऽन्तरि तद्धटाभावप्रत्ययाऽनुपपत्तिश्च स्यात् । केवलघटान्योन्याभावात् रक्तत्वादिविशेषण-विशिष्टाऽन्योन्याऽभावो भिन्नः, घटपटोभयभेदश्च भिन्नः, अन्यथा केवलघटे विशिष्टघटभेदप्रतीत्यनुपपत्तिः स्यात् इति ।

घटत्वेन पटाभाव: सर्वत्रास्ति, घटत्वेन पटस्य कुत्राप्यसत्वात्, सोऽयं व्यधिकरणधर्मावच्छिन्नाऽभाव: केवलाभावातिरिक्त इति नवीना: वदन्ति । तद्दूशयति यथा - अभावज्ञानं प्रति प्रतियोगितावच्छेदकविशिष्टज्ञानं कारणं भवति । घटत्वविशिष्यपटाभावे तु तादृशप्रतियोगिज्ञानस्याभावात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतीतिरेव अप्रसिद्ध इति । यदि च घटत्वेन पटो नास्तीति प्रतीतिर्भवति तदा तस्य घटत्वविशिष्टपटाभाव इति न अर्थ:, किन्तु पटवृत्तिर्घटत्वाभाव इत्यर्थ:, स तु केवलात्यन्ताभाव एव । पटाधिकरणघटत्वाभावात् अतिरिक्तत्वे तु स: व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽभाव: केवलान्वयी सर्वत्र वर्तते । भूतले घटसत्वसमये न घटाभावप्रतीति:, घटासत्वदशायां तु घटाभावप्रतीतिर्भवति, अत उत्पत्तिविनाशशाली अयमभाव इति मतम् । तद्दूषणयति - यथा प्रतियोग्यनाधारसमये प्रतीयमानो अत्यन्ताभाव एव सामयिकाभावो न तु अतिरिक्त:, न च उत्पत्तिविनाशशाली अभाव:, किन्तु अत्यन्ताभाव एव ।

घटाभाववति भूतले घटाऽऽनयने सत्यपि तदानीं घटाऽत्यन्ताभावस्य अन्यत्र स्थले गमनाभावेऽपि (तस्य क्रियावत्वविरहात्) घटाभावप्रत्ययो न सम्भवति । पुनश्च घटस्य अपसारणे सति घटात्यन्ताभावस्य घटाभावप्रतीति: सम्भवति । घटात्यन्ताभावप्रतीतिनियमजनकत्वं घटभूतलयो: य: संयोग: तत्प्रागभावध्वंसयो: एव । अन्वयव्यतिरेकाभ्यां दर्शयति - घटानयनकाले घटवति भूतले घटाभूतलयो: यस्संयोगस्तस्य प्रागभावध्वंसयो: अभावात् घटात्यन्ताभावस्याप्रतीति:, ततो घटापसारणे च घटभूतलयोर्य: संयोग: तद्ध्वंस सत्वेन घटात्यन्ताभावस्य प्रतीति: जायते ।

केवलाधिकरणादेव नास्तीतिव्यवहारोपपत्तौ अभावो न पदार्थान्तरम् इति प्राभाकरमीमांसकानामाशय: । तन्न, अभावनङ्गीकारे केवल्यस्य निर्वक्तुमशक्यत्वात् । वस्तुतस्तु कैवल्यं प्रतियोग्यनवच्छिन्नत्वम्, तथा च अभाव अनङ्गीकारे कस्य अधिकरणं कस्य वा प्रतियोगी भवेद् इति ध्येयम् । येन इन्द्रियेण या व्यक्तिर्गृह्यते तेन इन्द्रियेण तद्गता जातिर्तदभावश्च गृह्यते इति नियमेन तत्तद्गन्धरूपरसाद्यभावानां कालाकाशादिवृत्तीनां कालाकाशाद्यात्मकत्वे तत्तदिन्द्रियेण कालाकाशादिनामग्रहणात् तेषामप्रत्यक्षाऽऽप्रति: स्यात् इति । ननु अभावस्यातिरिक्तत्वे तदभावोऽप्यतिरिक्त:, एवं तदभावोपि एत्येवम् अनवस्था प्रसङ्गात् । परंतु घटाभावाभावो घट एव न तु अतिरिक्त:, अनवस्था न भवति इति भाव: । घटध्वंसस्य प्रागभाव: - स्व(प्रागभाव) प्रतियोगिध्वंसप्रतियोग्यात्मकघटस्वरूप:, घटप्रागभावस्य ध्वंस: - स्व(ध्वंस) प्रतियोगिप्रागभावप्रतियोग्यात्मकघटस्वरूप एव इति प्राचीनमतम् । नवीनास्तु घटप्रागभावदशायामपि उत्पस्यमानघटो ध्वस्तो भविष्यतीति प्रतीत्या घटध्वंसस्य प्रागभावसत्ताया अवगमात् घटध्वंसप्रागभावो घटातिरिक्त: । एवं घटध्वंसदशायामपि घटप्रागभावो नष्ट इति प्रतीत्या घटप्रागभावस्य ध्वंससत्ताया अवगमात् घटप्रागभावस्य ध्वंसो घटातिरिक्त इति सिद्धान्तयन्ति । घटाऽभावाऽभावो घटातिरिक्त: अभावपदार्थ एव, न तु भावपदार्थ इति । युक्तिस्तु यथा—अभावस्य स्वरूपसमबन्धेन वृत्तिता सर्वसमसिद्धा, न तु समवायेन संयोगेन वा, तथा च स्वरूपेण भूतले घटाभाव एव, घटदशायां भूतले घटाभावोनास्तीति प्रतीत्या घटाभावाभावस्य स्वरूपेण वृत्तित्वं न तु संयोगेन । घटाभावाभावाभावस्य तु घटाभावस्वरूपत्वान्नाऽनवस्था इत्यर्थ: ।

**उपसंहार:**

**मूलम् - सर्वेषामपि पदार्थानां उक्तेष्वेवान्तर्भावात् सप्तैव पदार्था: इति सिद्धम् ।**

**सरलार्थ:** - अत्र पदार्थानाम् इति कथनात् शक्तिसादृश्यादयो ग्राह्या:, न तु प्रमाणप्रमेय इत्यादय:, तेषां पदार्थत्व अकथनात् । अत एव महर्षिणा सूत्रे पदार्थानाम् इत्येव कथितम् । नैव प्रमाणप्रमेयेत्वादिसूत्रे पदार्थपदं प्रयुक्तम् । प्रमाणादीनि षोडश मुमुक्षुभिरवश्यं ज्ञेयानि तत्वानीत्येव भाष्ये व्याख्यातम् । अतश्शक्तिसादृश्यादय एवात्र ग्राह्या: ।

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) सामान्यम् .............. भवति । (द्विविधम्, त्रिविधम्, पञ्चविधम्)

(२) नित्यद्रव्यवृत्तयो ................. तु अनन्ताः । (कर्माणि, विशेषाः, गुणाः)

(३) ............ सम्बन्धः समवायः । (संयोगः, स्वरूपः, नित्यः)

(४) अनादिः सान्तः ............... अस्ति । (प्रागभावः, ध्वंसः, अत्यान्ताभावः)

(५) नित्यः अभावः .............. अस्ति । (प्रागभावः, ध्वंसः, अत्यान्ताभावः)

(६) परमाणुभेदकः ............. पदार्थः अस्ति । (विशेषः, अभावः, द्रव्यम्)

(७) अभावः .............. वर्तते । (एकविधः, चतुर्विधः, द्विविधः)

(८) पदार्थाः ............... सन्ति । (नव, दश, सप्त)

(९) पराजातिः .............. अस्ति । (द्रव्यत्व, सत्ता, कर्मत्व)

(१०) सादिरनन्तः ............. अस्ति । (प्रागभावः, ध्वंसः, अत्यान्ताभावः)

**२. एकवाक्येन उत्तराणि लिखत ।**

(१) समवायस्य लक्षणं लिखत ।

(२) सामान्यं कतिविधं भवति ?

(३) अन्योन्याभावस्योदाहरणं लिखत ।

(४) अयुतसिद्धपदार्थः कः ?

(५) प्रागभावस्य स्वरूपं किम् ?

(६) विशेषस्य लक्षणं लिखत ।

(७) किन्नाम त्रैकालिकः ?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) सदलकृत्यं सामान्यस्य लक्षणं लिखत ।

(२) विशेषस्य स्वरूपं प्रतिपादयत ।

(३) सदलकृत्यं समवायस्य लक्षणं प्रतिपादयत ।

(४) प्रागभावस्य लक्षणं विशदयत ।

(५) अत्यन्ताभावं व्याख्यात ।

**४. टिप्पणीः लिखत ।**

(१) अयुतसिद्धपदार्थः ।

(२) विशेषाः ।

(३) प्रध्वंसाभावः ।

**५. निबन्धात्मकमुत्तरं लिखत ।**

(१) सोदाहरणं अन्योन्याभावं विशदयत ।

(२) सानुमानं समवायसिद्धिं कुरुत ।

(३) जातेः परत्वापरत्वविचारः प्रतिपाद्यताम् ।

•

# १३ शाब्दबोधप्रक्रिया १

**उपोद्धात :**

काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् इतीदं वचनं को वा न जानाति संस्कृतज्ञः ।'नामरूपे व्याकरवाणि', नामरुपे व्याकरोत् इत्यादि श्रुतिस्मृत्ययो नामरूपसंयोजनमेव सृष्टिरिति प्रतिपादयन्ति । तत्रापि स्थूलं जगदिदं तु नामरूपात्मकमिति किञ्चिदालोचने स्पष्टं ज्ञायते । तत्र नामव्याकरणं पाणिनीयं शास्त्रं चेत्, रूपव्याकरणे काणादबादरायणीये । अत्रापि काणादं बाह्यस्थूलजगत्संबन्धि, बादरायणीयं आन्तरसूक्ष्मवस्तूवस्तुविषयमिति विषयव्यवस्थापि स्पष्टा ।एवं काणादमिदं रूपव्याकरणमिति पदार्थधर्मसंग्रहः इति प्रशस्तपादीया एतच्छास्त्रसंज्ञा स्पष्टयति । बाह्यमिदं हि जगत् पद-अर्थात्मकम् । अत एव द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां इति निरदेशि । चत्वारि पदजातानि द्रव्यवाचीनि, गुणवाचीनि, क्रियावाचीनि, जातिवाचीनि । पदानां चतुर्विधत्वात् पदार्थाः प्रथमं द्रव्यगुणकर्मसामान्यभेदाच्चत्वारः । एवं विभागस्य भेदमूलकत्वात्, भेदस्य चान्ते विशेष मूलकत्वात् पञ्चमः पदार्थो विशेष आवश्यकः । एवं गुणगुण्यादिभेदे सिद्धे संबन्धस्यावश्यकत्वात् समवायोऽप्यावश्यकः । अभावस्तु न पदार्थः, किन्तु वाक्यार्थः ।वेदान्तिनां समवायनिराकरणादिकं त्वभिप्रायान्तरेण शास्त्रान्तरं हि तत् ।व्यावहारिकपदार्थशास्त्रे तु स आवश्यक एव . आद्याश्चात्वारः सार्वजनीनाः ।इतरौ द्वौ तु शास्त्रीयौ ।

एवं षट्पदार्थात्मकमिदं जगत्परस्परसापेक्षमेव । प्रधानाप्रधानादिविभागोऽपि सापेक्ष एव । एवं परस्परसापेक्षत्वेऽवर्जनीये, अपेक्षाणामपि बहुविधत्वमनिवार्यम् ।अयं च सापेक्षतावादः विज्ञानलोके यथा अनिवार्यः तथा बाह्ये स्थूले जगति अपि अनिवार्यः । पदार्थानां परस्परसापेक्षत्वस्य समानत्वेऽपि तत्तद्वस्तुनुगुणमपेक्षामनेकत्वात्सापेक्षत्वं विशेषे पर्यवस्येदेव । एकस्मिन् गृहे वसतां मनुजानां परस्परसापेक्षत्वेपि तत्तदपेक्षाः किल परस्परं भिद्येरन्नेव । गृहयजमानः एकस्याः पतिः, अन्यस्य पिता, अन्यस्य भ्राता, अन्यस्य मातुलः, अन्यस्य स्वामी इत्येवं खलु परस्परं संबन्धो वर्तते । एतत्सर्वमेकस्मिन् निरूपकभेदादेव किल वर्तते । निरूप्यनिरूपकभावः किल धर्ममूलकः । पत्नीनिरूपितं पतित्वम्, पुत्रनिरूपितं पितृत्वम्, भृत्यनिरूपितं स्वामित्वमित्यादि दृष्टमेव । अतश्च सर्वं निरूप्यनिरूपकभावापन्नम् अत एव धर्मधर्मिभावापन्नं च । एवं विश्लेषणं यदि न ज्ञायते, तदा सांकर्यमप्यनिवार्यमेव । एकैव किल स्त्री पत्न्यपि भवति, मातापि भवति, सहोदर्यपि भवति, निरूप्यभेदात् । यथा एकैव सीता, रामनिरूपितपत्नीत्ववती, लवकुशनिरूपितमातृत्वती, ऊर्मिलानिरूपितसहोदरीत्ववती भवति ।एतादृशीरीत्या पदार्थविश्लेषणाभ्यास एव तर्कशास्त्रस्य प्रधानो विषयः, विशेषतो नवीनतर्कशास्त्रस्य ॥

ते च पदार्थानां परस्परं संबन्धा बहुविधाः । यथा

अवच्छेद्यावच्छेदकभावः, आधाराधेयभावः, उद्देश्यविधेयभावः, उपादानोपादेयभावः, कार्यकारणभावः, गुरुशिष्यभावः, नियामयनियामकभावः, नियोज्यनियोजकभावः, निरूप्यनिरूपकभावः, पतिपत्नीभावः, पितृपुत्रभावः, प्रकारप्रकारिभावः, प्रतिपाद्यप्रतिपादकभावः, प्रतियोग्यनुयोगिभावः, प्रयोज्यप्रयोजकभावः, लक्ष्यलक्षणभावः, वन्द्यवन्दकभावः, वाच्यवाचकभावः, विशेषणविशेष्यभावः, विषयविषयिभावः, व्याप्यव्यापकभावः, सेव्यसेवकभावः, स्वस्वामिभावः, स्वामिभृत्य (शेषशेषिभावः) इत्यादयः पदार्थानां संबन्धा अनन्ताः दृश्यन्ते । यदा भूतले घटं पश्यति, तदा घटभूतलयोः आधारोयेभावरूपसमबन्धः प्रतीयते। आधाराधेयभावो नाम आधारता, आधेयता च ।आधारोऽधिकरणमिति पर्यायौ ।तथा च तत्र भूतलनिष्ठाधिकरणता, घटनिष्ठाधेयता । आधेयत्वाधिकरणयोः निरूप्यनिरूपकभावः संबन्धः । भूतलनिष्ठाधिकरणतानिरूपिताधेयतावान् घटो भवति, अथवा घटनिष्ठाधेयतानिरूपिताधिकरणतावत् भूतलं भवति ।पदार्थानां संबन्धस्य प्रायो नियतत्वेऽपि विशेषणविशेष्यस्यभावस्तु बुद्ध्यपेक्षया भिद्येतापि ।

**आधाराधेयभावः**

येन सम्बन्धेन यस्मिन्नाश्रये यद्वस्तु वर्तते तद्वस्तुनिष्ठा आधेयता तदाश्रयनिष्ठाधिकरणता निरूपिता तत्सम्बन्धावच्छिन्ना। यथा संयोगसम्बन्धेन भूतले घटो वर्तते । घटनिष्ठा आधेयता भूतलनिष्ठानिरूपिता संयोगसम्बन्धावच्छिन्ना ।

**आधेयतानिरूपकम् अधिकरणम् ।** यथा – घटनिष्ठाधेयतानिरूपकं भूतलम् ।

**अधिकरणतानिरूपकम् आधेयतम् ।** यथा – भूतलनिष्ठाधिकरणतानिरूपको घटः

**आधाराधेयभावः**




**कार्यकारणभावः**

**यस्य विद्यमानत्वेन यस्य उत्पादः तन्निष्ठकार्यतानिरूपिता तन्निष्ठकारणता ।** यथा तन्तूनां विद्यमानतया पटस्य उत्पादः, तन्तुनिष्ठकारणता पटनिष्ठकार्यतानिरूपिता ।

**येन सम्बन्धेन कारणवति कार्यं येन सम्बन्धेन भवति तत्सम्बन्धावच्छिन्न कार्यतानिरूपिता तत्सम्बन्धावच्छिन्नकारणता ।** यथा – समवायसम्बन्धेन तन्तुसंयोगवति तन्तौ समवायेन भवति पटः । समवायसम्बन्धावच्छिन्न पटनिष्ठकार्यतानिरूपिता समवायसम्बन्धावच्छिन्ना तन्तुसंयोगनिष्ठा कारणता ।

**कार्यतानिरूपकं कारणम् ।** यथा – पटनिष्ठकार्यतानिरूपकः तन्तुसंयोगः ।

**कारणतानिरूपकं कार्यम् ।** यथा – तन्तुसंयोगनिष्ठकारणतानिरूपकः पटः ।

**कार्यकारणभावः**



**कार्यकारणभावे विशेषः**

**कार्यकारणयोः सामानाधिकरण्यमावश्यकम् । सामानाधिकरण्यम्- तदधिकरणवृत्तित्वम् ।** यथा – पटतन्तुसंयोगयोः । समवायसम्- बन्धेन पटाधिकरणे तन्तौ तन्तुसंयोगः समवायेन वर्तते ।

कार्यता कारणता च सम्बन्धविशेषावच्छिन्नैव भवति ।

**समवायिकारणस्थले- कार्यता समवायसम्बन्धावच्छिन्ना कारणता तादात्मय सम्बन्धावच्छिन्ना ।** यथा घटनिष्ठकार्यता समवायसम्बन्धावच्छिन्ना, तन्निरूपिता तन्तुनिष्ठा कारणता तादात्मयसम्बन्धावच्छिना । तन्त्वर्तर्भावेण सामानाधिकरण्यम् ।

**असमवायिकारणस्थले- कार्यता समवायसम्बन्धावच्छिन्ना, कारणता क्वचित् समवायसम्बन्धानच्छिन्ना क्वचित् स्वसमवायिम्वायसम्बन्धावच्छिन्ना ।**

आद्या यथा आद्यपतननिष्ठकार्यता समवायसम्बन्धावच्छिन्ना, तन्निरूपिता गुरुत्वनिष्ठकारणता समवायसम्बन्धावच्छिन्ना। फलन्तर्भावेण सामानाधिकरण्यम् । द्वितीया यथा पटरूपनिष्ठकार्यता समवायसम्बन्धावच्छिन्ना तन्निरूपिता तन्तुरूपनिष्ठकारणता स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्ना पटत्वान्तर्भावेण सामानाधिकरण्यम् ।

**निमित्तकारणस्थले तु-** कार्यतायाः कारणतायाश्च अवच्छेदेकीभूतः अनुगतसमबन्धो नास्ति । **नाना सम्बन्धावच्छिन्ना कार्यता कारणता च ।** यथा घटनिष्ठसमवायसम्बन्धावच्छिन्नकार्यता तन्निरूपिता दण्डनिष्ठकारणता स्वजन्यभ्रमिजन्यभ्रमिमत्तासम्बन्धावच्छिन्ना । कपालान्तर्भावेण सामानाधिकरण्यम् ।

घटप्रत्यक्षनिष्ठा विषयतासम्बन्धावच्छिन्नकार्यता तन्निरूपिता घटनिष्ठा तादात्मयसम्बन्धावच्छिन्नकारणता । घटान्तर्भावेण सामानाधिकरण्यम् । घटध्वंसनिष्ठा प्रतियोगितासम्बन्धावच्छिन्ना कार्यता, तन्निरूपिता घटनिष्ठ तादात्मयसम्बन्धावच्छिन्ना कारणता । घटान्तर्भावेण सामानाधिकरण्यम् । द्रव्यविषयकचाक्षुषप्रत्यक्षनिष्ठा विषयसम्बन्धावच्छिन्नकार्यता, तन्निरूपिता अद्भूतरूपनिष्ठा समवायसम्बन्धावच्छिन्नकारणता । द्रव्यान्तरभावेण सामानाधिकरण्यम् ।

अनुमितिनिष्ठा समवायसम्बन्धावच्छन्नकार्यता, तन्निरूपिता परामर्शनिष्ठ समवायसम्बन्धावच्छिन्नकारणता । आत्मान्तर्भावेण सामानाधिकरण्यम् । घटनिष्ठाकालिकसम्बन्धावच्छिन्नकार्यतानिरूपिता कालनिष्ठतादात्मय सम्बन्धावच्छिन्ना कारणता । कालान्तर्भावेण सामानाधिकरण्यम् । धटनिष्ठ स्वाश्रयसंयोगसम्बन्धावच्छिन्नकार्यतानिरूपिता अदृष्टनिष्ठा समवायसम्बन्धावच्छिन्नकारणता । आत्मान्तर्भावेण सामानाधिकरण्यम् ।

**प्रतियोग्यनुयोगिभावः**

**यत्र यत्र सम्बन्धो भवति तन्निष्ठ प्रतियोगितानिरूपिता तन्निष्ठानुयोगिता ।** यथा जपाकुसुमे रक्तरूपसमवायो भवति । रक्तरूपनिष्ठप्रतियोगितानिरूपिता जपाकुसुमनिष्ठानुयोगिता ।

**यत्र यस्य यःसम्बन्धो भवति तन्निष्ठसंसर्गतानिरूपिकौ तौ प्रतियोग्यनुयोगिनौ ।** यथा दण्डे रक्तरूपस्य समवायो भवति । समवायनिष्ठसंसर्गता निरूपकौ रक्तदण्डौ ।

**आधेयाः प्रतियोगिनः, आधारास्त्वनुयोगिनः ।**

**प्रतियोगितानिरूपकः अनुयोगितानिरूपकश्च संसर्गः ।** यथा रूपनिष्ठप्रतियोगितानिरूपकः कुसुमनिष्ठानुयोगितानिरूपकश्च समवायः ।

**येन समबन्धेन यद्वस्तु नास्ति तद्वस्तुनिष्ठप्रतियोगिता तत्सम्बन्धावच्छिन्ना तदभावनिरूपिता ।** यथा इह समवायेन गन्धो नास्ति । अत्र गन्धनिष्ठप्रतियोगितासमवायसम्बन्धावच्छिन्ना गन्धाभावनिरूपिता ।

**प्रतियोगितानिरूपकः अभावः ।** यथा गन्धनिष्ठप्रतियोगितानिरूपकः गन्धाभावः ।

**प्रतियोग्यनुयोगिभावः**




**विषयविषयिभावः**

**ज्ञानीयविषयता त्रिविधा विशेष्यता प्रकारता संसर्गता चेति ।** प्रकारतैव विशेषणता इत्यच्यते । विषयतात्रयमपि विषयनिष्ठो धर्मः । भूतलं संयोगेन घटवद् इति ज्ञाने भूतलनिष्ठा विशेष्यता घटनिष्ठप्रकारता संयोगनिष्ठा संसर्गता घटवद् इति ज्ञाने भूतलनिष्ठा विशेष्यता घटनिष्ठप्रकारता संयोगनिष्ठा संसर्गता ।

**यत्र धर्मिणि यः येन समबन्धेन प्रकारः** (विशेषणं) **तत्सम्बन्धावच्छिन्ना तन्निष्ठा प्रकारता तद्धर्मिनिष्ठविशेष्यता निरूपिता ।** यथा – भूतलं संयोगेन घटवत्–भूतले घटः संयोगेन प्रकारः । अतः संयोगसम्बन्धावच्छिन्ना घटनिष्ठप्रकारता भूतलनिष्ठविशेष्यतानिरूपिता । **सत्स्वपि बहुषु धर्मेषु विशेष्यं युद्धर्मपूर्वकं भासते स धर्मः विशेष्यतावच्छेदकः ।** यथा भूतलं घटवत् इति ज्ञाने विशेष्यं भूतलत्वपूर्वकं भासते, न तु द्रव्यत्वादिपूर्वकम् । अतो भूतलत्वं विशेष्यतावच्छेदकम् । तदेव **धर्मितावत्छेदकमित्यच्यते ।** भूतलत्वनिष्ठा धर्मितावच्छेदकता । **यद् धर्मितावच्छेदकं किञ्चिद्धर्मपूर्वकं न भासते, तन्निष्ठा धर्मितावच्छेदकता निरवच्छिन्ना ।** यथा– भूतलं घटवत् इति ज्ञाने धर्मितावच्छेदकं भूतलत्वं किञ्चिद्धर्मपूर्वकं न भासते, अपि तु स्वरूपतो भासते । अतः भूतलत्वनिष्ठा धर्मितावच्छेदकता निरवच्छिन्ना । यद् धर्मितावच्छेदकं यद्धधर्मपूर्वकं भासते तद्धर्मावच्छिन्ना तन्निष्ठा धर्मितावच्छेदकता । यथा नीलघटः सुन्दरः इति ज्ञाने धर्मितावच्छेदको नीलः नीलत्वपूर्वकं भासते । अतः नीलत्वावच्छिन्ना नीलनिष्ठा धर्मितावच्छेदकता । धर्मितावच्छेदकं यद्धर्मपूर्वकं भासते स धर्मः धर्मितावच्छेदकतावच्छेदकः । यथा नीलघटसुन्दरः इति ज्ञाने नीलत्वं धर्मितावच्छेदकतावच्छेदकम् ।

**धर्मिणि धर्मितावच्छेदकं येन सम्बन्धेन भासते स सम्बन्धः धर्मितावच्छेदकतावच्छेदकसमबन्धः धर्मितावच्छेदकताघटकसम्बन्ध इत्युच्यते ।** यथा भूतलं घटवत् इति ज्ञाने, धर्मिणि भूतले भूतलत्वं समवायेन भासते । अतः समवायः धर्मितावच्छेदकतावच्छेदकसम्बन्धः ।

**प्रकारः यद्धर्मपूर्वकं भासते स धर्मः प्रकारतावच्छेदकः ।** भूतलं घटवद् इति ज्ञाने प्रकारो घटः घटत्वपूर्वकं भासते। अतो घटत्वं प्रकारतावच्छेदकम् । तच्च किञ्चिद्धर्मपूर्वकं न भासते । अतो घटत्वनिष्ठा प्रकारतावच्छेदकता निरवच्छिन्ना । भूतलं नीलघटवद् इति ज्ञाने घटः प्रकारः नीलः प्रकारतावच्छेदकः नीलत्वधर्मपूर्वकं भासते, अतः नीलनिष्ठा प्रकारतावच्छेदकता नीलत्वावच्छिन्ना । अतः संयोगः प्रकारतावच्छेदकतावच्छेदकम् ।

**धर्मिणि प्रकारो येन सम्बन्धेन भासते स प्रकारतावच्छेदकसम्बन्धनः ।** यथा– पर्वतो वह्मिमान् इति ज्ञाने, धर्मिणि पर्वते प्रकारो वह्निः संयोगेन भासते । अतः संयोगः प्रकारतावच्छेदकसम्बन्धः ।

**प्रकारे प्रकारतावच्छेदकसम्बन्धः येन सम्बन्धेन भासते स प्रकारतावच्छेदकतावच्छेदकसम्बन्धः प्रकारतावच्छेदकतावघटकसम्बन्ध इत्युच्यते ।** यथा– पर्वतो वह्निमान् इति ज्ञाने प्रकारो वह्निः प्रकारतावच्छेदकं वह्नित्वं वह्नौ समवायेन भासते । अतः समवायः प्रकारतावच्छेदकसम्बबन्धः ।

**विशेष्यतानिरूपकः प्रकारः । प्रकारतानिरूपकः विशेष्यः ।** यथा पर्वत निष्ठविशेष्यतानिरूपको वह्निः । वह्निनिष्ठप्रकारतानिरूपकः पर्वतः । **विषयतानिरूपको विषयी ।** यथा पर्वतादिनिष्ठविषयतानिरूपकं पर्वतो वह्निमान् इति ज्ञानम् ।

**विषयितापि त्रिविधा विशेष्यिता प्रकारिता संसर्गिता चेति । विषयिता विषयि ( ज्ञानं ) निष्ठो धर्मः । तत्र विशेष्यता विशेष्यतानिरूपिता, प्रकारिता प्रकारतानिरूपिता, संसर्गिता संसर्गतानिरूपिता ।** ययोः विषययोः निरूप्य निरूपकभावः तन्निरूपितविषयितयोः अवच्छेद्यावच्छेदकभावः । यथा भूतलं घटवत् इति ज्ञाने भूतलनिष्ठविशेष्यता– घटनिष्ठप्रकारतयोः निरूप्यनिरूपक भावोऽस्ति, अतः भूतलविशेष्यतानिरूपितविशेष्यितायाः घटप्रकारतानिरूपित, प्रकारतायाश्च अवच्छेद्यावच्छेदकताभावः । तथा च भूतलनिरूपित विशेष्यतावच्छिन्ना घटनिरूपितप्रकारिता । एवं घटनिरूपितप्रकारितावच्छिन्ना भूतलनिरूपितविशेष्यिता ।

**विषयविषयिभावः**



**विषयितानिरूपको विषयः**

पर्वतो वह्निमान् इति ज्ञाननिष्ठविषयितानिरूपकः पर्वतः वह्निः संयोगश्च ।

निर्विकल्पकज्ञानीयविषयता तु निरूक्तत्रिविधविषयतापेक्षया अतिरिक्तैव । अतः तत्र विषयिताऽपि अतिरिक्ता ।

**स्वाध्यायः**

१. **योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) आधेयतानिरूपकं .............. भवति । (आधेयम्, अधिकरणम्, आधाराधेयम्)

(२) यस्याभावः स .............. । (प्रतियोगी, अनुयोगी, गुणाः)

(३) प्रतियोगिता निरूपको ................ । (वियोगः, अभावः, भावः)

(४) असमवायिकारणे कार्यता ............... भवति । (संयागसम्बन्धावच्छिन्ना, समवायसम्बन्धावच्छिन्ना, उभयसमबन्धावच्छिन्ना)

(५) निमित्तकारणे कार्यता कार्यणता ............ भवति । (संयागसम्बन्धावच्छिन्ना, समवायसम्बन्धावच्छिन्ना, नाना सम्बन्धावच्छिन्ना)

(६) विषयिता ................. अस्ति । (एकविधा, त्रिविधा, द्विविधा)

(७) भूतले भूतलत्वं .............. भासते । (समवायेन, संयोगेन, कालिकेन)

(८) कार्यकारणयोः ............ आवश्यकमस्ति । (सामानाधिकरण्यम्, वैय्यधिकरण्यम्, उभयाधिकरण्यम्)

(९) प्रकारता एव .............. उच्यते । (विशेषणता, विशेष्यता, विशिष्टता)

(१०) विशेष्यतावच्छेदकं ................. समानमस्ति । (धर्मितावच्छेदकम्, धर्मतावच्छेदकम्, वर्णतावच्छेदकम्)

२. **एकवाक्येन उत्तराणि लिखत ।**

(१) सामानाधिकरण्यस्य लक्षणं लिखत ।

(२) ज्ञानीयविषयिता कतिविधा भवति?

(३) कार्यकारणभावस्योदाहरणं लिखत ।

(४) प्रकारतावच्छेदकसम्बन्धः कः?

(५) विशेष्यतावच्छेदकसम्बन्धः कः?

(६) समवायसम्बन्धः कः?

(७) अधिकरणातानिरूपकं किम्?

**३. द्वि-त्रि वाक्यैः उत्तराणि लिखत ।**

(१) आधाराधेयभावं व्याख्यात ।

(२) समवायिकारणता किं सम्बन्धावच्छिन्ना ?

(३) असमवायिकारणस्योदाहरणं लिखत ।

(४) धर्मिताघतटकसम्बन्धः कः ?

(५) निमित्तकारणं किम् ?

**४. टिप्पणीः लखत ।**

(१) समवायिकारणम् ।

(२) प्रकारतावच्छेदकसम्बन्धः ।

(३) धर्मितावच्छेदकताघटकसम्बन्धः ।

**५. निबन्धात्मकमुत्तरम् लिखत ।**

(१) कार्यकारणभावं विशदयत ।

(२) ज्ञानीयविषयितायाः त्रैविध्यं प्रतिपादयत ।

(३) असमवायिकारणं व्याख्यात ।

•

# १४ शाब्दबोधप्रक्रिया २

**पृथिवीलक्षणम्**

गन्धवत्वं पृथिव्याः लक्षणम्, गन्धवत्वञ्च गन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वम्, अत्र गन्धः आधेयः पृथिवी अधिकरणं गन्धे आधेयता वर्तते पृथिव्यामधिकरणता वर्तते, आधेयताया अधिकरणतायाश्च निरूप्यनिरूपकभावः सम्बन्धः । स च कश्चन स्वरूपसम्बन्धाविशेषः, तथा च गन्धनिष्ठा या आधेयता पृथिव्यां गन्धोऽस्तीत्याकारकप्रतीतिसिद्धा गन्धनिष्ठाऽधेयता, तन्निरूपिता या अधिकरणता पृथिवीनिष्ठाऽधिकरणता, तदाश्रया पृथिवी तदाश्रयत्वं पृथिव्यां वर्तते इति लक्षणसमन्वयः ।

नन्वेवं सत्यपि कालेऽतिव्याप्तिः, सर्वाधारः कालः इत्याकारकन्यायेन कालिकसमबन्धेन कालस्य सर्वाधारत्वेन गन्धस्यापि सर्वान्तर्गतत्वेन गन्धनिष्ठा या आधेयता इत्यक्तौ कालिकसम्बन्धावच्छिन्ना गन्धनिष्ठाधेयता गृह्यते, तन्निरूपिता या अधिकरणता इत्युक्तौ कालनिष्ठाधिकरणता तदाश्रयत्वस्य काले वर्तमान्त्वादिति चेन्न, तद्वारणाय गन्धनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात्। तन्निवेशे च काले कालिकसमबन्धेन गन्धस्य विद्यमानत्वेन कालिक सम्बन्धावच्छिन्नगन्धनिष्ठाधेयता निरूपिताधिकरणताश्रयत्वस्य विद्यमानत्वेपि काले समवायसम्बन्धेन गन्धाभावेन समवायसम्बन्धानविच्छन्नगन्ध निष्ठाधेयतानिरूपिताधिकरणताश्रयत्वाभावेन अतिव्याप्तेरभावात् ।

न चैवमपि जलादावतिव्याप्तिः कथम् ? गन्धे द्वे आधेयते वर्तेते, एका गन्धत्वावच्छिन्नाधेयता अपरा गुणत्वावच्छिन्नाधेयता । एकधर्मावच्छिन्नाधेयता एकैवेति न्यायेन गन्धशीतस्पर्शादिनिष्ठा या गुणत्वावच्छिन्नाधेयता एकत्वात्, तन्निरूपितायाऽधिकरणता, जलादिनिष्ठाधिकरणता तदाश्रयत्वस्य जलादौ विद्यमानत्वादिति वाच्यम्, तस्यामेवाधेयतायां गन्धत्वावच्छिन्नत्वस्यापि निवेशनीयत्वात्, तन्निवेशे तु जलादौ शीतस्पर्शादिगुणानां सत्वेन गुणत्वावच्छिन्नाधेयतानिरूपिताधिकरणताश्रयत्वस्याभावेन अतिव्याप्तेरभावात् ।

तथापि उत्पन्नविनिष्टघटादावतिव्याप्तिः, (उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठति इति न्यायेन उत्पत्तिक्षणे तत्र गुणस्यानुत्पन्नत्वेन द्वितीयक्षणे घटत्वस्यैव नष्टत्वेन समवायसम्बन्धगन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वस्याभावात्, न चैष नियमोऽङ्गीक्रियत इति वाच्यम् । उत्पत्तिक्षणे द्रव्ये गुणादिस्वीकारे द्रव्यस्य स्वगतगुणादिकं प्रति कारणत्वाभावप्रसङ्गः, द्रव्यस्य तदा गुणादिपूर्ववत्तित्वाभावात् इति वाच्यम्, समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिजातिमत्वस्य लक्षणत्वेन विवक्षिततत्वात् । उत्पन्नविनिष्टघटे समवायसम्बन्धेन गन्धाश्रयत्वविरहेपि तादृशाधिकरणतावत्पुष्पादिवृत्तिपृथिवीत्वजातिमत्वस्य उत्पन्नविनिष्टघटेपि विद्यमानत्वेनाव्यापत्यभावात् । अत एव सुरभ्यसुरभ्यवयवारब्धद्रव्येपि नाव्याप्तिः ।

नचैवमपि जलादावतिव्याप्तिः तादवस्थैव, तादृशाधिकरणतावत्पुष्पादिवृत्तिसत्तारूपजातिमत्वस्य जलादावपि सत्वादिति वाच्यम् ।जातौ गन्धसमाधिकरणस्येव द्रव्यत्वव्याप्यत्वस्यापि निवेशनीयत्वात्, तन्निवेशे तु सत्ताजातेः ।द्रव्यत्वाभाववद्गुणादिवृत्तित्वेन द्रव्यत्वाभाववदवृत्तित्वरूपव्याप्यत्वस्याभावेन न तां जातिमादाय अतिप्रसक्तिः ।

नचैवमपि गन्धसमानाधिकरणद्रव्यत्वाभाववद्वृत्तिद्रव्यत्वजातिमत्वस्य जलादौ सत्वात् पुनरतिव्याप्तिः तत्र दुर्वारेति वाच्यम्, तत्र व्याप्यत्वं न तद् भाववदवृत्तित्वरूपं निवेश्यते किन्तु न्यूनदेशवृत्तित्वरूपम्, तदधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वरूपं तत् निवेश्यते, तथा च द्रव्याधिकरणं घटः तद्वृत्तियोर्यो भेदः द्रव्यं न इत्याकारकप्रतीतिसिद्धो भेदः न सम्भवति किन्तु पटो न इति, भेद, तत्प्रतियोगितावच्छेदकीभूताजातिः पटत्वादिजातिरेव, न तु द्रव्यत्वजातिर्वाऽदाय जलादौ नातिव्याप्तिः ।

न च तथापि जातित्वेन जातिमनिवेश्य गन्धसमानाधिकरणः द्रव्यत्वव्याप्यो यो धर्मः तादृश धर्मवत्वं इत्येतावदेव लक्षण भवत्विति वाच्यम्, द्रव्यत्वाधिकरणाकाशादिनिष्ठभेदप्रतियोगितावच्छेदकीभूतपृथिवीजलान्यतरत्वरूपधर्ममादाय जलादावतिप्रसङ्गात् ।

न च समवायेन तादृशधर्मवत्वं निवेश्यते, तादृशान्यतरत्वस्य भेदरूपतया स्वरूपसम्बन्धेनैव तस्य जलादौ विद्यमानतया समवायसम्बन्धेन तादृशधर्मवत्वस्य जलादावविद्यमानत्वेन अति प्रसङ्गातापादकत्वेन च एतदेव लक्षणमुच्यत इति वाच्यम्, द्रव्यत्वाधिकरणं वाय्वादिः, तद्वृत्तिर्यो भेदः पृथिवीजलसंयोगवान्नेति भेदः तत्प्रतियोगितावच्छेदकीभूतः गन्धसमानाधिकरणो यो धर्मः पृथिवीजलसंयोगरूपो धर्मः समवायसम्बन्धेन तादृशधर्मवत्वस्य जलादौ सत्त्वादतिव्याप्त्यापत्तेः, जातित्वेन जातिनिवेशे तु पृथिवीजलान्यतरत्वरूपस्य पृथिवीजलसंयोगरूपस्य वा धर्मस्य जातिरूपत्वाभावेन जलादावतिव्याप्त्यभावात् । पृथिव्यां लक्षणसमन्वयप्रकारस्त्वित्थम्, द्रव्यत्वाधिकरणं जलादिकं तद्वृत्तिर्यो भेदः पृथिवी न इति भेदः, तत्प्रतियोगितावच्छेकीभूता गन्धाधिकरणवृत्तिर्या जातिः पृथिवीत्वरूपाजातिः तादृशजातिमत्वस्य पृथिव्यां सर्वत्रापि विद्यमानत्वात् लक्षणसमन्वयः नातिव्याप्तिश्च। तथा च समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिः द्रव्याधिकरणवृत्तिभेदप्रतियोगितावच्छेदकीभूता या जातिः तादृशजातिमत्वं पृथिव्याः लक्षणमिति पर्यवसन्नम् ।

**रूपलक्षणम्**

चक्षुर्मात्रग्राह्योगुणो रूपम् । चक्षुर्मात्रेण ग्राह्यः, चक्षुर्मात्रग्राह्यः । अत्र मात्रपदस्य इतरयोगाव्यवच्छेदश्चार्थः । इतरपदार्थैकदेशेतरत्वे चक्षुः पदार्थस्य प्रतियोगितानिरूपकत्वसम्बन्धेनान्वयः, योगाऽत्र प्रत्यक्षविषयत्वम्, इतरपदार्थस्य जन्यत्वसम्बन्धेन प्रत्यक्षे अन्वयः, तादृश विषयत्वस्य च व्यवच्छेदरूपाभावे अन्वयः, मात्रेणत्यत्र तृतीयायाः जन्यत्वमर्थः, ग्रह् धातोः प्रत्यक्षज्ञानं ण्यप्रत्ययस्य विषयत्वञ्चार्थः, तथा च चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं रूपस्य लक्षणमिति फलितम् ।

चक्षुर्भिन्नं यदिन्द्रियं त्वगिन्द्रियं तज्जन्यं यत्प्रत्यक्षं अयमुष्णः, अयं शीतः इत्याकारकं प्रत्यक्षं तद्विषयत्वं स्पर्शे वर्तते । तदविषयत्वं रूपे वर्तते चक्षुरिन्द्रियजन्यं यत्प्रत्यत्यक्षं अयं नीलः अयं पीतः इत्याकारकं प्रत्यक्षं तद्विषयत्वं गुणत्वञ्च रूपेऽस्तीति लक्षणसमन्वयः ।

गुणत्वमात्रोक्तौ रसादावपि गुणत्वस्य सत्वात् अतिव्याप्तिः । तद्वारणाय विशेषणोपादानम्, तन्निवेशे रसादौ गुणत्वस्य सत्वेपि चक्षुर्मात्रग्राह्यत्वस्याभावान्नातिव्याप्तिः ।

गुणत्वानुपादाने येनेन्द्रियेण या व्यक्तिः गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिः तदभावश्च गृह्यते इति न्यायेन रूपस्य चक्षुर्मात्रग्राह्यत्वे रूपत्वस्य जातित्वेन रूपाभावास्याभावत्वेन तत्र गुणत्वस्याभावात् नातिव्याप्तिः । मात्रपदानुपादाने (चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षविषयत्वानुपादाने) चक्षुरिन्द्रियजन्यं यत्प्रत्यक्षम् अयमेकः इमौ द्वौ इत्याकारकं प्रत्यक्षं तद्विषयत्वं गुणत्वञ्च संख्यायामस्तीत्यितिव्याप्तिः, तद्वारणाय मात्र पदग्रहणम्, तन्निवेशे तु चक्षुर्भिन्नेन्द्रियं त्वगिन्द्रिय तद्जन्यं यत्प्रत्यक्षं अयमेकः, इमौ द्वौ इत्याकारकं प्रत्यक्षं तद्विषयत्वस्यैव संखायायां वर्तमानत्वेन तदविषयत्वस्य तत्राभावान्नातिव्याप्तिः ।

चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वानुपादाने धर्माधर्मादिरतीन्द्रियत्वेन चक्षुर्भिन्नत्वगादीन्द्रियजन्यप्रत्यक्षाविषयत्वस्य गुणत्वस्य च तयोः विद्यमानत्वात् अतिव्याप्तिः, तद्वारणाय चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वदलं निवेशनीयम्, तन्निवेशे चक्षुरिन्द्रियजन्यप्रत्यक्षं रूपादिविषयत्वस्य धर्माधर्मादावभावात् नातिव्याप्तिः ।

एवमपि ज्ञानमात्रस्य मनोजन्यत्वेन चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षविषत्वस्यैव रूपेसत्वेन अविषयत्वस्याभावात् असम्भवः तद्वारणाय चक्षुर्भिन्नन्द्रियपदं त्वगिन्द्रिपरमिति वक्तव्यं तथा च त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं रूपस्य लक्षणं फलितम् । तथा च चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षविषयत्वस्य सत्वेपि त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वस्याभावेन नासम्भवः ।

**यथार्थानुभवलक्षणम्**

तद्वति तत्प्रकारकानुभवो यथार्थः । यथा रजते इदं रजतम् ॥

तद्वतीत्यत्र सप्तमयर्थो विशेष्यतानिरूपकत्वम् । तद्वतः आधेयत्वसम्बन्धेन विशेष्यतायामन्वयः । तथा च तन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वं यथार्थानुभवस्य लक्षणम् । तत्पदेनप्रकारीभूतधर्मो ग्राह्यः । रजते इदं रजतम् इति ज्ञाने लक्षणसमन्वयः । तथाहि - तत् रजतत्वं तद्वत् रजतं तन्निष्ठविशेष्यतानिरूपकत्वे सति तत्पदग्राह्यरजतत्वनिष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वस्य पूर्वोक्तज्ञाने सत्वात् । अनुभवत्वमात्रोक्तौ अयथार्थानुभवेऽतिव्याप्तिः । अनुभवत्वानुपादाने इदं रजतम् इति यथार्थानुभवः जन्यस्मृतिसंस्कारयोः अतिव्याप्तिः । तत्रापि तद्वद्विशेष्यकत्वतत्प्रकारकत्वयोः सत्वात् अतोऽनुभवत्वनिवेशः । तद्वद्विशेष्यकत्वे सति अनुभवत्वमात्रोक्तौ शुक्तौ इदं रजतमिति अयथार्थानुभवेऽतिव्याप्तिः ।

तथाहि- तत्प्रकारकत्वदलाभावे तत्पदेन प्रकार एव ग्राह्य इति नियमालाभेन अत्र तच्छब्देन शुक्तित्वं गृह्यते, तत्र तद्वच्छुक्तिविशेष्यकत्वज्ञानत्वयोः सत्वात् अतिव्याप्तिः, अतः तत्प्रकारत्वदलम् निवेश्यते । तन्निवेशे (एकत्रोच्चारितयोः तच्छब्दयोः एकार्थबोधकत्वमिति नियमेन) प्रथमगृहीततत्पदस्यैव द्वितीयतत्पदेनापि ग्राह्यतया प्रथमतत्पदगृहीतशुक्तित्वप्रकारकत्वस्य निरुक्तानुभवेऽभावात् नातिव्याप्तिः । तत्प्रकारकत्वे सति अनुभवत्वमात्रोक्तौ शुक्तौ इदं रजतमिति भ्रमे तत्पदग्राह्यरजतप्रकारकत्वे सति अनुभवत्वस्य सत्वात् अतिव्याप्तिः । अतः तद्व द्वेशेष्यकत्वं निवेशनीयम्, तन्निवेशे तु तत्पदगृहीतरजतत्वद्रजतविशेष्यकत्वस्य तत्राभावात् नातिव्याप्तिः । न चैवमपि पर्वतो घटत्ववान् ह्रदोवह्निमान् इति समूहालमबनभ्रमे वह्निमत्पर्वतविशेष्यकत्ववह्निप्रकारकत्वयोः सत्वात् अतिव्याप्तिरिति वाच्यम्, तद्वनिष्ठविशेष्यतानिरूपिता या तन्निष्ठा प्रकारता तच्छाल्यनुभवत्वस्य लक्षणत्वाङ्गीकारात् इत्यर्थः । अत्र वह्नेः ह्रदांशे प्रकारत्वेन वह्निमति पर्वतांशे अप्रकारकत्वेन वह्निनिष्ठप्रकारतायाः वह्निमत्पर्वतनिष्ठविशेष्यतानिरूपितत्वाभावेन तादृशप्रकारतानिरूपकत्वस्य तत्राभावात् नातिव्याप्तिः । न चैवमपि पर्वतोवह्निमान् ह्रदो वह्निमान् इति समूहालमबनभ्रमे वह्निमत्पर्वतनिष्ठविशेष्यतानिरूपितवह्निनिष्ठप्रकारता-निरूपितकत्वस्य सत्वात् अतिव्याप्ति वाच्यम्, भ्रमभिन्नत्वेनापि अनुभवस्य विशेषणीयत्वात् तत्ज्ञानस्य ह्रदांशे वह्नवगाहित्वेन भ्रमरूपता भ्रमभिन्नत्वस्य तत्राभावात् नातिव्याप्तिः । न च निर्विकल्पकप्रत्यक्षे प्रकारताविशेष्यतयोः अभावेन तद्वद्विशेष्यकं तत्प्रकारकं यत्ज्ञानं तद्वृत्तिः - अनुभवत्वव्याप्या या जातिः तद्वत्वस्य विवक्षीयत्वात् निर्विकल्पप्रत्यक्षे विशेष्यत्वप्रकारकत्वयोरसत्वेपि तद्वद्विशेष्यकतत्प्रकारकज्ञानवृत्यनुभवत्वव्याप्ययथार्थानुभवत्वजातेः सत्वात् नाव्याप्तिः ।

**स्वाध्यायः**

**१. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत ।**

| | |
|---|---|
| (१) गन्धः कस्य गुणः .................. भवति । | (दिशः, पृथिव्याः, तेजसः) |
| (२) रूपं .................. गुणः अस्ति । | (व्याप्यवृत्तिः, अव्याप्यवृत्तिः, उभयवृत्तिः) |
| (३) पृथिवी ............. अस्ति । | (द्विविधा, चतुर्विधा, बहुधा) |
| (४) कालिकेन गन्धाधिकरणमस्ति ................. अस्ति । | (कालः, आत्मा, मनः) |
| (५) ज्ञानेन्द्रियाणि ................ सन्ति । | (पञ्च, सप्त, नव) |
| (६) भास्वरशुक्लं रूपम् ................. भवति । | (तेजसः, जलस्यः, वायोः) |
| (७) नित्यसम्बन्धः ................ वर्तते । | (संयोगः, स्वरूपः, समवायः) |
| (८) शरीरेन्द्रियभिन्नो .................. । | (विषयः, परमाणुः, सम्बन्धः) |
| (९) यथार्थानुभवः ................ अस्ति । | (अप्रमा, प्रमा, किमपि न) |
| (१०) अनुभवः ................ अस्ति । | (द्विविधः, एकविधः, चतुर्विधः) |

२. **एकवाक्येन उत्तराणि लिखत ।**

(१) पृथिव्या: लक्षणं लिखत ।

(२) गन्ध: कतिविध: ?

(३) यथार्थानुभवस्योदाहरणं लिखत ।

(४) किन्नाम विषय: ?

(५) पृथिव्या: इन्द्रियं किम् ?

(६) किन्नाम व्याप्यत्वम् ?

(७) अनुभवस्य प्रकारद्वयं लिखत ?

३. **द्वि-त्रि वाक्यै: उत्तराणि लिखत ।**

(१) पृथिवीलक्षणस्य काले अतिव्याप्ति: कथं समभवति ?

(२) उत्पन्नं द्रव्यं .......... पूरयत ।

(३) रूपस्य लक्षणं लिखत ।

(४) किन्नाम प्रतियोगी ?

(५) पृथिव्या: शरीरं किम् ?

४. **टिप्पणी: लिखत ।**

(१) कालिकसम्बन्ध: ।

(२) जातिघटितलक्षणम् ।

(३) सत्ताजाति: ।

५. **निबन्धात्मकमुत्तरम् लिखत ।**

(१) रूपस्य लक्षणं विवेचयत ।

(२) समन्वयपुरस्सरं पृथिव्या: स्वरूपं प्रतिपादयत ।

(३) सदलकृत्यं यथार्थानुभवस्य लक्षणं विशदयत ।

•

# परिशिष्टम्

**लक्षणानि**

| | | | |
|---|---|---|---|
| १. | पदार्थः | – | पदस्यार्थः पदार्थ इति व्युत्पत्त्याऽभिधेयत्वं पदार्थसामान्यलक्षणमिति लभ्यते । |
| २. | द्रव्यम् | – | द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम् । |
| ३. | अव्याप्तिः | – | लक्ष्यैकदेशावृत्तित्वमव्याप्तिः । |
| ४. | अतिव्याप्तिः | – | अलक्ष्यवृत्तित्वमतिव्याप्तिः । |
| ५. | असंभवः | – | लक्ष्यामात्राऽवर्तनमसम्भवः । |
| ६. | गुणः | – | गुणत्वजातिमान्वा । |
| ७. | कर्म | – | संयोगभिन्नत्वे सति संयोगामवायिकारणं कर्म, कर्मत्वजातिमद् वा । |
| ८. | उदेशः | – | नाम्ना पदार्थसङ्कीर्तनमुद्देशः । |
| ९. | नित्यम् | – | ध्वंसाप्रतियोगित्वम् । |
| १०. | अनित्यम् | – | ध्वंसप्रतियोगित्वमनित्यत्वम् । |
| ११. | शरीरम् | – | आत्मनो भोगायतनं–शरीरम् । |
| १२. | भोगः | – | सुखदुःखान्यतरसाक्षात्कारो–भोगः । |
| १३. | इन्द्रियम् | – | शब्देतरोद्‌भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः संयोगाश्रयत्वम् इन्द्रियत्वम् । |
| १४. | विषयः | – | शरीरेन्द्रियभिन्नो विषयः । |
| १५. | प्रलयः | – | सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः । |
| १६. | महाप्रलयः | – | सर्वभावकार्यध्वंसो महाप्रलयः । |
| १७. | मूर्तपदार्थः | – | मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं वा । |
| १८. | इश्वरः | – | नित्यज्ञानाधिकरणत्वम् ईश्वरत्वम् । |
| १९. | जीवः | – | सुखादिकं जीवलक्षणम् । |
| २०. | मनः | – | स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम् । |
| २१. | स्मृति | – | बहिरिन्द्रियाऽजन्यत्वविशिष्टसंस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणम् । |
| २२. | कारणत्वम् | – | अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम् । |
| २३. | समवायिकारणम् | – | समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्मयसम्बन्धावाच्छन्नकारणत्वम् । |
| २४. | असमवायिकारणम् | – | समवेतं सत् – समवायसम्बन्धेन वर्तमान सत् तन्तुरूपं पटगतरूपं प्रति कारणं भवति, अतोऽसमवायिकारणं तन्तु रूपं पटगतरूपस्य । |
| २५. | व्यापारः | – | व्यापारः तज्जन्यत्वे सति तज्जन्यजनकत्वं । |
| २७. | सविकल्पकम् | – | विषयतानिरूपकत्वेन प्रकारानिरूपकज्ञानत्वं सविकल्पकस्य लक्षणम् । |
| २८. | सविकल्पकम् | – | विशेष्यतानिरूपकज्ञानत्वं संसर्गतानिरूपकज्ञानत्वमित्यपि लक्षणम् । |
| २९. | सविकल्पकम् | – | नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहि ज्ञानमित्यर्थः । |

३०. प्रत्यक्षज्ञानम् – आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षज्ञानमुत्पद्यते ।

३१. परामर्शः – व्याप्तिज्ञानाजन्यत्वे सति व्याप्तिज्ञानजन्यमनुनितिजनकत्वात्तज्जन्यत्वे सति तज्जन्यजन्कत्वरूपव्यापरत्वमुपन्नम् ।

३२. अनुमानम् – अनुमानं नाम व्याप्तिज्ञानम् ।

३३. पक्षता – सिषाधयिषाविरहसहकृतसिद्धयभावः पक्षता ।

३४. परामर्शः – व्याप्तिविषयकं यत् पक्षधर्मताज्ञानं स परामर्श ।

३५. साहचर्यम् – सह चरतीति सहचरस्तस्य भावः – साहचर्यम् ।

३६. साहचर्यम् – साहचर्यं सामानाधिकरण्यम् ।

३७. व्याप्तिः – हेतुसमानधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः ।

३८. लिंगम् – व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम् तच्च धूमादि ।

३९. अवयवत्वम् – अवयवत्वं नाम द्रव्यसमवायिकारणत्वम् ।

४०. प्रतिज्ञा – साध्वविशिष्टपक्षबोधकवचनं–प्रतिज्ञा ।

४१. हेतुः – पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं–हेतुः ।

४२. उदाहरणम् – व्याप्तिप्रतिपाददृष्टान्तवचनमुदाहरणम् ।

४३. उपनयः – उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः ।

४४. प्रतिज्ञा – साध्यवत्ता पक्षवचनं–प्रतिज्ञा ।

४५. निगमनम् – हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम् ।

४६. तृतीया – तृतीयायाः प्रयोज्यत्वमर्थः ।

४७. केवलान्वयीत्वम् – अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् ।

४८. हेत्वाभासः – हेतुवदाभासन्ते इति हेत्वाभासाः ।

४९. हेत्वाभासः – आनुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वम् हेत्वाभासत्वम् ।

५०. हेत्वाभासः – अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम् ।

५१. आश्रयासिद्धिः – आश्रयाऽसिद्धिः – पक्षे पक्षतावच्छेदकाऽभावः ।

५२. स्वरूपासिद्धः – पक्षे हेत्वभाव स्वरूपासिद्धः ।

५३. भ्रमः – तदभाववति तत्प्रकारकनिश्चय : ।

५४. संस्कारः – संस्कारत्वजातिमान् संस्कारः ।

५५. वेगः – वेगत्वजातिमान् वेगः ।

५६. आकुञ्चनम् – वक्रतासम्पादकं कर्म आकुञ्चनम् ।

५७. प्रसारणम् – ऋजुतासम्पादकं प्रसारणमित्यर्थः ।

•••